—इम देसनारूपपाणी तणइ प्रवाहिइ करी धौतसर्वपापमल हुंतउ कुमर बे करकमल जोडी गुरु प्रतइ कहइ । भगवन् ! मुझनइ सर्वविरत चारित्र आपउ । जे चारित्र संसारसमुद्र हुंतीउ तारइ ॥७॥

पंचहि पुरुससएहिं, पु(प)व्वईओ सो य सगुरुपासम्मि ।
जुगो(ग्गो)त्ति [य] नाउनं(ऊणं), गुरुहि सो नियपयए ठविओ ॥८॥

—माता पिता पूछी प्रतिबंध म करउ । ए अध्यवसाय घणी कर्मनी राशि क्षय गई हुइ तउ उपजइ । ते वात सांभली माता पितानइ भली परि पृच्छवी । पांचसइ सुभटसहित श्रीगुणंधराचार्य समीपि दीक्षा लीधी । यतः—

"दो चिय हुंति गईओ, साहसवंताण धीरपुरिसाणं ।
वेल्लहलकमलहत्था, रायसिरी अहव पव्वज्जा" ॥

—साहसीक धीर पुरुषनी बि गति छइ । विकसती कमला छइ जिहां एहवी राजलखमी भोगवइ अथवा प्रव्रज्या दीक्षा आदरइ । दीक्षा लेई ग्रहण सीख्या, आसेवना सिख्या, इसु सिख्यतउ हुंतउ क्रमि क्रम श्रीगुणंधरा गुरे जोग्य जाणी आपणइ पाट थाप्या । श्रीकालिकाचार्य महात(न्) जुगप्रधान हूया ॥८॥

विहरंतो(ता) संपत्तो, उजे(ज्जे)णिए [य?] कालिगायरिओ ।
पव्वइया विहरंती, तत्थेव समागया भग(गि)णी ॥९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



—ते कालिकाचार्य विहारक्रम करता भविक जीवि प्रतिबोधता उजेणी नाम नगरीइ पहुता । हवइ सरसती बहिनि पणि भाईनइ पूठि दीक्षा लेई प्रवर्तनी पदइ वर्त्तमान विहरती ते पणि तत्र पहुती ॥९॥

**अह तत्थ नरवरं(रिं)दो, गद्दभिविज्ञासुसाहणसुरं(रिं)दो ।**
**नामेण गद्दभिल्लो, इत्थीलोलो सय(या) वसइ ॥१०॥**

—अथानंतर उजेणीनयरीनायक गर्दभी विद्यानी भली साधना करी सुरेन्द्र भणीए इन्द्र महाराज समान बलिष्ट पराक्रमी गर्दभिल्ल नाम राजा स्त्रीलोलुप सदा प्रवर्त्तइ ॥१०॥

**कामभयपरवसेणं, रइरूपसमा सरस(स्स)ई तेण ।**
**दिट्ठा नि(दु)ट्ठेण तओ, हीरंती विलवए बाला ॥११॥**

—ते गर्दभिल राजा अन्यदा प्रस्तावि क्रीडा निमित्त नगर बाहरि वनमाहि जेतलइ पहुंचइ, तेतलइ ते महासती सरस्वती प्रवर्त्तिनी रूपइ ते रंभा तिलोत्तमा समा नगरमाहि आवती देखी । राजा श्रीगर्दभिल कंदर्परूप जे मदातिणइ करी परवस हुउ हुंतउ चींतवइ; "स्युं जगमाहि कंदर्पदेव नथी ? जेह भणी एहवी सुरूप स्त्री सुसील ?" इम चींतवी, तिणइ अति पापिष्टइ ते महासती हरी । ते महासती तिवारइ इम विलाप करवा लागी ॥११॥ सा ते विलाप—

**हा सुयधर! हा कालयसूरी!, मइ रक्ख रक्ख एयाउ ।**
**जिणसासणम्मि जम्हा, उड्डाहनिवारणं साहु ॥१२॥**

—हे भ्रात ! अहो श्रुतधर ! अहो शासननायक ! तुम्हा हुंता मुझनइ ए पापिष्ट लेइ जाइ छइ, एह हुंती मुझनइ राखउ, जेह भणी जिणसासणनुं उड्डाह निवारिवुं चारु भलुं । सासनना विद्वेषीनइ बोधिनास । अणंत संसारीपणुं बोलु । यतः—

"**उड्डाहकारगाणं, बोहीनासो अणंतसंसारो**" ।

जिनशासनना उड्डाहकारक मनुष्यनइ बोधि कहतां सम्यक्तवरो नास अनंतां संसारीपणो बोलउ ॥१२॥

**अंतेउरम्मि णीया, तेण नरे(रिं)दाहमेण अह सूरी ।**
**संजुओ(लग्गो) पडिबोहणवयणं तस्सेवमक्खायं ॥१३॥**

—तिणइ नरिंदाधमइ इम विलाप करती महासती अंतेउरमाहि आणं न्याय मजादा मूकीनइ । यतः—

"**किम्नु कुवलयनेत्राः सन्ति नाकं न नार्यः ?,**
**त्रिदशपतिरहल्यां तापसीं यस्त्वसेवि ।**
**हृदयतृणकुटीरे दीप्यमाने स्मराग्ना-**
**वुचितमनुचितं वा वेत्ति किं पण्डितोऽपि ?**"+ ॥

—किसउ कमलसारीखा नेत्र छइ एहवी इन्द्राणी थकइ त्रिदसपति कहतां इंद्र अहिला जे तापसी जे सेवी । हृदय कहितां हिया रूपीया तृणकुटीर छापरउ तिहां कंदर्परूपि अग्नि लागइ हुंतइ उचित अनुचित भली पाडुई वात न जाणइ । पंडित कोई—

"**विकलयति कलाकुशलं, हसति [शुचिं?] पण्डितं विडम्बयति ।**
**अधरयति धीरपुरुषं, क्षणेण मकरध्वजो देवः**" ॥

---

+ मूलादर्शे एतादृगशुद्धो पाठः—
किम कुवलयनेत्रा संत निनाकनाकनाजे त्रिदशपतिरहिलां तापसो यस्तिवेवि ।
हृदयतृणकुटीरे दीप्यमानास्मराग्नावुचितिमनचितं वा वेत्त क पण्डितोऽपि ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



—विकल करइ कलावंतनइ, पवित्रनइ हसइ, पंडतनइ विडंबइ, धीरवंत पुरुषनइ अधीर करइ, क्षण एकमाहि मकरध्वज कंदर्प देवता ॥

इम कामातुर ते गर्दभिल्ल जाणी कालिकाचार्य श्रीसंघ संयुक्त तहं पासि जई तेहनइ प्रतिबोधवा निमित्ति अनेक वचन कह्या ॥१३॥ सा ते वचन—

अत्थि तुह सयसहसं(स्सं), नरिंददुहियाण रूववंतीणं ।
ताहि चेव [न] तित्तो, ता एयाए कहं तित्ती ? ॥१४॥

—राजन् ! ताहरइ अंतेउरं हंसगतिगामणी जनमनमोहनी रूपइं देवांगना नाम दउ रती एहवी राजानी पुत्रीना सत सहस्र हुंतइ जउ तुझनइ तृप्ति नथी । तउ ए मस्तकमुंड श्वेतवस्त्रधारणी कुरूपलि गनीनइ ग्रहणइ किम तृप्ति हुसइ ? किन्तु पापनी वृद्धि हुसइ लोकमाहि कुजस, परलोकमाहि नरकफलि । तेह भणी सुख वांछइ तउ ए महासती सुसील मेल्हि ॥१४॥

सो कामग(ग्ग)हगहिओ, वयणामयसंचिओ [वि] न हु भिन्नो
तेल्लकुडे जलबिंदु व्व, तओवायं कुणइ सूरी ॥१५॥

—ते राजा कामरूपी अजगर तणइ करी विकल हुओ । आचार्यना वचनामृत जलइ सींचिओ पणि भेदणउ नही । सीपरि चोपडइ घडइ पाणीना बिंदुनी परि तिवार पछइ आचार्य उपाय कीधउ । स्यउ ते उपाय ? ॥१५॥

काउ(ऊ)ण गहिलरूवं, तओ विरूवं विभासय(ए) वयणं ।
एसो राया तो किं, नत्थि हु एयस(स्स) रजु(ज्जु)सिरी ॥१६॥

—पछइ आचार्य गहिलानु रूप करी अनेक विरूप बोलवा लागउ । स्या ते विरूप वचन ? । ए राज्य तउ स्युं ? ए राजा समूल उन्मूलीसि । हुं भिक्षाचर तउ सूं ? एहनइ सर्वथा राजलक्ष्मी नथी ॥१६॥

एयं पयंपिऊणं, तह सगकूले तओ गओ सूरी ।
तत्थ य जे सामंता, सुसाहिणो देसभासाए ॥१७॥

—इम अनेकविध वचन कही तिहां हुंती आचार्य सगकूलनइ विषय गया । तिहां जे सामंत प्रवर्त्तइ ते देशभाषाइ साखी राजाइ कहाई ॥१७॥

निवो साहणुसाही [य] ति(त)त्थ एगं सुसाहिणं ।
विज्जाविन्नाणमंतेहं(हि), आवज्जिऊण ठिया तहिं ॥१८॥

—जे सामंत राजानउ जे नृप ते साखानुसाखी कहाई । तिहां एक साखी राजा विद्याविन्ना(ज्ञा)न मंत्र तंत्रे करी आवर्जी मुनि शाखीश्वर तेहनइ पास रहिया ॥१८॥

दि(द)ट्ठूण य कण्हमुहं, पुच्छइ तं सूरिणो तओ सव्वं ।
साहइ रूट्ठाएसं, सो नरवइणो जहावुत्तं ॥१९॥

—अन्यदा प्रस्तावि ते कृष्णमुख देखी सूरि पूछइ; "राजन् ! ए सी वात ? तिवारइ ते राजा आपणा राजानू घोर रौद्र आदेस जिम आवउ छइ । ते सर्व कहइ ॥१९॥

छुरियकचोलियसहिओ, लेहोऽज्ज समागओ य सो र(रु)ट्ठो ।
मग्गइ सीसं मह तह, छन्नवइनिवाणमन्नेसि '॥२०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



—ए छुरी अनइ कचोलउ सहित लेख आज आव्या छइ । काइ कारण लगी ते राजा रूठउ माहरउ मस्तक मागइ, तथा आ देसना बीजा छन्नवइ मझ समान राजाना पणि । एहवुं रुद्र आदेस तेह माहि लख्यूं छइ ॥२०॥

को नरउ परवसत्तं, न उणो दुक्खं च जीवहरणाओ ।
आणाभंगो मरणं, मइ किण्हमुहं अउ(ओ) जायं ॥२१॥

—भगवन् ! नरक कुण परवसपणुं । जीवहरण उपरांत दुख नही । नरेंद्रनी आज्ञाखंडन तेह मरण । एक पासइ राजानी आज्ञा मारवानी, हुं जीववा वांछुं । तेह भणी माहरूं मुख कालउ ॥२१॥

ठाणलोहेण मरणं, किं पावह कुपुरिसु व्व सुहडवरा ! ।
सुपुरिस सिंहगय व्व [?], ठाणे य ठाणे य सम्माणं ॥२२॥

—अवसर जाणी सुगुरु तेह प्रति कहइ, स्युं ? अहो सुभटो कापुरिषनी परि स्थानकनइ लोभइ मरण सीध पामउ छइ ! सत्पुरुष सिंह हस्तीनी परि स्थानक स्थानक सन्मान लहइ । यतः—

"त्रयः स्थानं न मुञ्चन्ति, काकाः कापुरुषा मृगाः ।
स्थानभ्रष्टा न शोभन्ते, सिंहाः सत्पुरुषा गजाः" ॥

—तम्हा भला सुभट सुरवीर अकालमरण सीध पामउ ! मझ पूठि आवउ । इस्यउ कहइ हुंतउ ॥२२॥

तो सव्वे पच्छन्नोसरणं काउ(ऊ)ण सूरिणो वीरा ।
उत्तरिऊण य सिंधुं, सुरट्ठदेसम्मि संपत्ता ॥२३॥

—तउ ते वीर सूर सर्व सामंत प्रछन्न छाना । सूरि भणीइ आचार्य तेहनुं सरिण करी । सिंधुनदी ऊतरी । अविछिन्नपयाणे सोरठदेसमाहि आव्या ॥२३॥

वासारत्ते पत्ते, गइविग्घ[क]रे तओ भणइ भयवं ।
चिट्ठह नियनियठाणे, संमिलिया जाव वासन्तं ॥२४॥

—तेतलइ वर्षाकाल आव्यउ । चाली हाली कोइ न सकइ । कर्दमाकुल प्रथ्वी हुई । मेह वरसवा लागा । तणइ अवसर भगवंत तेह प्रति कहइ । अहो सुभटो ! संमित हुता आपणइ आपणइ थानक रहउ । जासीम वर्षाकालनउ प्रांत । तहत्ति करी ते सर्व तहां रह्या ॥२४॥

वासंते संदिट्ठा, सव्वे ते वज्जरंति भो भयवं ! ।
अम्हे संबलि(ल)रहिया, बलवंतो पहि कहं जामो ? ॥२५॥

—पछइ वर्षाकालनइ प्रांति ते बोलाव्या हुंता इस्युं कहइ । अहो भगवन् ! अम्हे संबलि विणु मालवा सीम किम जाऊं । संबलि खूटा ॥२५॥

सूरीहिं तओ सासणदेवीवरदिन्नचू(चु)न्नजोगेण ।
निप्पायंतं(यमइ) महंतं, कणयमयं इट्टियापायं ॥२६॥

—ते वात सांभली सुहगुरे सासणदेवी दत्त चूर्णनइ जोग तत्काल सुवर्णमय इटवाह कीधउ ॥२६॥

गहिउ(ऊ)ण संबलबलं, सुमालवं पप्प मालवं पत्ता ।
ते सव्वे नरनाहा, माहप्पो एस सुगुरूणं ॥२७॥

—यथाजोगि संबल लेइ सुमालव भणीइ लक्ष्मीलव पामी ते नरनाथ मालवइ पहुता । ए सर्व महात्म्य सुगुरुनुं जाणिवो ॥ २७ ॥

३०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उज्जेणीनरनाहो, समागओ सम्मुहं महाजुद्धं ।
काउ(ऊ)ण जिओ नट्ठो, उज्जेणीए पविट्ठो सो ॥२८॥

—ते आवी सांभली गर्दभिल्ल राजा संमुख आवी रथस्युं रथ घोडासुं घोडा, पायकसुं पायक, हाथीसुं हाथी, राजासुं राजा, धनुर्धरसुं धनुर्धर–इम न्यायइ महायुद्ध करी सगराजाइ जीतउ हुंतउ गर्दभिल्ल नासी नगरीमाहि पइठउ ॥२८॥

अह सूरी सगसहिओ, रोहं काऊण संठिओ तत्थ ।
समरंगणं च जायइ, दिणे दिणे उभयपक्खम्मि ॥२९॥

—अथानंतर सूरि सगसहित गढरोहो करी तिहां रहउ । दिने दिने बिहुं दले संग्रामां(समरां)गण हुइ ॥२९॥

अह अन्नया समेया, सगुरुं(सगा) पुच्छंति कालिगायरियं ।
दुग्गं सुन्नं दीसइ, जुज्झं न हवइ अज्ज ! कहं ? ॥३०॥

—अन्य दिने सग आवी कालिकाचार्यनइ कहइ स्वामी आज युद्ध न हुइ । गढ सूना दीसइ ते काइं ! सूरि भणइ ॥ ३० ॥

किण्हट्ठमीदिणो सो, आराहइ गद्दभिं महाविज्जं ।
तव्वयणसवणयाए[उ], परबलं जाइ पंचत्तं ॥३१॥

—आज कृष्णाष्टमी दिन ते राजा गर्दभी विद्या साधइ छइ । तेहना वचन सांभली करी परबल पंचत्व भणीए मरण ते पामइ । रौद्र गर्दभी विद्या वर्त्तइ । कोउ उपाय करिवउ ॥३१॥

कोसदुगं गंतूणं, सबरं संठविय तत्थ जुज्झमुहो ।
सूरी अट्ठुत्तरसयं, गहिऊणं सद्दवेहीणं ॥३२॥

—कालिकाचार्य बि गाउ पाछा जाइ । सबर सैन्य तिहां राखी । जुद्धाभिमुख अष्टोत्तर सय सब्दवेधी सुभट लेई तिहां भणी चाला ॥३२॥

तत्थागओ सुसुहडो, कलायरो कालिगायरिओ सूरी ।
जाव पसारेइ मुहं, सरेहि भरियं मुहं ताए ॥३३॥

-जेतलइ सुभट कलासागर कालिकाचार्य तिहां आव्यउ तेतलइ मंत्रनइ योगि गर्दभीइं मुख पसारुं । सब्दवेधी सुभट सहित आचार्य समकाल तेहनूं मुख भाथा सम तूणीर समान कीधउ । सरे भरुं ॥३३॥

मुत्तपुरीसनिसग्गं, काउ(ऊ)णं तम्मुहे तओ नट्ठा ।
गहियं पुरं स गहिओ, गद्दभ इव गद्दभिल्लनिवो ॥३४॥

—पछइ ते गर्दभी मल मूत्र तेहनइ मुख करि तिहां हुंती नाठी । ते नगर लीधउ । ते गर्दभिल्ल राजा गर्दभनी परि झालउ । सगे आचार्य समीपि आणउ ॥३४॥

भणिओ सो सूरीहं(हिं), रे दुरायार ! [?] पावतरुपुप्फं ।
एयं भवंतरे पुण, पाविहिसि अओ य नरयफलं ॥३५॥

—आचार्य ते बोलाव्यउ । इसु कहउं; " दुराचार ! पापतरुबीयं पापतरुनुं फ(फू)ल, ए राजभ्रंसपणुं । भवांतरे ए साध्वीना सीलखंडन लगो नरकादिकना दुक्खरूप फल पामीसि ॥३५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**भो कुणइ धम्मसरणं, अहुणा चिय मुचए जओ सिग्घं।**
**नो पडिवज्जइ तो सो, निवासिओ तेहि विसयाओ ॥३६॥**

—वली आचार्य कहइ; "राजन्! अजी गउ नथी, ताहरुं कांइ, जउ द्विविध धर्ममाहे एक धर्मनुं अंगीकार करइ तउ राज्य आपीइ। एह हुंती सीघ्रपणइ मुंकाइं। इम कहुं पणि पडिवजइ नही। तिवारइ ते सगराजाइ गर्दभिल्लनइ मालवा हुंती निकासउ। दूरि कीधउ ॥३६॥

**सूरिहिं ते राजे(रज्जे)सु, ठाविया संजमे तहा भगिणी।**
**बलमित्त-भाणुमित्ता, जामिसुया तत्थ संपत्ता ॥३७॥**

—स गुरे ते राज्य थाप्या। सविहुंनइ विहची मालवानुं राज्य आपुं। तथा भगिनी सरस्वती संयमइ थापइ। आपणपइ गच्छमाहे आवी इरियावही पडिकमी मिच्छामि दुक्कड देइ। विहार करता जिहां बलमित्र—भानुमित्र बहिनना बेटा छइ तिहां आव्या ॥३७॥

( २ )

**भरुयच्छदेसपहुणो, पहूपवेसुस्स(च्छ)वं च काऊणं।**
**सोऊण निवइप(पु ?)त्तीभानुस(सि)रीनंदणो धम्मं ॥३८॥**

—ते भरुअच्छ देसना ठाकुर तेह प्रभु श्रीकालिकाचार्यनुं प्रवेशोत्सव सविस्तर कराव्या। पछइ प्रभुनी देसना सांभली बलमित्र राजानी पुत्री तेहनउ नंदन कुण एक विसेष करइ ॥३८॥

**सुहगुरुकहियं गिण्हइ, बलभान(णू)नामओ य पविजं(व्वज्जं)।**
**जिणभत्तं नाउ(ऊ)णं, निव[इ]पुरोहा कुणइ वायं ॥३९॥**

—राजा श्रीबलमित्र तेहनी पुत्री भानुश्री, तेहनउ नंदन बलभानु नामा कुमार सुहगुरुनुं कथित धर्म सांभली दीक्षा लीधी। इम राजा राजलोक जिनशासन भक्त जाणी राजानउ पुरोधा सुयसा नाम गुरु साथि वाद करइ सभामाहे ॥ ३९ ॥

**सो निजि(ज्जि)ओ गुरूहं(हिं), वयणेहिं वंचिऊण निवलोओ(ए ?)।**
**ठाणे ठाणे भत्तं, अणेसणीयं च सो कासी ॥४०॥**

—पछइ ते गुरे जीतउ। लोकमाहि पुरोधानी मानम्लानि हुई। तिवार पछइ तिणइ ब्राह्मणइ इस्ये वचने कर राजा नगर लोक वंचिउ। सा ते वचन; "अहो राजन्! एक सोनउ नइ सुरभि। सुहगुरु अनइ सगा। एवडउ कांइ करउ। ए सुहगुरुना पायकमल पूजीइ, आराधीइ, तेह भणी ए जिहां बइस्यइ पगलां न्यसइ, ते भूमिका आपणे पगे किम स्पर्शीइ? आसातना हुवइ। गुरुनइ सरस आहार दीजइ"। इम मुग्ध लोकनइ कपटवचने विप्र तारी। थानकि थानकि भक्त अनेषणीय करावी गुरु चलाव्या ॥४०॥

( ३ )

**ता स गुरू कारणओ, समागए वि य घणे पयठा(इट्ठा)णं।**
**पत्तो पुरप्पवेसं, कुणइ निवो परमभत्तीए ॥४१॥**

—तदनंतर गुरु कारण जाणी वर्षाकाले विहार करी पइठाणपुरि आव्या। परमभक्तइ तिहां सातवाहन राजाइ नगरप्रवेस कराव्यउ। तिहां सुखइ रहइ ॥४१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिरिसाय(ल)वाय(ह)णेणं, संघेण य कालिगारिया भणि[या] ।
छट्ठीए कायव्वा, पजूसणा न उण पंचमी(मि)ए ॥४२॥

—अन्य दिन राजा श्रीसालवाहन अनइ संघि कालिकाचार्य पूछ्या । इम कह्युं; भगवम् ! पर्युषणा छठि दिनि करउ न पुन पांचमइ ते स्यइ ॥४२॥

पंचमीए इंदमहो, च्छव्ववट्टं [?] ग(गं)तव(व्व)मेव सव्वेण ।
तेण न जिणाण पूया, भवस(विस्स)इ तत्थ तो कुणह ॥४३॥

—भगवन् ! पांचमइ इंद्र महोच्छव छइ । सर्वलोक तहां जासइ । तेह भणी जिन श्रीवीतरागनी पूजा स्नात्रादिक नही हुइ । तेणि कारण लगी छट्ठिइं करउ मया करीनइ ॥४३॥

सूरी पभणइ तत्तो, चलइ कया वि य सुमेरुगिरिचूला ।
न हु पंचमीदिणाओ, पजो(ज्जो)सवणा न(य ?) अइकमे(मइ) ॥४४॥

—तिवारइ आचार्य कहइ; राजन् कदाचित् मेरुनी चूलिका कल्पांत वाय हती चालइ पणि ए पर्युषणा भाद्रवा सुदि पांचम थकी न चालइ । पांचमि अतिक्रमइ लांघइ नही ॥४४॥

भवउ चउत्थीए तो, तित्थुन्नय(इ)कारणं च सूरीहिं
नाउ(ऊ)ण पव्वरायं, कयं चउत्थीदिणे परमं ॥४५॥

—तउ स्वामी पर्वराज चउथइ हुवइ । ए वात सांभली तीर्थोन्नतर जाणी सुगुरे ए पर्व चउत्थीनइ दिनि कीधा ॥ ४५ ॥

( ४ )

भणियं च जओ सुत्ते, आरेणावि कप्पइ ण परओ [?] ।
अह अन्नया स सीसा, सच्छंदा कालभावाओ ॥४६॥

—जेह भणी सूत्रमाहे कहुं अर्वाग् भणी एउ रहउ कल्पइ पणि परहुं न कल्पइ । अन्यदा आचार्य प्रस्तावि स्वशिष्य स्वच्छंदवर्त्ति चालता देखी कालना दोष लगी स्युं कीधउ । ते कहइ ॥४६॥

सिज्जायरगिहवइणो, कहिउ(ऊ)णं सूरिणो गया तुरियं ।
सीसाणुसीसबहुसुयसागरचंदस्स य समीवे ॥४७॥

—पछइ सिज्जातर श्रावकनइ कही आपणपइ शिष्यानुशिष्य सागरचंद्राचार्य समीपि आव्या । ते सूता सूता मूक्या ॥ ४७ ॥

बहु मन्निउ(ऊ)ण तेणं, विजा(ज्जा)मयगव्विएण भो वुढ(ड्ढ) ! ।
पुच्छइ(सु ?) विसमपयं जं, तुम्हाणं वट्टए किंचि ॥४८॥

–पणि तिणइ विद्यामदगर्वित हुंतइ मान–सन्मान न दीधउ । न उलिख्या । न जाण्या आवीनइ कहइ भो वृद्ध ! कांइ विषम पद तम्हारइ हृदय हुवइ ते पूछउ । हुं सविहुंना संदेह भांजउ । पछइ गुरे आचार्ये सगर्व जाणी पूछइ ॥४८॥

तओ विवाओ जाओ, अत्थी नत्थि त्ति धम्मविसओ य ।
तावागया य सीसा, णाओ सो कालगायरिओ ॥४९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



—नास्ति धर्म ए विषयईउ संदेह पूछउ । विवाद हुउ । तिहां वाद करिवउ तेतलइ ते शिष्य आव्या । सविहुं जणे आचार्य जाणा ॥४९॥

**अब्भुट्टेट्टिऊणं तो, सागरचंदो वि लजि(ज्जि)ओ पाए ।**
**पडिओ खमावइ गुरू, विणओ धम्मस्स मूल त्ति ॥५०॥**

—तदनंतर ते कालिकाचार्य जाणी सागरचंदाचार्य लाजउ हुंतउ आसण थकी उठि विनयसहित पगे लागउ । गुरुनइ खमावइ जेह भणी विनय धनु(र्म) मूल ॥५०॥

( ५ )

**अह सोहम्मसुरिंदो, सीमंधर जिणवरिंदवखा(क्खा)णं ।**
**निगो(ग्गो)यवियारमयं, सुणिऊणं पुच्छए भयवं ॥५१॥**

—अथानंतर सौधर्मेन्द्र सीमंधरस्वामीनुं वखाण, निगोदना वखाण तन्मय तत्त्वरूप सांभली भगवंतनइ पूछइ ॥५१॥

**भरहे को वि वियारो, एसो सयलो वि जाणई मज्झं ।**
**संदिसइ भणइ भयवं, तो सुगुरू कालिगायरिओ ॥५२॥**

—भो भगवन् ! ए समस्त विचार भरथक्षेत्रमाहे कोइ जाणइ छइ, किं वा नहीं ? ए वात मुझनइ कहउ । तिवार पछइ भगवन् ! श्रीसीमंधरस्वामि श्रीमुखइ श्रीकालिकाचार्य कहइ जाणइ एह वात सही ॥५२॥

**गंतूण तत्थ पुच्छइ, दियवेसेणं नियाउयं इंदो ।**
**समयबलेणं णाउ(ओ), एसो इंदो न उण मणुओ ॥५३॥**

—पछइ ब्राह्मणनइ वेसि इंद तिहां आवी आपणुं आयु पूछइ । सिद्धांतबलइ आचार्य जाणइ । ऐ इंद्र मनुष्य न हुइ ॥५३॥

**पयडीभूय तओ तं, थुणिउ(ऊ)णं सरसमहुर वि(व?)ग्गूहिं ।**
**काउ(ऊ)ण ठाणदारं, विवरीयं तो गओ इंदो ॥५४॥**

—श्री इंद्र जाण्या पछइ प्रगट हुई । ते आचार्य श्रीकालिकसूरिनइ सरस मधुर वचन स्तवी । उपाश्रयद्वार विपरीत करी आपणइ ठाम पहुता इंद ॥५४॥

**सासणकयप्पहावो, समए संलेहिउ(ऊ)ण अप्पाणं ।**
**संपतो(त्तो) सुरलोयं, गुणनिलओ कालगायरिओ ॥५५॥**

—इम जिणसासणमाहि प्रभावक सिरोमणि समस्त सूरिना गुणनउ निधान समय प्रस्तावि आपणउ आत्मा संलेखणा करी सूरलोक पहुता श्रीकालिकाचार्य ॥५५॥

**अप्परुइसीसहेउं, कयं कहाणयमिणं [हु] समासेणं ।**
**सिरिजिणसमुद्दसुहगुरुसुसीसकल्लाणतिलएण ॥५६॥**

—ए बालावबोध समास भणीइ संक्षेपइं । अल्परुचि महात्मा महासतीनइ हेतु कीधउ । श्रीजिनचंद्रसूरि पट्टपूर्वाचलसहस्रकरावतार श्रीजिनसमुद्रसूरि सुहगुरु तेहनइ शिष्य वाणारीस कल्लाणतिलकगणिइ । एतलइ ए कथा परिपूर्ण वखाणी । थिवरनइ अधिकार । तिहां विवेकीआ श्रावक दान सील तप भावनाइ करो आपणी लक्ष्मी सफल करइ । सविहूं माहि भावना हुती प्रभावना गुरुई तउ आज अमको श्रावको श्रावक प्रभावना करी आपणा जन्म जीवितव्य सफल करइ । एवंविध पुण्यप्रमाण चडइ ते देवगुरुना प्रसाद । तेह भणी तेहना प्रसाद लगी श्रीसंघ आचान्द्रार्क जयवंत हुउ ॥ ५६ ॥

इति श्रीकालिकाचार्यकथा बालावबोधः कृतः वा० कल्लाणतिलकगणिभिः ॥ पं. कुसलालिपीकृतम् ; श्रीमरोट्टकोट्टमध्ये ॥
संवत् १६२५ वर्षे श्रावणवदि ११ दिने लिपीकृतम् । मानकुसलवाच्यमानं चिरं जीयात् ॥ शुभं भवतु ॥ श्रीः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# कालिकाचार्यकथा–संस्कृत–गूर्जरविभागः ।

[१३]

श्रीदेवेन्द्रसूरिविरचिता

## कालिकाचार्यकथा ।

( रचनासंवत् १३ शताब्दि )

श्रीवर्द्धमानमानम्य, कालकर्षेः कथां ब्रुवे ।
पञ्चमीतश्चतुर्थ्यां च, यश्चक्रे पर्युषणामहम् ॥१॥
इहैव जम्बूद्वीपश्रीनेत्रे क्षेत्रेऽस्ति भारते ।
धारावासं पुरं यत्र, जनः सर्वोऽपि धार्मिकः॥२॥
तत्रारिकरिसिंहोऽभूद्, वैरिसिंहो नृपोऽस्य तु ।
राज्ञी रूपजिताऽमर्त्यसुन्दरी सुरसुन्दरी ॥३॥
तयोः सर्वगुणाधारः, कुमारः कालकाह्वयः ।
सरस्वत्यनुजा चास्य, प्रज्ञाऽपास्तसरस्वती ॥४॥
क्रीडार्थमन्यदोद्यानं, मित्रपञ्चशतीवृतः ।
हयारूढः कुमारोऽगाज्जयन्त इव नन्दनम् ॥५॥
तत्र दिव्कुमुदानन्दप्रदमिन्दुमिवारकौ ।
गुणाकरगुरुं दृष्ट्वा, ववन्दे निषसाद च ॥६॥
ततः संसारवैराग्यकारिणीं धर्मदेशनाम् ।
श्रुत्वा कुमारश्चारित्रसाम्राज्योत्कण्ठितोऽभवत् ॥७॥
अथो कथञ्चित् पितरौ, मुत्कलाप्य नृपाङ्गभूः ।
स्वस्वमित्रयुतः सूरै(रे)र्व्रतं रत्नमिवाददे ॥८॥
क्रमेणाधीतसिद्धान्तः, कालकर्षिः निजे पदे ।
गुरुणा स्थापितो यस्माद्, गुणगौरवकारणम् ॥९॥
अथ श्रीकालिकाचार्यः, सूर्यवत् सपरिच्छदः ।
भव्याब्जबोधं विदधय्य, ययावुज्जयिनीं पुरीम् ॥१०॥
तत्र लोकचकोरौघान्, देशनामृतदानतः ।
तमो निरस्य सूरीन्दुर्मुदितानुदपादयन ॥११॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



साध्वीयुताऽन्यदा सूरिनिनंसायै सरस्वती ।
पथि व्रजन्ती भूपेन, गर्दभिल्लेन वीक्षिता ॥१२॥
तद्रूपाक्षिप्तचित्तः स दस्रा(शा)स्य इव जानकीम् ।
भ्रात ! मां रक्ष रक्षेति, जल्पन्तीं तामपाहरत् ॥१३॥
तच्छ्रुत्वा चिन्तया चान्तः, सूरिर्भूपसभां ययौ ।
प्रोचे च नृपते ! न्यायपथस्थाः पृथिवीभुजः ॥१४॥
तदेनां लिङ्गिनीं मुञ्च, सन्ति तेऽत्यद्भुताः स्त्रियः ।
इत्युक्तोऽपि धराजानिरजनिष्ट स मौनभाक् ॥१५॥
संघस्यापि वचस्तेन, नामन्यत ततो मुनिः ।
ये संघप्रत्यनीकाद्यास्छेद्यास्ते विषवृक्षवत् ॥१६॥
ध्यात्वेति संधां विदधे, भोः ! भोः ! शृणुत पार्षद ! ।
नृपो मयाऽयमुन्मूल्य, पवनेनेव भूरुहः ॥१७॥
ततो निर्गत्य गच्छस्य, शिक्षां दत्त्वा स्वयं गुरुः ।
विधाय ग्रथिलवेषं, बालकैः परितो वृतः ॥१८॥
यदि गर्दभिल्लो राजा, श्रीप्राज्यं राज्यमस्य वा ।
ततः किमित्यादि जल्पन्, भ्रमति स्म पदे पदे ॥१९॥ युग्मम् ॥
तत् तादृशीं सूर्यवस्थां, प्रेक्ष्यामात्यादिभिर्नृपः ।
विज्ञप्तोऽपि न तद्वाक्यं, मेने प्रत्युत रोषभाक् ॥२०॥
तच्छ्रुत्वा रासभीविद्याबलवान् नापरैर्नृपैः ।
जीयतेऽयमिति ध्यात्वा, शककूलमगान्मुनिः ॥२१॥
तत्र मन्त्रादिकलयाऽऽवर्जितो गुरुपुङ्गवैः ।
शाखिरेकोऽभवच्छुद्धश्राद्धवद् भक्तितत्परः ॥२२॥
अथ शाखिप्रभोः कश्चित्, दूतः शाखिपुरोऽमुचत् ।
यमजिह्वामिव प्राणिप्राणितान्तकरीं क्षुरीम् ॥२३॥
तद् वीक्षतोऽतिविच्छाये, तस्मिन् सूरिर्जगौ सुहृत् ! ।
किं खिन्नः स जगावस्मात्, स्वामी रुष्टो ममोपरि ॥२४॥
सोऽन्येषामपि किं रुष्ट इत्युक्ते सूरिणा शकः ।
आचख्यौ क्षुरिकायां षण्णवत्यङ्को विलोक्यते ॥२५॥
तदन्यपञ्चनवतिशाखिवृन्दे रुरोष सः ।
सूरिः श्रुत्वेति दध्यौ मे, वाञ्छितद्रुफलंगमी ॥२६॥
नीचे(चै)रूचे च मित्रामुं, पृच्छ के ते ततः शकः ।
दूतात् तदाख्या ज्ञात्वा, तं व्यसृज[द्] दानपूर्वकम् ॥२७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सूरिराह सुहृद्यर्थं, मा प्राणत्यागमातनु ।
तानेकत्र मेलयित्वा, चल मालवकं प्रति ॥२८॥
तथाकृते सूरिणा च, तैश्च तन्त्रयुतैः सह ।
शाखिः सिन्धुनदीं तीर्त्वा, सुराष्ट्राराष्ट्रमासदत् ॥२९॥
तदा तत्र जलोत्फाले, वर्षाकाले समागते ।
सैन्यवासान् वितीर्यासौ, मुख्यशाखिरवास्थितः ॥३०॥
तल्लक्ष्मीमसहमान इवायाते फलाकुले ।
शरत्कालेऽवदत् सूरिर्भो ! भोश्चलत वेगतः ॥३१॥
द्रव्याभावात् कथमग्रे, गम्यते तैरितीरिते ।
चूर्णयुत्त्येष्टिकापाकं, रैमयं चकृवान् गुरुः ॥३२॥
ततो हृष्टाः शकप्रष्ठाः, षण्णवत्या विभागकैः ।
स्वर्णमादाय चलिता गताश्चोज्जयिनीं पुरीम् ॥३३॥
ससैन्यो गर्दभिल्लोऽपि, नगर्या निर्ययौ ततः ।
शाखि-भूधवयोर्युद्धं, जातं राम-दशास्यवत् ॥३४॥
राज्ञा शाखिभिया भेजे, फेरुणेव पुरन्दरी ।
ततस्ते शाखयोऽयुध्यन्, गढस्थैः सुभटैः सह ॥३५॥
रणो नाद्येति तैरुक्तः, सूरिः श्यामाष्टमीं जगौ ।
तत् पश्यत कापि खरीं, साधयन्तं नृपाधमम् ॥३६॥
पश्यन्तस्ते तथारूपं, भूपं प्रेक्ष्यावदद् गुरोः ।
सोऽप्याह रासभी शब्दं, विधास्यत्याराधिता सती ॥३७॥
शब्दश्रवाद् विचैतन्यं, सैन्यं सर्वं भविष्यति ।
तद् द्विगव्यूतिपरतो, नयत द्विपदादिकम् ॥३८॥
मत्पार्श्वेऽष्टाधिकशतं, योधानां शब्दवेधिनाम् ।
सज्जीकुरुत तैरप्येवं कृतं सूरिभाषितम् ॥३९॥
यावद् रावकृते खर्या, दूरमुत्पाटितं मुखम् ।
विशिखैः पूरितं तावच्छाखिभिः सूरिशिक्षया ॥४०॥
गतशक्तिस्ततो रुष्टा, रासभी भूपमूर्द्धनि ।
कृत्वा मूत्रं पुरीषं च, ह्रादिनीव तिरोदधे ॥४१॥
इयदेवास्य सामर्थ्यमित्युक्ताः सूरिणा शकाः ।
भङ्क्त्वा पुरीं गर्दभिल्लं, बद्ध्वा निन्युः गुरोः पुरः ॥४२॥
सूरयोऽप्यलपन् पाप !, भवता हठतस्तदा ।
यः समारोपितः साध्वीशीलभङ्गमहीरुहः ॥४३॥
संघवागन्यथाकारिनीरपूरेण चोक्षितः ।
तस्यैष तेऽधुना राज्यापभ्रंशः कुसुमोद्गमः ॥४४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



फलं तु श्वभ्रदुःखादि, भविता स्वीकरोषि चेत् ।
व्रतं तत्पापतो मुक्तिर्भवभ्रमणमन्यथा ॥४५॥ कुलकम् ॥
इत्युक्तो मुनीन्द्रेण, न प्रबुद्धो नृपाधमः ।
शाकेभ्यो मोचितश्चायं, देशान्तरमशिश्रियत् ॥४६॥
आलोचितप्रतिक्रान्ता गुरवो गच्छमाश्रयन् ।
तथा सरस्वतीं साध्वीं, व्रतमग्राहयत् पुनः ॥४७॥
मुख्यशाखिरभूद् राजा, सामन्ता अपरे पुनः
शककूलादमी ऐयुरिति ख्यातिमगुः शकाः ॥४८॥

( २ )

अथ सूर्यवदानं तच्छ्रुत्वा मुदितमानसः ।
भृगुकच्छपुराधीशो, ज्येष्ठजामितनूद्भवः ॥४९॥
बलमित्रनृपो भ्रातृभानुमित्रयुतो गुरून् ।
मन्त्रिणाऽथ विदधे, तत्प्रवेशमहामहम् ॥५०॥ युग्मम् ॥
गुरूणां कुर्वतां व्याख्यां, तत्रान्येद्युर्नृपस्वसुः ।
भानुश्रियोऽङ्गभूर्दीक्षां, बलभानुरुपाददे ॥५१॥
जैनभक्तं नृपं ज्ञात्वा, पुरोधाऽवि(वी)वदन्मुधा ।
सूरिणा विजितः कण्ठीरवेणेव मतङ्गजः ॥५२॥
वन्द्यपादपदाक्रान्तिर्दोषायेति पुरोधसा ।
उक्तोऽन्यदा नृपः स्माह, विसृज्यन्ते कथं अमी ? ॥५३॥
यास्यन्त्येतेऽनेषणयेत्युक्तो विप्रेण भूपतिः ।
ऋजुत्वात् तां व्यधाद् यस्माद्, दुर्जनैः को न वञ्च्यते ॥५४॥
घनागमेऽपि सुघनागमो ज्ञात्वेति सूरिराट्
महाराष्ट्रे प्रतिष्ठानामिधं पुरवरं ययौ ॥५५॥

( ३ )

तत्र सूरीश्वरं सातवाहनोऽवनिवल्लभः ।
संघेन सहितः प्रावेशयदुत्सवपूर्वकम् ॥५६॥
व्याख्यानानन्तरं सूरिं, ससंघः सातवाहनः ।
विज्ञो विज्ञपयामास, श्रीमत्पर्युषणाकृते ॥५७॥
जनानुवृत्त्या मयका, कार्यः स्यात् पञ्चमीदिने ।
इन्द्रोत्सवस्तत् प्रसद्य, षष्ठ्यां पर्युषणां कुरु ॥५८॥
सूरिः प्रोवाच पञ्चाशत्कादेर्जिनवरादयः ।
पुरा पर्युषितास्तद्वद्, गुरवो नस्तथा वयम् ॥५९॥

३२

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अतः पर्युषणापर्व, नातिक्रामति पञ्चमीम् ।
वेलाध्रुवमिवाम्भोधिजलकल्लोलमालिका ॥६०॥
चतुर्थ्यामस्त्विति प्रोक्ते, भूभुजा सूरयोऽभ्यधुः ।
अस्तु प्रोक्तं हि सिद्धान्ते, परिवस्तव्यमारतः ॥६१॥
तदाद्यभूत् पर्युषणा, चतुर्थ्यां पञ्चमीतिथेः ।
महद्भिः स्वीकृतं कृत्यं, सर्वोऽपि ह्यनुमोदते ॥६२॥

( ४ )

शिष्येष्वथाविनीतेषु, गुरुः शय्यातराग्रतः ।
शिक्षामुक्त्वाऽगमच्छिष्यशिष्यसागरसन्निधौ ॥६३॥
स तु विद्यामदान्नोपलक्षितः सागरेन्दुना ।
ऊचे च विषमं कश्चित्, सूत्रार्थं पृच्छ मां जरन् ! ॥६४॥
वृद्धोऽभ्यधान्नमस्कारं, मुक्त्वा नान्यद् वेद्म्यहम् ।
तथापि पृच्छेत्याचार्योदितः स्थविर ऊचिवान् ॥६५॥
वृद्धावस्थोचितं धर्मं, व्याचक्ष्वाथ स सागरः ।
अनित्यताभावनादिधर्ममत्यूर्जितं जगौ ॥६६॥
वृद्धोऽप्याहाध्यक्षमुख्यप्रमाणागोचरत्वतः ।
नैव संभाव्यते धर्मः, शङ्कुकर्णविषाणवत् ॥६७॥
तन्मुधा क्रियते क्लेशो, मूर्खैस्तद्विषये ततः ।
अतः क्षुब्धोऽपि धृष्टत्वमादृत्येत्याह सागरः ॥६८॥
हे वृद्धवर्य ! तत्कार्यसौख्यादेरुपलब्धितः ।
समस्त्येव तरां धर्मः, श्रीतीर्थङ्करभाषितः ॥६९॥
युक्त्यैवं स्थापिते धर्मे, सागरेण ततो गुरुः ।
स्थितवान् मौनमाधाय, माऽसौ जानातु मामिति ॥७०॥
अहो ! साक्षादसौ वृद्धो, मत्पितामहसन्निभः ।
इत्युक्त्वा सागराचार्यो, निजमासनमासदत् ॥७१॥
अथान्तेवासिनो दुष्टाः, प्रातः शय्यातरं गुरुम् ।
पृच्छन्ति स्म ततः कृच्छ्राज्ज्ञातोदन्तास्तमन्वगुः ॥७२॥
सागरेणापि ते दृष्टाः, पृष्टा यावद् विवक्षवः ।
अभूवंस्तावदाजग्मुः, श्रीसूरीन्द्रा बहिर्भुवः ॥७३॥
ततः ससागरैः साधुवृन्दैर्मन्दा(न्दे)क्षितावनैः ।
वन्दिताः क्षामिताः पूज्या अपुनःकरणेन च ॥७४॥
उत्थाप्य वालुकाप्रस्थदृष्टान्तेन यतीश्वरैः ।
बोधितः सागरो विद्यामदमौज्झत् ततः परम् ॥७५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



( ५ )

विदेहेऽन्येद्युरासाद्य, स्वःस्वामी सीमन्धरं जिनम् ।
नन्तुं गतो निगोदानां, व्याख्यानमशृणोद् वृषा ॥७६॥
अपृच्छच्च प्रभो! वर्षे, भारते सांप्रतं हि कः? ।
एवं विचारकृन्नाथ! कालकाचार्यमूचिवान् ॥७७॥
वृद्धब्राह्मणरूपेण, शक्रेणागत्य सूरिराट् ।
पृष्टो निगोदव्याख्यानं, जिनेन्द्रवदचीकथत् ॥७८॥
पुनः शक्रो जगावायुः, कियद् वद मम प्रभो! ।
सूरिरूचे श्रुतज्ञानाब्धेरिन्द्रस्त्वमृभुप्रभुः ॥७९॥
तन्निशम्यात्मनो रूपं, प्रकटीकृत्य भासुरम् ।
कृताञ्जलिर्यतिप्रष्ठं, हृष्टस्तुष्टाव वासवः ॥८०॥
जय प्रवचनाधार!, जय ज्ञानवदग्रणीः ।
जय सीमन्धरजिनस्तुत! श्रीमन्! नमोऽस्तु ते ॥८१॥
इति स्तुत्वाऽन्यतो द्वारं, शय्याया विरचय्य सः ।
देवानामधिपः स्वीयं, देवलोकमशिश्रियत् ॥८२॥
श्रीसूरयोऽपि प्रतिबोधितावनी-
जनाः प्रक्लृप्ताऽनशनाः समाधिना ।
आयुः प्रपाल्य त्रिदशाधिपादिका-
मरप्रबोधार्थमिवाश्रयद् दिवम् ॥८३॥

इति श्रीकालिकाचार्यकथा समाप्ता ॥

पत्तनस्थहेमचन्द्राचार्यज्ञानमन्दिरभाण्डागारस्य डा. नं. १३१ प्र. नं. ३९९८ आदर्शे श्लोकोऽयमधिको दृश्यते—

यावज्जिनमतं यावत्, सुमेरुधरणीधरः ।
तावत् कालकसूरीन्द्रकथेयं भुवि नन्दतात् ॥८४॥

अस्याः प्रतेरेवान्ते पुष्पिकासहितं लिखितमिदम्—

इति श्रीकालिकाचार्यकथा समाप्ता ॥ इयं कथा श्रीकालिकाचार्यस्य देवेन्द्रसूरिणा विरचिता ॥ नक्षत्राक्षतपूरितं० ॥१॥

संवत् १५२५ वर्षे शाके १३९० ज्येष्ठमासे कृष्णपक्षे षष्ठीदिने शुक्रवासरे श्रवणनक्षत्रे ऐन्द्रनामयोगे माण्डव्यपुरवरे सुरत्राणमहंमूदराज्यप्रवर्त्तमाने श्री............... [ अतः परं हरितालप्रयोगेण प्रभ्रष्टान्यक्षराणि ]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

[१४]

श्रीरामभद्रविरचिता

# कालिकाचार्यकथा ।

[ रचनासंवत् १३ शताब्दि ]

जगद्वन्द्यो महानन्दकन्दकन्दलनाम्बुदः ।
दद्यादमन्दमानन्दं, देवः श्रीज्ञातनन्दनः ॥१॥
श्रीजयप्रभसूरिभ्योऽनूचानेभ्यो यथाश्रुतम् ।
यथाऽऽगमेभ्यश्च तथा, वक्ष्ये पर्युषणास्थितिम् ॥२॥
रमाभिरिव रामाभिः, सुरैरिव नरैर्युतम् ।
अस्त्यत्र भारते वर्षे, धरावासाभिधं पुरम् ॥३॥
विक्रान्तवैरिदुर्वारसमराध्वरदीक्षितः ।
वैरिसिंह इति ख्यातस्तत्राऽऽसीत् पृथिवीपतिः ॥४॥
तस्यातिवर्यसौदर्यनिर्जिताऽमरसुन्दरी ।
अभूत् पट्टमहादेवी, विश्रुता सुरसुन्दरी ॥५॥
दानशौण्डः साहसिकः, सांयुगीनः प्रसन्नधीः ।
तदुद्भवोऽभूद् विख्यातः, कुमारः कालकाभिधः ॥६॥
सोऽन्यदा वाहकेलीतः, प्रत्यावृत्तो वनस्थितम् ।
गुणाकराभिधं सूरिमपश्यत् प्रणनाम च ॥७॥
धर्मं तेभ्यः समाकर्ण्य, जातचारित्रधीस्ततः ।
गत्वा गेहं स्वबन्धूंश्च, मोचयित्वा महाग्रहात् ॥८॥
सूरेस्तस्यैव पादान्ते, क्षत्राणां पञ्चभिः शतैः ।
स्वस्वस्रा च सरस्वत्या, युक्तः सोऽथाऽग्रहीद् व्रतम् ॥९॥
गीतार्थोऽधीतसिद्धान्तः, शमी संपन्नसद्गुणः ।
स स्वगच्छाधिपश्चक्रे, श्रीगुणाकरसूरिभिः ॥१०॥
अथाऽसौ कालिकाचार्यः, कुञ्जरः कलभैरिव ।
अनगारैः परीतः स्वैर्विजहार वसुन्धराम् ॥११॥
शासनस्योन्नतिं कुर्वन्, उर्वीं च प्रतिबोधयन् ।
उज्जयिन्यामगाद् वा(बा)ह्योद्याने च समवासरत् ॥१२॥
आगत्याऽऽगत्य पौराश्च, सूरीणामन्तिकेऽन्वहम् ।
शृण्वन्ति देशनां सम्यग्, भववैराग्यदर्शिनीम् ॥१३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्यां पुरि श्रीरम्यायामल्पसत्त्वो जडात्मकः ।
आसीद् गर्दभिलो राजा, राजीविन्यामिव प्लवः ॥१४॥
राजपाट्यां गतोऽन्येद्युः, सतीं साध्वीं सरस्वतीम् ।
अपश्यन् नृपवर्त्मस्थां, च्युतः स नृपवर्त्मतः ॥१५॥
वियोगेन स्मरस्येयं, किं रतिर्व्रतमग्रहीत् ।
व्रतच्छन्नमहो रूपं, विषाऽऽवृतमिवाऽमृतम् ॥१६॥
स्मराऽऽतुरेण तेनति, क्षिप्ता साऽन्तःपुरे निजे ।
हा भ्रातः कालकाचार्य !, रक्षेत्यायाल(त्याक्र ?)पन्(ती ?) मुहुः ॥१७॥
नानोक्तिभिः सूरिभिश्च, भणितस्तां स नामुचत् ।
आसन्नव्यसनच्छन्नमतीनां क्व शुभं मनः ॥१८॥
चतुर्विधेन संघेन, राजपुम्भिश्च नीतिभिः ।
भणितोऽपि मुहुर्यावत्, प्रपेदे न स किञ्चन ॥१९॥
क्रुद्धोऽथ कालिकाचार्यः, क्रीडत्कल्पान्तभीषणः ।
तावत् समक्षं संघस्य, प्रतिज्ञामकरोदिमाम् ॥२०॥
संघस्य प्रत्यनीका ये, गुरूणां घातकाश्च ये ।
तेषां गतिमहं यामि, यद्येमं(नं) नृपपांशनम् ॥२१॥
उन्मूलयामि नो राज्यान्मूलाद् वृक्षमिवोत्थितम् ।
व्रतच्छन्नमपि क्षात्रं, तेजो हि स्फ(स्फु)रति स्फुटम् ॥२२॥
आचार्यश्चिन्तयत्येष, स्वभावात् प्रौढपौरुषः ।
किं पुनः कृतसाहाय्यो, गर्दभ्या विद्ययाऽनिशम् ॥२३॥
उपायैरु(रेवो)त्पाट्योऽसावित्युन्मत्त इवाभवत् ।
प्रलपंश्चाऽभ्रमत् पौरैः, परीतः परितः पुरि ॥२४॥
यदि गर्दभिल्लो राजा, ततो मे किमतः परम् ।
सुनिविष्टा यदि पुरी, ततो मे किमतः पु(प)रम् ॥२५॥
यदि शून्यगृहे स्वापस्ततो मे किमतः परम् ।
भोजनं यदिवा भैक्षं, ततो मे किमतः परम् ॥२६॥
इत्यादि प्रलपन्तं तं, वीक्ष्याऽऽहुः कृपया प्रजाः ।
धिग् भूपं गणभृद् येन, लङ्घितो दुर्दशामिति ॥२७॥
श्रुत्वेति धिक्क्रियां राजा, विज्ञप्तः सचिवैः पुनः ।
कुरु प्रसाद भूपेन्द्र !, विमुञ्चैतां तपस्विनीम् ॥२८॥
निन्दतीह जनोऽतीव दुर्यशश्चान्यराजसु ।
अमुत्र नरकं घोरं, व्रतिनीव्रतभङ्गतः ॥२९॥

३३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सन्त्यन्याः किं न ते देव !, मन्दिरे मदिरेक्षणाः ? ।
यदेवं भावहीनायां, व्रतिन्यां प्रेमनिर्भरः ॥३०॥
रत्यात्मकं भवेत् सौख्यं !, सा च भावात्मका स्फुटम् ।
सुभ्रूषु भावहीनासु, ततः स्यात् कीदृशी रतिः ? ॥३१॥
इत्यादिभिः सामवाक्यैस्तैरुक्तः सचिवैः क्रुधा ।
प्रत्युत प्राज्वलद् भूपः, सर्पिः सिक्तः(क्तं) कृशानुवत् ॥३२॥
ज्ञात्वा चिकित्स्यन्तं सूरिः, सामर्षं निरगात् पुरात् ।
कौबेर्यां शककूलाख्यं, पापकूलं च स क्रमात् ॥३३॥
सामन्तास्तत्र ये केचित्, ते शाखिन इति श्रुताः ।
यः सामन्तपतिः शाखाऽनुशाखी स तु भण्यते ॥३४॥
शाखिनस्तत्र चैकस्य, पार्श्वे तस्थुर्गणाधिपाः ।
आवर्जितश्च तैरेष, मन्त्र-तन्त्रादिभिः परम् ॥३५॥
शाखानुशाखिनो दूत एत्याऽस्मै शाखिनेऽन्यदा ।
समर्प्य प्राभृतं स्थित्वा, क्षणं चागान्निजं पुरम् ॥३६॥
ढौकनालोकनाकृष्णवक्त्रं तं सूरिरालपत् ।
स्वामिप्रसादे ते राजन् !, किमेवं कृष्णता मुखे ॥३७॥
तेनोचे न प्रसादोऽयं, कोपो यस्मै स कुप्यति ।
तस्मै संप्रेषयत्येवमिमां नामाङ्कितां छुरीम् ॥३८॥
दुर्लङ्घ्यशासनः स्वामी, क्रुद्धः केनापि हेतुना ।
अतः स्वाऽऽत्मा मया वध्योऽवश्यं शस्त्रिकयाऽनया ॥३९॥
सूरिणोचे तवैवायं, रुष्टोऽन्यस्यापि वा विभुः ? ।
सोऽब्रवीत् पञ्चनवते रुष्टोऽन्येषां च शाखिनाम् ॥४०॥
दृश्यतेऽत्र यतः षण्णवत्यङ्कः क्षुरिकान्तरे ।
आचार्यं प्राह यद्येवं, तर्ह्याकारय तान् नृपान् ॥४१॥
यानपात्रैः समुत्तीर्य, सिन्धुस्रोतस्विनीं ततः ।
गत्वा सुराष्ट्राविषये, तस्थुः सर्वे यथायथम् ॥४२॥
कृते तेनेति ते सर्वेऽप्याजग्मुस्तत्र शाखिनः ।
सूरीणामुपदेशेन, चेलुश्च सपरिच्छदाः ॥४३॥
ततोऽतीतासु वर्षासु, प्राप्ते शरदि सूरिभिः ।
स्वसमीहितसिद्ध्यर्थं, प्रोक्तास्ते शाखिनोऽन्यदा ॥४४॥
यथाऽपास्तोद्यमाः किं भोः !, यूयं तिष्ठत सांप्रतम् ।
तेऽप्यूचुर्यद् वयं कुर्मः, कृत्यं तन्नः समादिश ॥४५॥
सूरिणाऽभाणि गृह्णीध्वं, पुरीं पुष्पकरण्डिनीम् ।
निर्वाहस्तत्र वो भावी, भूयान् मालवनीवृतिः ॥४६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एतत् कुर्मो वयं किन्तु, पाथेयं निष्ठितं प्रभो ! ।
अत्र भोजनमात्रं तु, जातं तेऽप्यब्रुवन्निति ॥४७॥
कृत्वेष्टिकानामावाहं, हैमं चूर्णेन सूरिभिः ।
प्रोचेऽदः संबलं भूपा गृह्णीध्वं भो ! निजेच्छया ॥४८॥
तदा दायविभागेन, चेलुस्ते हृष्टमानसाः ।
चक्रिणोऽपि वशीकारे, द्रव्यान्नान्यं हि कार्मणम् ॥४९॥
ततो लाटादिकान् देशान्, साधयन्तः क्रमेण ते ।
प्रापुर्मालवसीमान्तं, तुङ्गतुङ्गतुरङ्गमाः ॥५०॥
चरेभ्यस्तच्च विज्ञाय, मालवेन्द्रोऽप्यमर्षणः ।
सर्वौघप्रसारेणोच्चैर्भूपास्तानभ्यषेणयन् ॥५१॥
अन्योऽन्यं दर्शने जाते, द्वयोरप्यथ सैन्ययोः ।
नासीरं वैरिभूसीरं, युयुधे क्रोधदुर्द्धरम् ॥५२॥
अग्रसैन्ये क्षणाद् भग्ने, मालवेन्द्राग्रसेनया ।
ततः सर्वाभिसारेण, डुढौके शाखिनां चमूः ॥५३॥
रणतूर्यैर्वाद्यमानैर्ध्वनद्भिर्युग्मकुम्बुभिः ।
अतिथीकृतकीनाशं, महायुद्धमभूत् ततः ॥५४॥
महामात्रा महामात्रैः, सादिभिः सह सादिनः ।
तूणिनस्तूणिभिः सार्द्धं, रथिका रथिकैः समम् ॥५५॥
अनुलोम-विलोमोत्थैर्मत्स्यैरिव विसारिभिः ।
शूत्कारभैरवैर्विष्वक्व्यापि व्योमसरः शरैः ॥५६॥
जगर्जुर्ननृतुर्नेमुर्ववल्गुः शूरमानिनः ।
नेशुः पेतुः प्रचक्रं दुर्विलेपुश्चातिकातराः ॥५७॥
अन्योऽन्यघट्टनोत्पन्नैरुच्छलद्भिः स्फुलिङ्गकैः ।
निराजनमिवाकार्षुः, शूराणां सितहेतयः ॥५८॥
गुदाभिर्भ्रश्यमानाभिर्नश्यन्तः करिणो बभुः ।
अर्द्धच्छिन्ना नमत्पक्षाः, प्रचलत्पर्वता इव ॥५९॥
वहल्लोहितकुल्याभिर्हुङ्कुर्द्भिः कृत्तमस्तकैः ।
नृत्यमानैः कबन्धैश्च, भीषणं तदहो ! रणम् ॥६०॥
इत्थं युद्धे शकानीकादवन्तीपृथिवीपतेः ।
अभाजि सैन्यं सहसा, मृगारेर्मृगयुथवत् ॥६१॥
कान्दिशीकः स राजाऽपि, नष्ट्वा सज्जितयन्त्रके ।
प्रविश्योज्जयिनीदुर्गे, तस्थौ रन्ध्र इवोरगः ॥६२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आदेशात् तैश्च सूरीणां, शाखिभिर्जितकाशिभिः ।
चतुर्दिक्षु स्वकैः सैन्यैर्गत्वाऽथ रुरुधे पुरीम् ॥६३॥
यन्त्रशस्त्रादिभिस्तत्र, क्रियमाणे रणेऽनिशम् ।
विश्रामो नाभवत् कश्चिदुभयोरपि सैन्ययोः ॥६४॥
अन्यदा शून्यमालोक्य, वप्रं सर्वत्र शाखिभिः ।
किमेतदिति विज्ञप्ता आदिशन्निति सूरयः ॥६५॥
अष्टमीतिथिरद्याऽस्यामवन्तीश उपोषितः ।
सर्वदा गर्दभीं विद्यां, साधयत्येष निश्चितम् ॥६६॥
तद् विलोकयत क्वापि, खरीमट्टालके स्थिताम् ।
विलोकयद्भिर्दृष्टा सा, सूरीणामथ दर्शिता ॥६७॥
सूरिभिर्भणितं भद्रा, एषा मालवभूभुजा ।
समर्थिते मन्त्रजापे, महाशब्दं करिष्यति ॥६८॥
तं श्रोष्यत्यरिसैन्ये, यद् द्विपदं वा चतुष्पदम् ।
तत् सर्वं रक्तमुद्वम्य, पतिष्यत्यवनीतले ॥६९॥
सजीवं सर्वमादाय, द्विपदादि निशामुखे ।
द्विगव्यूतिप्रमाणं तद्, यूयं व्रजत सत्वरम् ॥७०॥
साष्टशतं मे योधानां, ददध्वं शब्दवेधिनाम् ।
तैस्तथेतिकृतं दृष्टप्रत्यये को विसंवदेत् ? ॥७१॥
तथोक्ताः सूरिभिर्योधाः, शब्दार्थं गर्दभी निजम् ।
यदा विकासयत्यास्यं, सर्वैरप्येकहेलया ॥७२॥
तदैवाकृतशब्दाया युष्माभिः शीघ्रवेधिभिः ।
नाराचनिचयैरस्याः, पूरणीयं मुखं क्षणात् ॥७३॥
कृतस्वरायाश्चामुष्या भवन्तोऽपि न किञ्चन ।
अमत्ताः स्थ तद् यूयं, सज्जीकृतशरासनाः ॥७४॥
ततश्च भुंकरणार्थं, व्यात्तं वदनमेतया ।
समं मुक्तैः पृषत्कैस्ते, तूणपूरमपूरयत् ॥७५॥
हतशक्तिः खरीविद्या, साधकस्यैव मस्तके ।
कृत्वा मूत्रं पुरीषं च, दत्वा पादं ययौ क्वचित् ॥७६॥
सूरिभिः शाखिनः प्रोक्ता गृही(ह्णी)ध्वं सांप्रतं पुरीम् ।
एतावदेव सामर्थ्यममुष्याऽऽसीद् गतं च तत् ॥७७॥
प्राकारं खण्डशः कृत्वा, शाखिनः प्राविशन् पुरीम् ।
बध्वा गर्दभिल्लं चामी, सूरेः पादाग्रतोऽक्षिपन् ॥७८॥
सूरयोऽप्यब्रुवन् पाप !; यद्व्रतिन्या[ः] कृतस्त्वया ।
व्रतस्य भङ्गः शुद्धाया यद् वयं च तिरस्कृताः ॥७९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यत् संघोऽत्र भवान् भूम्ना, तथा नीतः पराभवम् ।
तस्य पुष्पमिदं विद्धि, फलं त्वन्यद् भविष्यति ॥८०॥
ततः श्रीकालिकाचार्यवाक्याज्जोवन्नसौ कुधीः ।
दीनवक्त्रः क्षितीशैस्तैर्देशान्निर्वासितः स्वकात् ॥८१॥
तत्र प्राग्जातसंबन्धो, यः शाखी सूरिभिः सह ।
राज्यस्याधिपतिः सोऽभूदपरे मण्डलेश्वराः ॥८२॥
शाककूलात् समायातास्ते शका इत्यतः श्रुताः ।
इत्थं शकक्षितीशानां, वंशोऽभूदत्र मालवे ॥८३॥
सरस्वत्यपि साध्वी सा, शुद्धिमाधाय सूरितः ।
चारित्रस्यानुसन्धानं, शुद्धबुद्धिः पुनर्व्यधात् ॥८४॥
कृत्वा ससन्धां स्वां सन्धामित्थं कालकसूरयः ।
आलोचितप्रतिक्रान्ताः, स्वं गच्छं पर्यपालयन् ॥८५॥

( २ )

इतश्च भृगुकच्छाऽऽख्यं, ख्यातमस्तीह पत्तनम् ।
यामेयौ कालिकाचार्या(कार्या)णां, बुभुजाते तत्र राट्श्रियम् ॥८६॥
बलमित्रो नृपस्तत्र, प्रतापाऽऽक्रान्तभूतलः ।
युवराड् भाणुमित्रश्च, मन्त्री च मतिसागरः ॥८७॥
परकूलाऽऽगतं श्रुत्वा, निजं कालकं मातुलम् ।
ताभ्यां स सचिवोऽप्रैषि, तदाह्वाननहेतवे ॥८८॥
गत्वाऽवन्त्यामवन्तीशमनुज्ञाप्यातिभक्तितः ।
मन्त्रिणा निन्यिरे तेन, सूरयो भृगुपत्तनम् ॥८९॥
प्रबन्धेन पुरे राज्ञा, महताऽथ प्रवेशिताः ।
बोधयन्तो नृपादींश्च, तस्थुर्वर्षा इहैव ते ॥९०॥
अथ देशनया बुद्धो, यामेयो जगतीपतेः ।
कालकाचार्यपादान्ते, बलभानुरभूद् यतिः ॥९१॥
दृष्ट्वा धर्मरतं भूपं, पुरोधा दूनमानसः ।
साधून् निन्दन् नृपस्याग्रे, सूरिभिस्तैरपाकृतः ॥९२॥
अन्धंभविष्णुर्द्वेषेन, कूटकोटिपटुर्बटुः ।
स विप्रतारयामास, रहसीत्यथ भूपतिम् ॥९३॥
यथैते देव ! वः पूज्या निश्चितं मुनयस्ततः ।
यत्र भ्रमन्ति तिष्ठन्ति, तदपि स्थानकं तथा ॥९४॥
तदेते येन मार्गेण, यान्ति वस्तेन गच्छताम् ।
तत्पादातिक्रमोऽवश्यं, महत्यासा(शा)तना भवेत् ॥९५॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सा च दुर्गतिहेतुः स्याद्, विसृज्यन्ताममी अतः ।
राजाऽऽह सत्यमेवैतद्, विसृज्यन्ते कथं पुनः ? ॥९६॥
सौवस्तिकोऽवदद् देव !, कार्यतां परितः पुरे ।
अनेषणां ततश्चैते, यास्यन्ति स्वयमेव हि ॥९७॥
भूपस्यानुमतेस्तेन, पौराणां कथितं यथा ।
इत्थमित्थं दीयमानं, मुनीना(नां) सत्फलप्रदम् ॥९८॥
पक्त्वा पक्त्वा तदर्थं ते, मुनीनां ददते जनाः ।
तत् तादृक् प्रेक्ष्य सूरीणां, मुनयः प्रत्यपादयन् ॥९९॥
उपयोगेन विज्ञाय, नृपाभिप्रायमीदृशम् ।
अथापर्युषिते चैव, निर्ययुः सूरयः पुरात् ॥१००॥
दक्षिणां दिशमाश्रित्य, प्रतिष्ठानपुरं प्रति ।
प्रचेलुर्ज्ञापितं तत्र, न यावद् वयमागताः ॥१०१॥
न हि पर्युषणा कार्या, तावत् संघेन धीमता ।
परमश्रावकस्तत्र, शात[वाहन] भूपतिः ॥१०२॥
तदागमनवृत्तान्ताद्, बर्ही मेघाऽऽगमादिव ।
शातवाहनभूपोऽभूत्, प्रमोदामोदमेदुरः ॥१०३॥

( ३ )

अथ श्रीकालिकाचार्याः, प्र[तिष्ठा]नपुरं ययुः
संघेन सह राजाऽपि, ततः सम्मुखमभ्यगात् ॥१०४॥
रोदस्यां पूर्यमाणायामातोद्यध्वनिना नृपः ।
सूरीन् प्रवेश[याञ्च]क्रे, पुरे ध्वजकुलाकुले ॥१०५॥
ववन्दिरे च चैत्येषु, प्रतिमास्तत्र सूरिभिः ।
अष्टाह्निकास्ततः श्राद्धैस्तेषु प्रारेभिरे क्रमा[त्] ॥१०६॥
भक्त्या संसेव्यमानानां, संघेन क्ष्माभृताऽपि च ।
तत्रस्थानां मुनीन्द्राणामगात् पर्युषणक्षणः ॥१०७॥
तत्र देशे नभस्यस्य, शुद्धायां पञ्चमीतिथौ ।
यात्रा भवति शक्रस्य, राज्ञोक्ताः सूरयस्ततः ॥१०८॥
अत्र पर्युष[णे लोका]नुवृत्त्या वृत्तहा मम ।
भविष्यत्यनुगन्तव्यो, महता विस्तरेण तत् ॥१०९॥
चैत्यपूजाद्यनुष्ठानं, कर्त्तुं न प्रभवाम्यहम् ।
कृत्वा प्रसा[दं च ष]ष्ठ्यां, कुरु पर्युषणं प्रभो ! ॥११०॥
अथाऽऽहुः कालकाचार्या अपि मेरुश्चलत्यहो ! ।
न त्विदं पर्व पञ्चम्या अतिक्रामति यामि[नीम् ] ॥१११॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भूपेनोक्तं चतुर्थ्यां च, स्वामिंस्तर्हि भवत्विदम् ।
आगमस्यानुमानेन, मेनिरे सूरयस्ततः ॥११२॥
हृष्टः प्राह नृपोऽप्येवं, म[यि त्व]नुग्रहः प्रभोः ।
नन्दीश्वरोपवासस्य, पारणान्तःपुरस्य यत् ॥११३॥
प्रतिपत्तिस्तदेतेषां, मुनीनां तु भविष्यति ।
उत्तरपारणं तन्मे, दानं दास्यन्ति वल्लभाः ॥११४॥
प्रतिवर्षं च तत्राह्नि, पूज्यमाना नृपादिभिः ।
दर्शंदर्शं जनोऽप्येवं, साधु साधूनपूजयत् ॥११५॥
तत्र देशे प्रतिष्ठानपुरेऽपि च ततो दिनात् ।
साधुपूजालयो नाम, प्रवृत्तो नव्य उत्सवः ॥११६॥
इत्थं चतुर्थ्यामानिन्ये, पञ्चम्याः पर्व शाश्वतम् ।
कारणात् कालकाचार्यैः, संघेनापि तथाकृतम् ॥११७॥

( ४ )

यथा शिष्यानमी त्यक्त्वा, दुर्विनीता[न्] ययुर्निशि ।
पार्श्वे स्वशिष्यशिष्यस्य, यथा ते चामिलन् मुहुः ॥११८॥

( ५ )

सीमन्धरजिनेन्द्रेण, निगोदाः कथिता यथा ।
शक्रस्याग्रे तथाऽमीभिः, सूरिभिः कथिता यथा ॥११९॥
यथाऽऽयुर्वज्रिणः प्रोक्तं, वृद्धब्राह्मणरूपिणः ।
इत्याद्यशेषमाख्यातं, तथा ज्ञेयं कथान्तरात् ॥१२०॥
इह पर्युषणस्यैव, वृत्तान्तोऽभिदधे मया ।
श्रीमत्कालकसूरीणां, माहात्म्यस्यैकसेवधिः ॥१२१॥
ऐदंयुगीनोऽपीत्थं यः, शासनस्य प्रभावकः ।
आचार्यस्तच्चरित्राणि, पुनन्तु कविकुञ्जरान् ॥१२२॥
वादिश्रीदेवसूरीणां, गच्छव्योमैकभास्करः ।
सैद्धान्तिकशिरोरत्नं, श्रीजयप्रभसूरयः ॥१२३॥
स्वल्पधीरपि तच्छिष्यः, सिद्धसारस्वतः स्वतः ।
रामभद्रः कथामेतां, रचयामास साद्भुताम् ॥१२४॥
स्वभू(र्भू)भुवःस्व(वस्त्र)यं यावत्, पुनाति भगवद्वचः ।
व्याख्यायमाना विबुधैर्जीयात् तावदियं कथा ॥१२५॥

इति श्रीकालिकाचार्यकथा समाप्ता ॥

[ प्रान्ते अन्याक्षरैः प्रशस्तिरियम् ]—

प्राग्वाटवंशे कुमरः, श्रेष्ठी श्रेष्ठक्रियापरः ।
पत्नी शीलूरिति ख्याता, तस्य सौशील्यशालिनी ॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्याभूत् देवलः पुत्रः, पत्नी बील्हणदेव्यसौ ।
तत्पुत्री नायकिर्जज्ञे, तेजःपालश्च तत्सुतः ॥२॥
मोहिनीति प्रिया चास्य, धनपालाभिधः सुतः ।
स्वमातुः श्रेयसे तेन, तेजःपालेन धीमता ॥३॥
गृहीता पर्युषणाख्यकल्पस्यासौ तु पुस्तिका ॥

संवत् ७००२ (?) ना वर्षे आसो सुदि २ दिने रुपै २१ लषामणी हती ॥

[१५]

## श्रीविनयचन्द्रविरचिता

# कालिकसूरि-कथानकम् ।

रचनासंवत् १४ शताब्दि ]

॥ नमः सर्वज्ञाय ॥

उत्पत्ति-विगम-ध्रौव्यत्रिपदीव्याप्तविष्टपम् ।
महेम श्रीमहावीरं, निरस्तवृजिनं जिनम् ॥१॥
अवद्येनापि यः कुर्याज्जैनप्रवचनोन्नतिम् ।
स शुद्ध्यति प्रतिक्रान्तः, सुधीः कालिकसूरिवत् ॥२॥

तथाहि—

क्षेत्रेऽत्रैवास्ति भरते, धरावासाभिधं पुरम् ।
वैरिसिंहो नृपस्तत्र, प्रियाऽस्य सुरसुन्दरी ॥३॥
तयोः सर्वगुणाऽऽधारः, कुमारः कालकाभिधः ।
निर्जितत्रिदशीरूपा, स्वसा वाऽस्य सरस्वती ॥४॥
स यौवने वाहकेल्या, व्यावृत्तोऽथ वनस्थितम् ।
नत्वा गुणाकरं सूरिमश्रौषीद् धर्म्मदेशनाम् ॥५॥
प्रतिबुद्धोऽथ पितरावापृच्छ्य व्रतमग्रहीत् ।
क्षत्रियाणां पञ्चशत्या, सरस्वत्या च संयुतः ॥६॥
गीतार्थो गुरुभिः सोऽथ, स्वगच्छाधिपतिः कृतः ।
तैरेव मुनिभिः सार्द्धं, विजहार वसुन्धराम् ॥७॥

१ °सा चास्य P ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विहरन् काळकाचार्यः, समवासरदन्यदा ।
गर्दभिल्लाधिष्ठिताया उज्जयिन्याः पुरो बहिः ॥८॥
राजपाठ्यां गतोऽन्येद्यू राजाऽपश्यत् सरस्वतीम् ।
साध्वीं साध्वीव्रतां रूपवतीं बाह्यभुवं गताम् ॥९॥[2]
कामार्त्तः सोऽथ तां दृष्ट्वा, साध्वीं स्वान्तःपुरेऽक्षिपत् ।
हा भ्रातः! काळकाचार्य!, रक्ष मामिति वादिनीम् ॥१०॥[3]
सूरिभिः बहु भङ्गीभिस्तथा संघेन मन्त्रिभिः ।
प्रधानैर्भणितोऽप्येष, यावत् तां मुमुचे नहि ॥११॥
तदा संघसमक्षं स, प्रतिज्ञां सूरिरग्रहीत् ।
नोन्मूलयामि चेन्मूलाद्, राज्यादेनं नृपोऽधमम् ॥१२॥
संघादिप्रत्यनीकानां, गतिं प्राप्नोम्यहं तदा ।
गच्छे नियोज्य गीतार्थं, सूरिरेवमचिन्तयत् ॥१३॥
नृपः स्वभावात् प्रौढोऽसौ गर्दभीविद्यया बलम् ।
उच्छेद्यस्तदुपायेनेत्युन्मत्त इव सोऽभ्रमत् ॥१४॥
यदि गर्दभिल्लो राजा, ततोऽपि किमतः परम् ।
यद्वाऽस्यान्तःपुरं रम्यं, ततोऽपि किमतः परम् ॥१५॥
यद्वाऽस्य विषयो रम्यस्ततोऽपि किमतः परम् ।
सुनिविष्टा पुरी यद्वा, ततोऽपि किमतः परम् ॥१६॥
यदि वाजिनः सुवेषस्ततोऽपि किमतः परम् ।
यद्वा भ्रमाम्यहं भैक्षं, ततोऽपि किमतः परम् ॥१७॥
यद्वा सू(शू)न्यगृहे स्वप्नं, ततो[ऽपि] किमतः परम् ।
इत्याद्यलीकं जल्पन्तं, सूरिं दृष्ट्वा जनोऽब्रवीत् ॥१८॥
धिग् भूपं प्रापितः सूरिरीदृशीं येन दुर्दशाम् ।
श्रुत्वा च धिग्(क्) क्रियां राज्ञो, व्यज्ञापि सचिवैः पुनः ॥१९॥
प्रसीद देव! मुञ्चैतां, व्रतिनीं स्नेहवर्जिताम् ।
साध्वीविध्वंसतश्चात्र, दुर्यशोऽमुत्र दुर्गतिः ॥२०॥
नृपः क्रुद्धोऽथ तानूचे, सि(शि)क्षयध्वं पितॄन् निजान् ।
तेऽथ तूष्णीं स्थितास्तच्च, श्रुत्वाऽऽचार्योऽपि निर्ययौ ॥२१॥
यान् प्रतीच्यां शककूलं, कूलं प्राप क्रमात् प्रभुः ।
आवर्ज्जयच्च मन्त्राद्यैस्तत्रैकं शाखिनं नृपम् ॥२२॥
शाखानुशाखी तत्स्वामी, तद्दूतोऽन्येद्युराययौ ।
समर्प्य प्राभृतं चाऽऽगात्, सूरिस्तु नृपमब्रवीत् ॥२३॥

---

२ नास्तीदं नवमपद्यं P प्रतौ । ३ रक्ष मामिति जल्पन्तीं, हा भ्रातः । कालकप्रभो P । ४ तश्चा(स्ता)वद्दु ° D प्रतौ ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वामिप्रसादे कृष्णाऽऽस्यः, किं त्वं राजाऽप्युवाच तम् ।
न प्रसादः किन्तु कोपो, यतो यस्मै स कुप्यति ॥२४॥
नामाङ्कं प्रेषयत्यस्मै, क्षुरीं दुर्लङ्घशासनः ।
मर्त्तव्यं तन्मयाऽवश्यं, क्रुद्धः स्वामी कुतोऽप्यसौ ॥२५॥
रुष्टस्तवैवाचार्योक्ते, प्राह राजाऽन्यशाखिनाम् ।
रुष्टः पञ्चनवत्या यत्, षण्णवत्यङ्किता क्षुरी ॥२६॥
तानप्याहूय सूर्युक्ते, तानाह्वास्त नृपान् नृपः ।
तेऽथाऽऽचार्याऽऽज्ञया चेलुः, सुराष्ट्रराष्ट्रमाययुः ॥२७॥
तत्रातिक्रान्तवर्षास्ते, प्रोक्ताः कालकसूरिभिः ।
किमपास्तोद्यमा यूयं, तेऽप्यूचुः कृत्यमादिश ॥२८॥
सूरिः प्रोवाच गृह्णीध्वं, मालवोज्जयिनीं यतः ।
निर्वाहस्तत्र वो भावी, तेऽवोचन्नास्ति शम्बलम् ॥२९॥
चूर्णेन हेमप्रावाहं, कृत्वा सूरिभिरर्प्पितम् ।
यथेच्छं स्वर्णमादाय, चेलुस्ते मालवान् प्रति ॥३०॥
लाटादिदेशानादाय, जग्मुर्मालवसीमनि ।
तच्च ज्ञात्वा गर्दभिल्लोऽभ्यमित्रीणोऽभवद् बलैः ॥३१॥
घोरे प्रवृत्ते सङ्ग्रामे, द्वयोरप्यथ सैन्ययोः ।
अभाजि शाखिसैन्योघैर्गर्दभिल्लचमूः क्षणात् ॥३२॥
गत्वोपरोधसज्जोऽस्थान्मालवेन्द्रः पुरीं निजाम् ।
वेष्टयित्वा शाखिनोऽपि, तस्थुर्गुर्व्वाज्ञयाऽथ ताम् ॥३३॥
युद्धेऽनिशं जायमाने, शून्ये प्राकार एकदा ।
नृपैः पृष्टा शून्यहेतुमादिशन्निति सूरयः ॥३४॥
अद्याष्टम्यां तिथावेष, विद्यां जपति गर्दभीम् ।
तां पश्यद्भिस्तदादेशात्, तैर्दृष्ट्वाऽऽख्यायि सूरये ॥३५॥
सूरिः प्राहाऽऽस्य जापान्ते, गर्दभी शुं करिष्यति ।
तच्छ्रुत्वाऽरिद्विपादादि, वान्तरक्तं पतेद् भुवि ॥३६॥
द्विक्रोशीप्रमयाध्वं तत्, सर्वामादाय वाहिनीम् ।
योधानां च शतं सार्द्धं, दत्थ मे शब्दवेधिनाम् ॥३७॥
तथैव सर्वं तैश्चक्रे, योधानूचुश्च सूरयः ।
यदैषा स्फारयत्यास्यं, शुं कर्त्तुं भवद्भिस्तदा ॥३८॥
अकृताऽऽरावमेवाशु, पूरणीयं शरात् करैः ।
ततो व्यात्तं तया वक्त्रं, शरैः पूर्णं तदैव तैः ॥३९॥ युग्मम् ॥

५ ॰ मापाकं कृ॰ D। ६ ॰ दिनीषतो ज्ञात्वा ज॰ P। ७ योधमूचु॰ P। ८ ततस्तैर्व्याप्तास्ततत्काले तस्याः पूर्णे मुखं श॰ P।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सा नृपमूर्ध्नि दत्त्वांऽह्रिं, कृत्वा विण्मूत्रमुद्ययौ ।
भङ्क्त्वा गुर्वाज्ञया वप्रं, शाखिनोऽप्यविशन् पुरीम् ॥४०॥
पुरो बद्धं गर्दभिल्लं, तैस्ततः सूरयोऽब्रुवन् ।
व्रतिनीव्रतविध्वंसः, पाप ! - रे ! यत् त्वया कृतः ॥४१॥
यच्चापमानितः संघो, वयं यच्च तिरस्कृताः ।
तत्पा[प]द्रोः पुष्पमेतद्, भावी तु नरकः फलम् ॥४२॥
प्रायश्चित्तं गृहाण त्वमद्याप्यादाय तद् व्रतम् ।
इत्युक्तोऽपि विमनस्को, देशान्निष्कासितः स तैः ॥४३॥
प्रागाश्रितोऽथ यः शाखी, सम्राट् चक्रे स सूरिभिः ।
शककूलाद् यदायातास्तेऽभूदिति शकान्वयः ॥४४॥
इति प्रतिज्ञां निर्वाह्य, यामिं चारोप्य संयमे ।
आलोचितप्रतिक्रान्तः, स्वं गच्छं सूरिराश्रयत् ॥४५॥

( २ )

इतश्च भृगुकच्छे स्तः, कालकार्यस्वसुः सुतौ ।
बलमित्र-भानुमित्रौ, राड्-युवराट्श्रिया श्रितौ ॥४६॥
तावाह्वानाय सूरीणां, प्रैषतुर्मन्त्रिणं निजम् ।
सूरिर्भृगुपुरं निन्ये, तेनाथापृच्छ्य शाखिनम् ॥४७॥
बलमित्रेण विच्छर्दैर्वेशितास्तत्र सूरयः ।
संबुद्धं नृपयामेयं, बलभानुमदीक्षयत् ॥४८॥
राज्ञा भक्त्याऽत्रैव वर्षास्थापितैस्तैः पुरोहितः ।
जिग्ये नृपपुरः साधून्, निन्दन्नैकोपपत्तिभिः ॥४९॥
द्वेषाद् भूपं रहोऽथेति, स विप्रो व्यप्रतारयत् ।
पथाऽप्येते येन पूज्या यान्ति सोऽपि तथैव च ॥५०॥
तत्पदातिक्रमादेषां, महत्याशातना भवेत् ।
राजाऽप्यूचे सत्यमेतद्, विसृज्यन्ते कथं पुनः ॥५१॥
द्विजोऽवदद् देव! पुर्यामाधाकर्माद्यनेषणाम् ।
प्रवर्त्तय ततो नैते, स्थास्यन्ति स्वयमेव हि ॥५२॥
नृपानुमत्या तेनोक्ताः, पौराश्चक्रुस्तथैव ताम् ।
सूरयोऽप्यथ तद् ज्ञात्वा, प्रतिष्ठानपुरं ययौ ॥५३॥

( ३ )

प्रतिष्ठानपुरे शालिवाहनः श्रावको नृपः ।
ज्ञापितस्तैः पर्युषणा, यत् कार्याऽस्माभिरागतैः ॥५४॥

---

१ °नाऽभवत् A ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्ञात्वाऽऽगतानथो सूरीन्, ससंघः पार्थिवोऽभ्यागत् ।
वेशिता विस्तराद् राज्ञा, ते चैत्यानि ववन्दिरे ॥५५॥
शातवाहनराजाऽऽद्यैः, सेव्यमानेषु तेष्वथ ।
क्रमात् पर्युषणा प्राप्ता, राज्ञोक्ताः सूरयस्ततः ॥५६॥
नभस्यशुद्धपञ्चम्या, शक्रयात्रा भवत्यतः ।
शक्रोऽनुगम्यो लोकानुवृत्त्या भावी मयाऽपि तत् ॥५७॥
विस्तराच्चैत्यपूजादि, कर्त्तुं नात्र प्रपार्यते ।
पर्युषणास्तु तत् षष्ठ्यामित्युक्ते सूरयोऽब्रुवन् ॥५८॥
सूर्योऽप्युदेत्यपरस्यां, मेरुचूला चलत्यपि ।
न तु पर्युषणा राजन् ! लङ्घते पञ्चमीनिशाम् ॥५९॥
चतुर्थ्यामस्तु राज्ञोचे, श्रीसंघानुज्ञया ततः ।
पर्युषणां चतुर्थ्यां ते, चक्रुः कालकसूरयः ॥६०॥
पूर्णिमास्याश्चतुर्दश्यां, चतुर्मासान्यथाययुः ।
पाक्षिकाणि चतुर्दश्यां, पुराऽप्यासन् यदूचिरे ॥६१॥
तं पक्खियचउद्दसीए, महानिसीहे दसासुयक्खन्धे ।
भणियं चउद्दसीए, समराइच्चे फुडं चेव ॥६२॥
राजानुग्रहोऽयं मे, नन्दीश्वरतपःकृताम् ।
राज्ञीनां पारणे भावि, यत् साधूत्तरपारणम् ॥६३॥
तत्राह्नि चानुवर्षं यत्, पूज्यन्ते साधवो जनैः ।
तत्र देशे प्रवृत्तस्तत्, साधुपूजालयोत्सवः ॥६४॥

( ४ )

अथ कर्म्मवशाज्जातान्, शिष्यानुल्लण्ठचेष्टितान् ।
ज्ञात्वा तेषु च सुप्तेषु, शज्जे(य्ये)शं सूरयोऽब्रुवन् ॥६५॥
पौत्रसागरचन्द्राऽऽख्यसूरिपार्श्वे व्रजाम्यहम् ।
निर्बन्धाः शिष्यपृच्छायां, त्वं तान् निर्भर्त्स्य साधयेः ॥६६॥
इत्युक्त्वा ते ययुस्तत्र, वृद्धः कोऽपीत्यवज्ञया ।
अनभ्युत्थाय व्याख्यान्ते, प्रशिष्येणेति जल्पिताः ॥६७॥
कीदृग् ममाऽऽर्य ! व्याख्यानं, भव्यं चेत्याह सूरिराट् ।
किञ्चित् पृच्छेति तेनोक्ते, प्रपच्छाऽनित्यतां विभुः ॥६८॥
सागरः प्राह नो धर्म्मं, विना किञ्चिदिह स्थिरम् ।
धीमतां तत् स एवाऽर्हं इत्युक्ते गुरवोऽब्रुवन् ॥६९॥
नास्ति धर्मोऽध्यक्ष[ः?] मानातीतत्वाच्छशशृङ्गवत् ।
तदभावे नानुमानात्, तदलम्भत चिकीर्षया ॥७०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सागरः प्राह प्रत्यक्षौ, धर्माधर्मौ स्त एव यत् ।
सन्त्येकेऽत्रैव सम्राजस्तद्भृत्याश्चापरे नराः ॥७१॥
इतश्च पश्चाद् दुःशिष्यैः, पृष्टः शय्यातरोऽवदत् ।
गुर्वाज्ञां भो! स्वयं लुप्त्वा, दुष्टाः! पृच्छत मां तु किम्? ॥७२॥
त्यक्तास्तद्गुरुभिर्यूयं, यात दृष्टिपथान्मम ।
तऽपि भीता क्षमयित्वा, शय्येशं जगदुः पुनः ॥७३॥
दयां कृत्वैकवारं नः, ब्रूहि याताः क सूरयः ।
श्राद्धोऽपि तत्र तान् प्रैषीद्, ज्ञात्वा सम्यगुपस्थितान् ॥७४॥
आगच्छतश्च तान् श्रुत्वा, किमुपैति पितामहः ।
इति हृष्टः प्रशिष्योक्तः, सूरिः स्माहापि मे श्रुतम् ॥७५॥
दृष्ट्वा तानायतः साधूनभ्युत्तस्थौ च सागरः ।
तैरूचे साधुसंघोऽयं, गुरवस्तु पुरागताः ॥७६॥
कालिकार्ये बहिर्भूम्यागतमभ्युत्थितान् मुनीन् ।
ऊचे प्रशिष्यः किमिदं, तेऽप्यूचुर्गुरवो ह्यमी ॥७७॥
क्षमयित्वाऽनुतप्यन्तं, सागरं स्माह सूरिराट् ।
माऽन्वताप्सीर्न ते भावदोषः किन्तु प्रमत्तता ॥७८॥
वालुकाप्रस्थदृष्टान्तादुक्तार्यास्य श्रुतस्मयम् ।
विनीतशिष्यसंवीता विजह्रुः सूरयोऽन्यतः ॥७९॥

( ५ )

अथान्यदा विदेहेषु, श्रीसीमन्धरसन्निधौ ।
निगोदजीवव्याख्यानं, श्रुत्वा शक्रोऽभ्यधादिति ॥८०॥
एवं स्वामिन्! निगोदानां, व्याख्यां किं कोऽपि भारते ।
वेत्तीदानीं जिनोऽथाऽऽख्यत्, कालकार्या विदन्ति ताम् ॥८१॥
आगत्य कौतुकाच्छक्रः, कृत्वा वृद्धद्विजाकृतिम् ।
नत्वाऽप्राक्षीन्निगोदाऽऽख्यां, प्रभुश्चाऽऽह यथातथम् ॥८२॥
संख्यातीताः सन्ति गोला गोलेऽसंख्या निगोदकाः ।
एकैकस्मिन् निगोदेऽथ, सिद्धेभ्योऽनन्तजन्तवः ॥८३॥
इत्यादि सूरिणाऽऽख्याते, पुनः पप्रच्छ वासवः ।
प्रार्थयेऽहं तदाख्याहि, कियदायुर्मम प्रभो! ॥८४॥
सूरिर्ज्ञानोपयुक्तोऽभूद्, यावद् द्वे सागरोपमे ।
इन्द्रस्त्वमिति सूर्युक्ते, शक्रः स्वं रूपमाश्रयत् ॥८५॥

---

१० °थागमम् P ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नत्वा स्तुत्वा च सूरीन्द्रमिन्द्रः स्वं स्थानमभ्यगात् ।
सूरिः स्वायुःपरिमाणं, ज्ञात्वा संलेखनां व्यधात् ॥८६॥
इति श्रीकालकाचार्याः, कृत्वा प्रवचनोन्नतिम् ।
यथाऽऽयुः पालयित्वा तेऽनशनेन दिवं ययुः ॥८७॥
श्रीरत्नसिंहसूरीणामन्तेवासी कथामिमाम् ।
चक्रे विनयचन्द्राऽऽख्य[:], संक्षिप्तरुचिहेतवे ॥८८॥
यो गर्दभिल्लं जगदेकमल्लं, समूलमुन्मूलयति स्म राज्यात् ।
आनीतवान् पर्युख(ष)णाऽऽख्यपर्व, दिने चतुर्थ्यां स गुरु[:] श्रिये वः ॥८९॥+

इति श्रीकालिकसूरिकथानकम् ॥

D आदर्शे प्रान्तोल्लेखः—सं. १६१२ वर्षे ॥ श्रीरस्तु ॥
P आदर्शे प्रान्तोल्लेखः—
सं० १३४४[?] वर्षे वैशाखशुदौ अक्षततृतीयायां सोमे पर्युषणाकल्पपुस्तिका लिखिता ।
तस्मिन्नेवादर्शेऽन्याक्षरैर्लिखितमिदम्—

श्रीवर्द्धमानो जु.... सितमूलः पार्श्वादिसद्वृत्तपृथुप्र.... ।
....शाखोन्नतगच्छगुच्छः श्रेयःफलं यच्छतु कल्पवृक्षः ॥
शिवमस्तु श्रीः ॥

## [१६]

## पल्लिवालगच्छीयश्रीमद्देश्वरसूरिविरचिता

# कालिकाचार्यकथा।


पुरोहितिइं राजा प्रसंसा करतु देखीनइं मस्तकि सूल ऊपजवा लागतइ गुरु कन्हलि जई जीवाजीवादिकनु वाद मांडिउ। गुरे वाद करतां निराकरिउ हराविउ। पछइ मनि असूया ईर्ष्याभाव अतिहिं करइ ॥४८॥

कौटिल्यभावेन यतीन् प्रशंसन्, नरेन्द्रचित्तं विपरीतवृत्तम्।
चक्रे पुरोधा गुरुभिः स्वरूपं, ज्ञातं यतिभ्यो यदनेषणीयम् ॥४९॥

पछइ ते पुरोहित कुटिलपणानइं भाविइं हीयइ कूड छतइ महात्मानइं प्रशंसइ। लोकनइ कहइ महात्मानइ भात पाणी असूझतां करावइ। इम करतां गुरे जाणिउं भातपाणी असूझतां हवा लागां ॥४९॥

( ३ )

ते दक्षिणस्यां मरहट्टदेशे, पृथ्वीप्रतिष्ठानपुरेऽथ जग्मुः।
यत्रास्ति राजा किल सातयानः, प्रौढप्रतापी परमार्हतश्च ॥५०॥

श्रीकालिकसूरे भातपाणी असूझ हुतां जाणी विहार कीधु। मरहठदेसमाहि पइठाणपुर पाटणि जिहां सालिवाहन राज्य परम जैन श्रावक राज्य करइ छइ तिहां पुहता ॥५०॥

राज्ञाऽन्यदाऽपृच्छि सभासमक्षं, प्रभो! कदा पर्युषणा विधेया?।
या पञ्चमी भाद्रपदस्य शुक्ले, पक्षे च तस्यां भविता सुपर्व ॥५१॥

एक वार सालिवाहन राजाइं पूछिउं भगवन्! पजूसण कहीइ कीजसिइ? गुरे कहिउं भाद्रवइमासि अजूआलइ पखवाडइ पांचमिइ पजूसण पडिकमवुं कहिउं छइ ॥५१॥

नृपोऽवदत् तत्र महेन्द्रपूजामहो! भवत्यत्र मुनीन्द्र! घस्रे।
मयाऽनुगम्यः स च लोकनीत्या, स्नात्रादिपूजा हि कथं भवित्री? ॥५२॥

राजा सालिवाहन कहवा लागु, भगवन्! आपणइ आणिइं देसि महेन्द्रपूजा पांचमिइं हुइ। लोक सघलु ते पर्व करइ। अनइं मइं ते लोक व्यवहारिइं ते महोत्सव करिवु। पजूसणनइ पवि(र्वि) स्नात्र पूज मालादिक आरात्रिक करवा सूं विघन हुसिइ ॥५२॥

तत् पञ्चमीतः प्रभुणा विधेयं, षष्ठ्यां यथा मे जिननाथपूजा।
प्रभावना-पौषधपालनादि, पुण्यं भवेन्नाथ! तव प्रसादात् ॥५३॥

भगवन्! पसाउ करी पजूसणनूं पांचमि थकुं छट्ठिइं करउ। जिम स्नात्रपूजा प्रभावना पौषध प्रमुख पुण्य करीय कराइं ॥५३॥

राजन्निदं नैव भवेत् *कदाचित्, यत् पञ्चमीरात्रिविपर्ययेण।
ततश्चतुर्थ्यां क्रियतां नृपेण, विज्ञप्तमेवं गुरुणाऽनुमेने ॥५४॥

गुरु कहवा लागा, अहो राजन्! पंचमीनी रात्रि अतिक्रमी गई तु पछइ पजूसण सर्वथा न हुइ। पछइ राइं कहिउं तु पछइ चउथिइं पजूसण करउ। पछइ गुरे ते वात मानी। सिद्धां[त] माहिली वात सांभरी तेह भणी मानिउं ॥५४॥

स्मृत्वेति चित्ते जिनवीरवाक्यं, यत् सातयानो नृपतिश्च भावी।
श्रीकालिकार्यो मुनिपश्च तेन नृपाग्रहेणापि कृतं सुपर्व ॥५५॥

---

१७ शुक्लपक्षे P। * अविचलइ मेरुचूला° इति श्लोकः P आदर्शटिप्पण्याम्।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चितमाहि सिद्धांतनूं वचन किसिउं सांभरिउं ! जं सांभलि [सात]वाहण राजा श्रीकालिकसूरिनइं आग्रहइं पांचमि थकुं चउथइं पजूसण आणिवुं ॥५५॥

यथा चतुर्थ्यां जिनवीरवाक्यात्, संघेन मन्तव्यमहो ! तदेव ।
प्रवर्त्तितं+ पर्युषणाख्यपर्व, यथेयमाज्ञा महती सदैव ॥५६॥

जिम जिन श्रीमहावीरि इम कहिउं छइ सिद्धांतमाहि । श्रीसंघनी अनुमतिइं कालिकसूरिइं पांचमि थकुं पजूसण चउपि(थि)इं करइं तिम आघुं सदाइ सविहुं कुणिहिं मानिवुं । जिननूं वचन एहवुं छइ, तेह भणी आज लगइ चउत्थिइं पजूसण हुइ छइ ॥५६॥

( ४ )

अथान्यदा कालवशेन सर्वान्, प्रमादिनः सूरिवराश्च साधून् ।
त्यक्त्वा गताः स्वर्णमहीपुरस्थानेकाकिनः सागरचन्द्रसूरीन् ॥५७॥

अथ एतलानु अनंतर कालनइं विशेषिइं श्रीकालिकसूरिना परिवारना साधु महात्मा प्रमादीया थिआ । गुरु महात्मानइं सूता मेल्ही स्वर्णपुर नगरि सागरचंद्रसूरि छइ तिहां पुहता । तिहां आव्या एकला सागरचंद्रसूरिइं न ओलख्या । रूप व(प)रावर्त्तपणइं करी । पोसालमाहि डोसु तपोधन एकइं पासइं आवी रहिउ ॥५७॥

तेषां समीपे मुनिपः स तस्थौ, ज्ञातो न केनापि तपोधनेन ।
शय्यातराद् ज्ञातयथार्थवृत्ताः, प्रमादिनस्ते मुनयस्तमीयुः ॥५८॥

तिसिइ पइठाण पुर पाटणि शय्यातर श्रावके महात्मा हाकी करी काढ्या । स्वर्णपुर भणी आव्या । सागरचंद्रसूरे पूछिउं गुरु किहां छइ ? पहि[ला] आव्या तेहे कहिउ । गुरु पाछलि आवइं छइं । सागरचंद्रसूरि साहमा गिआ । पाछिला महात्मा पूछ्या, ते कहइं; "गुरु आगलि पुहता" । सघले कुडउ बोलउ । पछइ सागरचंद्रसूरे पोसालइ आवी ते वृद्धगुरु भणी मानी पगि लागी खमावीनइं समस्त महात्माए खमावी करी गुरु मनाव्या ॥५८॥

( ५ )

जिनेश्वरः पूर्वविदेहवर्त्ती, सीमन्धरो बन्धुरवाग्विलासः ।
निगोदजीवानतिसूक्ष्मकायान्, सभासमक्षं स समादिदेश ॥५९॥

श्रीकालिकसूरि आपणा परिवार सहित पइठाण पुरि पाटणि समाधिइं रह्या छइं । इसिइ समइ सौधर्मेन्द्र महाविदेहि क्षेत्रि श्रीसीमंधरस्वामि कन्हलि बइठा हता । श्रीसीमंधरस्वामि उपदेश देतां धर्मनइ अधिकारि आविइं । विचार करतां निगोद जीवनु विचार आविउ । तिसिइ इंद्रिइं पूछिउं, निगोदनु विचार रूडइं प्रीछवउ । पछइ परमेश्वरि निगोदनु विचार परिपूर्ण कहिउ ॥५९॥

---

+ P आदर्शे टिप्पण्यामेते श्लोका उट्टङ्किताः—श्रीवीरनिर्वृतेर्नवसु वर्षशतेषु अशीत्यां त्रिनवत्या वाऽधिकेषु इयं वाचना जाता, यद्वा पञ्चम्याश्च चतुर्थ्यां पर्युषणा प्रवर्तते, यतः—

तेणूउ य नवसएहि, समइक्कंतेहि वद्धमाणाओ । पज्जुसवणा चउत्थी, काल[ग]सूरीहिं तो ठविया ॥१॥
वीसहि दिणेहि कप्पो, पंचगहाणीइ कप्पठवणाय । नवसयतेणउएहिं, वोच्छिज्जा संघआणाए ॥२॥
सालाहणेण रन्ना, संघाएसेण कारिओ भयवं । पजू(ज्जू)सवणा चउत्थी, चाउम्मासी चउदसीए ॥३॥
च...मासपडिक्कमणं, पक्खियदिवसम्मि चउविहो संगो । नवसयतेणउएहिं, आयरए तं पमाणं तु ॥४॥

इति तीर्थोद्गारादिषु भणनात् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सौधर्मनाथेन सविस्मयेन, पृष्टं, जगन्नाथ ! निगोदजीवान् ।
कोऽप्यस्ति वर्षेऽपि च भारतेऽस्मिन्, यो वेत्ति व्याख्यातुमलं य एवम् ॥६०॥

पछइ इंद्रिइं परमेश्वर कन्हलि पूछिउं, "भगवा(व)न् ! पसाउ करी हवडानइ कालि भरतक्षेत्र माहि तेहवु कोइ आचार्य छइ, जे निगोदनु विचार तम्हारी परिइं कहीनइ प्रीछवइ ?" ॥६०॥

समादिदेश प्रभुरस्ति शक्र !, श्रीकालिकार्यः श्रुतरत्नराशिः ।
श्रुत्वेति शक्रः प्रविधाय रूपं, वृद्धस्य विप्रस्य समाययौ सः ॥६१॥

श्रीसीमंधरस्वामिइं कहिउं, "अहो इन्द्र ! भरतक्षेत्रमाहि श्रीकालिकसूरि श्रुत सिद्धांतनु समू(मु)[द्र], तेणिइं भरिउ पूरिउ छइ ते निगोदनु विचार अम्हारी परिइं कहइ । पछ[इ] इंद्र श्रीसीमंधरस्वामि वा(वां)दीनइ वृद्ध वडउ ब्राह्मनूं रूप करी धूजतु कांपतु हाथि लाकडी एहवुं रूप करी कालिकसूरि कन्हलि आविउ ॥६१॥

विप्रोऽथ पप्रच्छ निगोदजीवान्, सूरीश्वरोऽभाषतताननन्तान् ।
असंख्यगोलाश्च भवन्ति तेषु, निगोदसंख्या गतसंख्यरूपाः ॥६२॥

ब्राह्मणिइं श्रीकालिकसूरि कन्हणि(लि) निगोदना जीवानु विचार पूछिउ । श्रीकालिकसूरे कहिउं; "रोमनइ अणीइं असंख्याता गोला इसी संज्ञा कहीइ । तेणिइ एकेकइ गोलइ असंख्याता निगोद कहवाइं । एकेकइ निगोदि अनंता जीव कहवाइं" । इसी परिइं विचार कहिउ ॥६२॥

श्रुत्वेति विप्रो निजमायुरेवं, पप्रच्छ मे शंस कियत्प्रमाणम् ।
अस्तीति सिद्धान्तविलोकनेन, शक्रो भवान् कालिकसूरिराह ॥६३॥

ते निगोदनु विचार सांभल्या पूठिइं ब्राह्मणिइं गुरु कन्हलि पूछिउ; "भगवन् ! हुं वडु थिउ सकउ नही । बेटा बेटी कलत्र परिवार भक्ति न करइं । गाढउ दुखीउ छउ आऊखुंनु पतीइ नही । करउं किसिउ ? । एकवार कहउ हजी मझनइं केतलुं आऊखुं थाकइ ? । एकवार कृपा करी कहउ" । श्रीकालिकसूरि जोवा लागा । जोतां जोतां नव रस केतले संख्या लाभइ । जोतां जोतां पल्योपमे न रहइ । बिहुं सागरोपमि जई रह्या । पछइ कहिउ तउ ब्राह्मण तु न हुइ । तुं सौधर्मेन्द्र ए वातनु निश्चउ जाणिज्यो ॥६३॥

कृत्वा स्वरूपं प्रणिपत्य सूरिं, निवेद्य सीमन्धरसत्प्रशंसाम् ।
उपाश्रयद्वारविपर्ययं च, शक्रो निजं धाम जगाम हृष्टः ॥६४॥

पछइ इन्द्रिइं आपणुं रूप प्रगट कीधुं । महात्मा विहरवा गिआ हुंता, तेणिइ समइ इंद्र आविउ किम जाणीइ ? तेह भणी इन्द्रिइं पोसालनूं बारणुं फेरवीनइं इन्द्र गिउ इन्द्र महात्मा आवता लगइ न रहिउ । एतला कारण महात्मा इन्द्रनूं रूप देखी तपवडइं निआणुं बांधइ । एह कारणइं पोसालनूं बारणुं फेरीनइं गिउ ॥६४॥

श्रीमत्कालिकसूरयश्चिरतरं चारित्रमत्युज्ज्वलं,
संपाल्य प्रतिपद्य चान्त्यसमये भक्तप्रतिज्ञां मुदा ।
शुद्धध्यानविधानलीनमनसः स्वर्गालयं ये गता–
स्ते कल्याणपरम्परां श्रुतधरा यच्छन्तु संघेऽनघे ॥६५॥

इति श्रीकालिकाचार्यकथा समाप्ता । श्रीतपागच्छवृद्धशालायां लिखिता ॥

श्रीकालिक चिरकाल आपणुं चारित्र निरतीचार पाली छेहडइ अणसण लेईनइ, शुद्धनिर्मल ध्यान पंच परमेष्ठिनुं स्मरण करता जीर्णदेह मूंकीनइं स्वर्गि पुहता । ते श्रीकालिकसूरि समस्त श्रीसंघनइं अनेक कल्याण मांगलिकमाला विस्तारउ ॥६५॥

इति श्रीकालिकाचार्यकथा समाप्तः(प्ता) ॥ पं० श्रीहीररत्नगणि ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

[१९]

श्रीजिनदेवसूरिविरचिता

# कालिकसूरिकथा।

[ रचनासंवत् १४ शताब्दि ]

मोहान्धकारप्राग्भारापहाररविमण्डलम् ।
अमानबहुमानेन, वर्द्धमानं नमाम्यहम् ॥१॥
पञ्चमीतश्चतुर्थ्यां यैश्चक्रे पर्युषणामहः ।
तेषां कालकसूरीणां, चरितं किञ्चिदुच्यते ॥२॥
धारावासमिति ख्यातं, पुरं सुरपुरोपमम् ।
तत्राऽभूद् भूपतिर्वैरिसिंहः सिंहपराक्रमः ॥३॥
देव्यस्य सुन्दरी, रूपसंपदा सुरसुन्दरी ।
तयोः कालकनामाऽभूत्, सूनुरन्यूनविक्रमः ॥४॥
सोऽन्यदा बहिरुद्याने, हयान् रमयितुं ययौ ।
सूरिं गुणाकरं तत्र, धर्ममाख्यान्तमैक्षत ॥५॥
तस्यान्तिकमथो गत्वा, धर्मं शुश्राव शुद्धधीः ।
सद्यः संसारवासाच्च, परं वैराग्यमासदत् ॥६॥
पितरौ समनुज्ञाप्य, भटपञ्चशतीयुतः ।
सरस्वत्याऽऽख्यया स्वस्रा, सार्द्धं व्रतमशिश्रियत् ॥७॥
शिक्षां द्विधाऽभ्यस्तवन्तं, श्रुताकूपारपारगम् ।
निवेश्य च निजे पट्टे, स्वर्गातिथिरभूद् गुरुः ॥८॥
क्रमेण कालकाचार्यः, साधुपञ्चशतान्वितः ।
क्ष्मां पुनानः पदन्यासैः, पुरीमुज्जयिनीं ययौ ॥९॥
आरामे समवासार्षीद्, भगवान् सपरिच्छदः ।
तच्चरित्रैः पवित्रैश्च, चित्रीयन्ते स्म नागराः ॥१०॥
गर्दभिल्लो नृपोऽद्राक्षीत्, समायान्तीं बहिर्भुवः ।
अन्यदाऽऽर्यां कृताश्चर्यरूपां सूरेः सहोदरीम् ॥११॥
कामग्रहग्रहीतस्तां, हठादानाय्य पूरुषैः ।
न्यधादधन्यः शुद्धान्ते, सूरिर्विज्ञातवांश्च तत् ॥१२॥
आस्थानं स्वयमागत्य, गुरुः शान्तमनास्ततः ।
तं दुष्टनृपमाचष्ट, सुधामधुरया गिरा ॥१३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वय्यन्यायरते राजन्!, सर्वं स्यादसमञ्जसम् ।
मुञ्चैतां व्रतिनीं तस्मात्, परत्रेह च शर्मणे ॥१४॥
कोमलैर्वचनैरेवं, गुरुणा भणितोऽपि सः ।
प्रधानैर्वार्यमाणोऽपि, मुमोच न तपोधनाम् ॥१५॥
तेजः क्षात्रमिवारूढो, भ्रुकुटीविकटाननः ।
सभायां कालकाचार्यः, प्रतिज्ञामकरोदिमाम् ॥१६॥
श्रीसंघप्रत्यनीकानां, महापातकिनामपि ।
माघवत्यतिथीनां च, नूनं लेप्स्येय पाप्मभिः ॥१७॥
यद्येनमेनसां धामोन्मूलयामि न मूलतः ।
इत्युक्त्वा वचनं गत्वा, गच्छेऽनालोच्य किञ्चन ॥१८॥
उन्मत्तवेषो नगरीं, हिण्डमानो जजल्प सः ।
राज्यं भुङ्क्ते गर्दभिल्लश्चेत् ततः किमतः परम्? ॥१९॥ [त्रिभिर्विशेषकम्]॥
एतस्य कान्तः शुद्धान्तश्चेत् ततः किमतः परम् ।
इति दृष्ट्वा जनः सर्वो, हाहारवमुखोऽब्रवीत् ॥२०॥
धिगेनं नृपतिं यस्य, चेष्टितैः कष्टिताशयः ।
रटन् पिशाचकीवेत्थमाचार्यः पर्यटत्ययम् ॥२१॥
भूयः संभूय सचिवप्रमुखैर्बोधितोऽपि सः ।
विरराम न कामार्तो, व्रतिनीसंग्रहाग्रहात् ॥२२॥
गर्दभीविद्ययाऽजय्यं, तं ज्ञात्वा मेदिनीपतिम् ।
उपायेनोन्मूलयिष्यन्, शाककूलं ययौ गुरुः ॥२३॥
ये स्युस्तत्र च सामन्तास्ते साखय इति स्मृताः ।
तेषां तु नृपतिः साखानुसाखिरिति विश्रुतः ॥२४॥
आचार्यस्तस्थिवांस्तत्र, साखेरेकस्य संनिधौ ।
मन्त्रयन्त्रप्रयोगाद्यैस्तं चात्यन्तमरञ्जयत् ॥२५॥
अथान्यदा सुखासीने, साखौ तत्र स्वपर्षदि ।
दूतः साखानुसाखीयः, समागत्यार्पयच्छुरीम् ॥२६॥
छुरिकां तां समालोक्य, साखिः श्याममुखोऽजनि ।
सूरिणा भणितश्चायं, केयं भो! विपरीतता ॥२७॥
अनुग्रहे विभोर्यस्मादायाते हृष्यतेतराम् ।
तवेक्ष्यते तु वैलक्ष्यं, ततः साखिरदोऽवदत् ॥२८॥
नानुग्रहोऽयं भगवन्! निग्रहः पुनरेष मे ।
यस्मै क्रुध्यति नः स्वामी, तस्मै प्रेषयति छुरीम् ॥२९॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तां क्षिप्त्वा क्षुरिकां कक्षौ, मर्त्तव्यं तेन निश्चितम् ।
सोऽन्यथा सकलस्यापि, कुटुम्बस्य क्षयं सृजेत् ॥३०॥
स्वर्थाभिमुख्यमालोक्य, सूरिरुच्छ्वसिताशयः ।
साखिमाचष्ट तं रुष्टः, किं तवैवोपरि प्रभुः? ॥३१॥
कुपितोऽयमुतान्यस्मायपि कस्मैचिदुच्यताम् ।
स पुनः षण्णवत्यङ्कं, दृष्ट्वा छुर्यामुवाच गाम् ॥३२॥
मद्विधानां षण्णवतेरुपरि क्रुद्धवानयम् ।
ततस्तैरपि मर्त्तव्यं, मद्वच्छरणवर्जितः ॥३३॥
जगौ सगौरवं सूरिर्न मर्त्तव्यं मुधैव भो! ।
नीत्वा हिन्दुकदेशं वः, प्राज्यराज्यं ददाम्यहम् ॥३४॥
दूतान्नामानि विज्ञाय, तान् सर्वानपि सत्वरम् ।
समाकारय युष्माकं, सिन्धुतीरेऽस्तु सङ्गमः ॥३५॥
प्रमाणमादेश इति, व्याहृत्य शाकपुङ्गवः ।
व्यधत्त तत् तथैवाशु, जीविताशा हि दुस्त्यजा ॥३६॥
विज्ञातपरमार्थास्ते, सर्वे सबलवाहनाः ।
संभूय साखयः सद्यः, सिन्धुतीरे समागमन् ॥३७॥
आचार्यदर्शितपथः, साखी यः सोऽपि सत्वरम् ।
प्रयाणैरनवच्छिन्नैरुपसिन्धु समासदत् ॥३८॥
तेऽथ सिन्धुं समुत्तीर्य, साधयन्तोऽखिलान् नृपान् ।
सुराष्ट्राविषयं प्रापुस्तत्र प्राट्डुपेयुषी ॥३९॥
विभज्य नवधा राष्ट्रं, सुराष्ट्रां तेऽवतस्थिरे ।
वर्षारात्रे व्यतिक्रान्ते, सूरिणा भणितास्ततः ॥४०॥
हंहो! निरुद्यमा यूयं, किमु तिष्ठथ संप्रति ।
अवन्तिदेशं गृह्णीध्वं, पर्याप्तं तत्र भावि वः ॥४१॥
तेऽवोचन् द्रव्यरहिता वयं वर्त्तामहे प्रभो! ।
निर्द्रव्याणां हि जायन्ते, न काश्चित् कार्यसिद्धयः ॥४२॥
हेमीकृत्येष्टकापाकं, युक्त्या तेभ्यो ददौ गुरुः ।
तेऽपि संभृत्य सामग्रीं, प्रचेलुर्मालवान् प्रति ॥४३॥
तान् निशम्यायतो दर्पाद्, गर्दभिल्लोऽपि संमुखम् ।
आढुढौकेऽथ सम्फेटोऽभूद् द्वयोरपि सैन्ययोः ॥४४॥
शस्त्राशस्त्रि चिरं युद्ध्वा, शाकसैन्येन निर्जितम् ।
अनीकं गर्दभिल्लस्य, यतो धर्मस्ततो जयः ॥४५॥
अवन्तीशः प्रणम्याशु, व्याहृत्य स्वपुरीमगात् ।
कृत्वा रोधकसज्जां तां, तस्थिवानन्तरेव सः ॥४६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथाज्ञया मुनीन्द्रस्य, शकयोधाश्चतुर्दिशम् ।
नगरीं वेष्टयामासुश्चन्द्रलेखां घना इव ॥४७॥
अट्टालकेषु युद्धानि, समभूवन् निरन्तरम् ।
तेऽन्यदाऽऽलोक्य शून्यांस्तान् गुरवेऽकथयन्नथ ॥४८॥
वप्रस्याट्टालकाः शून्याः, कुतोऽद्य भगवन्निति ।
पृष्टस्तैः स्पष्टमाचष्ट, गुरुर्विज्ञातकारणः ॥४९॥
अयं भो! गर्दभीविद्यां, पापात्मा युक्तिपूर्वकम् ।
कृष्णाष्टमी-चतुर्दश्योराराधयति सर्वदा ॥५०॥
सिद्धविद्यश्च भवतामजय्योऽयं भविष्यति ।
तद् गवेषयत क्वापि, वप्रस्योपरि गर्दभीम् ॥५१॥
ते समालोक्य तां प्रोचुः, गुरवे सोऽऽप्यचीकथत् ।
द्विक्रोश्याः परतः सर्वं, सैन्यमेतद् विधीयताम् ॥५२॥
इयं हि रासभी शब्दं, कुरुते देव्यधिष्ठिता ।
तमाकर्ण्य द्विषत्सैन्यं, वान्ताऽसृग् म्रियते ध्रुवम् ॥५३॥
अष्टोत्तरं शतं शब्दवेधिनामिह तिष्ठतु ।
तैः पूरणीयमिषुभिस्तस्या दिध्वनिषोर्मुखम् ॥५४॥
शकाः सूरिसमादिष्टमेतत् सर्वं वितेनिरे ।
तथैव शब्दावसरे, तस्या आस्यमपूरयन् ॥५५॥
सा तु विद्या समाविष्टा, दुर्धियस्तस्य भूपतेः ।
मूर्ध्नि विण्मूत्रमाधाय, पलायामास रासभी ॥५६॥
सूरेरादेशतो वप्रं, भङ्क्त्वा मध्ये प्रविश्य च ।
जीवग्राहं गृहीत्वा तमुपनिन्युर्गुरोः पुरः ॥५७॥
गुरुणा बोध्यमानोऽपि, यदा न प्रत्यबोधि सः ।
प्रदाप्य कर्प्परं हस्ते, देशान्निष्कासितस्ततः ॥५८॥
व्रतान्यारोपयत् सूरिरार्यायाः शुद्धये पुनः ।
प्रायश्चित्तं चरित्वा च, स्वं गणं प्रत्यपालयत् ॥५९॥
मौलिक्यशाखिनृपतिरपरे तस्य सेवकाः ।
इति व्यवस्थया तत्र, राज्यमन्वशिषन् शकाः ॥६०॥
ते श्रीमत्कालकाचार्यपर्युपासनतत्पराः ।
चिरं राज्यानि बुभुजुर्जिनधर्मप्रभावकाः ॥६१॥

( २ )

इतश्चाभूद् भृगुकच्छे, जामेयः कालकप्रभोः ।
बलमित्रनृपो भानुमित्रस्तस्यानुजः पुनः ॥६२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तौ च प्रहित्य स्वामात्यमत्युत्कण्ठावशंवदौ ।
शकराजाननुज्ञाप्य, नयतां स्वपुरे गुरून् ॥६३॥
बलभानुं स्वजामेयं, भानुश्रीकुक्षिसंभवम् ।
प्रव्राज्य प्राहृषं सूरिं, तत्रैवास्थापयन्नृपः ॥६४॥
प्रभावनां विभाव्योच्चैः, पुरोधाः कृतमत्सरः ।
पुराऽपि निर्जितो वादे, रहो राजानमब्रवीत् ॥६५॥
अमी तपोधना यत्र, संचरन्ति महाशयाः ।
तत्र देव! पदन्यासो, युष्माकं नैव युज्यते ॥६६॥
अभक्तिर्जायते ह्येवं, सा च श्रेयःप्रमाथिनी ।
प्रेष्यन्तेऽमी तदन्यत्र, विधाप्यानेषणां पुरे ॥६७॥
एवमस्त्विति राज्ञोक्ते, कारिताऽनेषणा पुरे ।
विलोक्य तां समन्ताच्च, गुरुभ्यः साधवोऽवदन् ॥६८॥
पुरोहितस्य तत् सर्वं, ते विमृश्य विजृम्भितम् ।
अपर्युष्यापि चलिताः, प्रतिष्ठानपुरं प्रति ॥६९॥

( ३ )

शातवाहनराजेन, कृताभिगमनोत्सवाः ।
तस्थुः सुखं पर्युषणापर्व तत्रान्यदाऽऽगमत् ॥७०॥
तान् राजोवाच पञ्चम्यां, देशेऽत्रेन्द्रमहो भवेत् ।
जनानुवृत्त्या गन्तव्यमस्माभिरपि तत्र च ॥७१॥
एवं च चैत्यपूजादेर्व्याघातः संभवेद् विभोः ।
षष्ठ्यां पर्युषणापर्व, तदिदं क्रियतां प्रभो! ॥७२॥
स्वाम्याह राजन्! पर्वेदं, पञ्चमीं नातिवर्त्तते ।
कारणापेक्षया त्वर्वागपि स्यादिति हि श्रुतम् ॥७३॥
चतुर्थ्यामस्तु तर्ह्येतदित्युक्ते भूभुजा प्रभुः ।
मेने तथेति भूपस्तु, मुदितो गृहमागमत् ॥७४॥
तदाद्यभूद् भाद्रशुद्धचतुर्थ्यां किल पर्व तत् ।
चतुर्दशीदिने चातुर्मासिकानि च जज्ञिरे ॥७५॥

( ४ )

अन्यदा कर्मदोषेण, शिष्याः कालकप्रभोः ।
दुर्विनीता अजायन्त, शिक्षाया अप्यगोचराः ॥७६॥
रात्रौ शय्यातरस्योक्त्वा, परमार्थं विमुच्य तान् ।
निद्रागतान् प्रचलिताः, स्वयं कनखलं प्रति ॥७७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वशिष्यरत्नाकराख्यसूरिशिष्यस्य संनिधौ ।
सूरेः सागरचन्द्रस्य, प्रतिबोधितभूपतेः ॥७८॥ [युग्मम्] ॥
क्रमेण तत्र संप्राप्ता न केनाप्युपलक्षिताः ।
उपाश्रयस्यैककोणं, समाश्रित्यावतस्थिरे ॥७९॥
प्रतिक्रम्यैर्यापथिकीमुपविश्य क्षणं स्थिताः ।
अत्रान्तरे सागरेन्दुरनुयुज्य प्रपारितः ॥८०॥
असहिष्णुर्ज्ञानगर्वं, सूरिं प्रति बभाण सः ।
आर्य ! कीदृग् व्याचचक्षे, मया साध्विति तेऽवदन् ॥८१॥
ततः पुनर्मदाध्मातः, सागरेन्दुर्बभाण तम् ।
आर्य ! किञ्चिद् विषमार्थं, परिपृच्छ वदामि ते ॥८२॥
न किञ्चिद् विषमं जाने, धर्मं तद्वार्द्धकोचितम् ।
व्याचक्ष्व मत्पुर इति, प्रोचुः पौत्रं मुनीश्वराः ॥८३॥
अनित्यताभावनाद्यं, धर्ममत्यूर्जितं ततः ।
व्याचक्षाणे सागरेन्दौ, साक्षेपं प्रभुरब्रवीत् ॥८४॥
प्रत्यक्षाद्यगोचरत्वान्नास्ति धर्मः खपुष्पवत् ।
मुधा तद्विषयं क्लेशं, मूढा अनुभवन्त्यमी ॥८५॥
अन्तःक्षुब्धोऽप्यवष्टम्भमालम्ब्योवाच सागरः ।
अस्त्येव धर्मस्तत्कार्यसुखादेरुपलम्भतः ॥८६॥
युक्तिभिः साधिते धर्मे, मौनं कृत्वा स्थिता विभुः ।
तथा शिष्या दुर्विनीताः, सुप्त्वा प्रातरजागरुः ॥८७॥
गुरूनप्रेक्ष्य तेऽपृच्छन्, शय्यातरमसौ पुनः ।
निर्भर्त्स्य वचनैस्तीक्ष्णैः, प्राहिणोत् सूरिसंनिधौ ॥८८॥
क्रमात् ते तत्र संप्राप्ता वार्ता विज्ञाय तन्मुखात् ।
सागरः क्षमयामास, गुरूंस्तैर्मुनिभिः सह ॥८९॥
वालुकापूरितप्रस्थप्रतिरेचनपूर्वकम् ।
पौत्रं तेऽबोधयन्, ज्ञानतारतम्यप्ररूपणात् ॥९०॥

( ५ )

अथ व्याख्यां निगोदानां, श्रुत्वा सीमन्धरप्रभोः ।
शक्रोऽपृच्छद् भरतेऽपि, किमेवं वेत्ति कोऽप्यमून् ॥९१॥
व्याचष्टे भारते मद्वन्निगोदानार्यकालकः ।
इति भाषितवान् वज्रधरं सीमन्धरप्रभुः ॥९२॥
तं वृद्धद्विजरूपेण, गतः शक्रः परीक्षितुम् ।
पृष्ट्वा निगोदानायुश्च, मुदितः स्तुतवानिति ॥९३॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुष्षमारात्रिदीपाय, प्रतीपाय कुतीर्थिनाम् ।
अनर्घ्यगुणरत्नौघरोहणाय नमोऽस्तु ते ॥९४॥
श्रीकालकार्यं प्रणिपत्य शक्रः,
स्वस्यागमं ज्ञापयितुं मुनीनाम् ।
कृत्वाऽन्यथाद्वारमुपाश्रयस्य,
संपूर्णकामस्त्रिदिवं जगाम ॥९५॥
मत्वाऽऽयुरन्तं भगवानपि स्वं,
श्रीकालकार्योऽनशनं विधाय ।
विहाय कायं विधिवद् विधिज्ञ–
स्त्रिविष्टपस्याभरणं बभूव ॥९६॥
श्रीजिनप्रभसूरीन्द्रैः, स्वाङ्कपर्यङ्कलालितः ।
जग्रन्थैतां कथां श्रीमज्जिनदेवमुनीश्वरः ॥९७॥

इति श्रीकालिकसूरिकथानकं समाप्तम् ॥

[२०]

श्रीमाणिक्यसूरिविरचिता

# कालकाचार्यकथा ॥

वन्दारुहरिमन्दारमञ्जरीपिञ्जरक्रमम् ।
श्रीवर्द्धमानमानम्य, वक्ष्ये पर्युषणास्थितिम् ॥१॥
येन पर्युषणापर्व, चतुर्थीवासरे कृतम् ।
श्रीकालिकगुरोस्तस्य, कथ्यते प्रथिता कथा ॥२॥
जम्बूद्वीप इह द्वीपे, क्षेत्रे चात्रैव भारते ।
पुरमस्ति धरावासं, धरामण्डलमण्डनम् ॥३॥
आरामिकमिवाऽऽरामं, पितेव निजसंततिम् ।
वैरिसिंहमहीपालस्तत्र पालयति प्रजाः ॥४॥
रोहिणीव शशाङ्कस्य, व्योमगङ्गेव, वारिधेः ।
शुचिशीलप्रियाऽऽलापा, प्रियाऽऽस्या(स्य) सुरसुन्दरी ॥५॥
कुमारः सुकुमाराङ्गः, कुमार इव विक्रमी ।
कालक्रमेण धर्म्मज्ञः, कालकाऽऽख्यस्तयोरभूत् ॥६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नीरधेरपि गम्भीरो, धीरो मो(मे)रुगिरेरपि ।
सोमादपि महासौम्यः, प्रतापी तपनादपि ॥७॥
उदारस्फारशृङ्गारः, परनारीसहोदरः ।
सत्यवाक् शरणाऽऽयातवज्रपञ्जरसंनिभः ॥८॥ त्रिभिर्विशेषकम् ॥
कुमारोऽन्येद्युरुद्याने, गतः क्रीडाप्रसङ्गतः ।
गुणाकराचार्यगिरं, शुश्राव श्रवणामृतम् ॥९॥
अपारे भवकान्तारे, प्राणिनां भ्रमतां सताम् ।
कर्म्मलाघवतोऽनर्घ्या, जायते मानुषी गतिः ॥१०॥
इन्द्रजालोपमे जीवितव्ये द्रव्ये विनश्वरे ।
मतिर्भवति चारित्रे, केषाञ्चिदपि धीमताम् ॥११॥
एवमादि गुरोवा(र्वा)णीं, तूर्णमाकर्ण्य स व्रतम् ।
सरस्वत्या महासत्या, भगिन्या सममग्रहीत् ॥१२॥
गीतार्थो गुणसंयुक्तः, श्रीगुणाकरसूरिभिः ।
क्रमात् सूरिपद(दे ऽ)स्थापि पापिनामपि बोधकृत् ॥१३॥
तपो निष्कपटं कुर्वन्, भव्यालीं स विबोधयन् ।
विहरन् वसुधापीठे, जगामोज्जयिनीं पुरीम् ॥१४॥
तस्योपवनसंस्थस्य, समायान्ति पुरीजनाः ।
धर्म्मवाणीं रसेनाऽऽर्द्रां, गीर्ति श्रोतुं मृगा इव ॥१५॥
इतश्च दैवयोगेन, तदा साध्वीसमागमः ।
बभूव तत्र जायेत, नान्यथा भवितव्यता ॥१६॥
अन्यदा बहिरुद्याने, साक्षादिव सरस्वतीम् ।
सरस्वतीं सतीं प्रेक्ष्य, कामं कामलिताऽऽशयः ॥१७॥
ममाऽन्तःपुरयोग्येयमित्युक्त्वा मालवेश्वरः ।
गर्दभिल्लनृपो भिल्लसमानोऽशुभकर्मभिः ॥१८॥
दीनां चिल्लीमिव श्येनो, जानकीमिव रावणः ।
तामपाहरदन्यायपथपान्थः स पापधी[ः] ॥१९॥
विह्वला विललापे(पै)वं, सती तेन हृता सती ।
हा वीतरागसर्वज्ञ !, हा दैव ! किं भविष्यति ॥२०॥
हा श्रीगुणाकराचार्य !, हा कालकसहोदर ! ।
हा तात वैरिसिंहाऽऽख्य !, हा मातः सुरसुन्दरि ! ॥२१॥
मदीयं चरणद्रव्यं, हरन्तं पश्यतोहरम् ।
निवारयति सर्वेऽपि, गर्दभिल्लं कुभूपतिम् ॥२२॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हाहारवं तमाकर्ण्य, ज्ञातोदन्तो मुनीश्वरः ।
नरेश्वरमुपागम्य, सम्यग् वाक्यमदोऽवदत् ॥२३॥
आकाशं स्फुटितं चेत् स्यान्नरेन्द्र ! किमु सीव्यते ।
शैत्यं कुतो यदि भवेचन्द्रादङ्गारवर्षणम् ॥२४॥
मलो वा यदि माणिक्ये निर्म्मलत्वं तदा कुतः ।
रक्षा कुतोऽस्ति कौष्माण्डिफलानि वृत्तिरेव चेत् ॥२५॥
तपोवनानि राजेन्द्ररक्षितानि भवन्ति यत् ।
तत् त्वमेव कथं देव!, कुरुषे धर्म्मगर्हितम् ॥२६॥
एवमुक्तस्तु नाऽमुञ्चद्, यावच्चञ्चललोचनाम् ।
गर्दभिल्लोऽपि तल्लुब्धो, ल(लु)ब्धको हरिणीमिव ॥२७॥
सूरिभिः प्रहितः संघस्तावत् तद्बोधहेतवे ।
तेन कामैकदासेन, न सोऽपि गणितस्ततः ॥२८॥
श्रीमत्संघं जिनैर्मान्यं, परिज्ञायावमानितम् ।
निर्ममे निर्ममोऽप्येष, प्रतिज्ञामिति दुस्तराम् ॥२९॥
गर्दभिल्लं कुराजेन्द्रगजेन्द्र इव गर्दभम् ।
राज्यान्नोन्मूलयाम्येनं, चेन्नाहं कालकस्तदा ॥३०॥
श्रूयन्तां लोकपाला दिगधिपतियुता ग्रामयक्षादयश्च,
सामन्ता मन्त्रिणोऽमी घटसुभटभटाः श्रेष्ठिनः सार्थवाहाः ।
लाङ्गुलेनेव वेण्या कपिमिव कुनृपं राज्यतो गर्दभिल्लं,
धृत्वा नोत्पाटयेऽहं स्फुटमिह न तदा कालकाचार्य एषः ॥३१॥
गच्छं विहाय स्वच्छन्दं, भ्रमन्तं विकलाकृतिम् ।
तं वीक्ष्य सचिवा राज्ञः, पुरः प्रोचुरिदं वचः ॥३२॥
निजां खञ्जय मा कीर्तिं, स्वकुलं मा कलङ्कय ।
मा सेवस्वासतां मार्गं, मुञ्च मुञ्च तपश्वि(स्वि)नीम् ॥३३॥
नृपो मेने न तद्वाक्यं, हस्तीवाङ्कुशमुन्मु(न्म)दः ।
मर्यादां लङ्घयन्नब्धिरथवा केन वार्यते ? ॥३४॥
कुतोऽपि ज्ञातवृत्तान्तो, नगरीतो विनिर्गतः ।
क्रमाल्लक्ष्मीलतामूलं, शककूलं मुनिर्गतः ॥३५॥
तत्र सामान्यराजानः, शाखिनः शतशाखिनः ।
तेषां शाखानुशाखीव, चक्रवर्ती प्रकीर्त्यते ॥३६॥
एकस्य सविवेकस्य, समीपे शाखिनः स्थिता[ः] ।
गुरवः सोऽपि तैर्मन्त्रतन्त्रैरावर्जितो नृपः ॥३७॥
शाखानुशाखिनो दूतस्तस्यान्येद्युर्महीभुजः ।
क्षुरिकां ढौकयामास, यमजिह्वामिवापराम् ॥३८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शाखी विषादमापन्नस्तां पश्यन् श्यामलाऽऽननः ।
कपोलन्यस्तहस्तोऽस्थाद्, विहस्तो ध्वस्तसंमद[ः] ॥३९॥
राजाऽऽदिष्टैर्नरैर्दि(र्दि)ष्टे, स्थाने दूते स्थिते सति ।
सूरिः पप्रच्छ ते हर्षस्थाने शोक[ः] कथं नृप ! ॥४०॥
राजोचे मुनिराजेन्द्र !, मम हर्षपदं कुतः ? ।
यतोऽस्मान(कं) पुरस्वामी, रुष्टो दुष्टोऽन्तकादपि ॥४१॥
प्रहेयमात्मनश्छित्वा, शिरः क्षुरिकयाऽनया ।
अन्यथा कुलसंहारो, हा व्याघ्रो हन्त दुस्तटी ॥४२॥
तवैवैकाकिनः किं भो !, कोपाऽऽटोपः प्रभोरभूत् ।
इति पृष्टो मुनीन्द्रेण, जगाद जगतीपतिः ॥४३॥
क्षुरिका षन्न(ण्ण)वत्यङ्केनाङ्कितेयं विलोक्यते ।
मन्ये षन्न(ण्ण)वते राज्ञां, चुकोपोपरि भूपतिः ॥४४॥
गुरुर्जगौ न भेतव्यं, जानीहि नृपतीन् नृप ! ।
तांश्च राजाऽपृच्छत् कुत्र, गन्तव्यं सोऽपि चै(प्यची) कथत् ॥४५॥
भूपो गुरूपदेशेन, तानाहूय स्वदेशतः ।
चलितः सिन्धुमुत्तीर्य, सुराष्ट्रां विषयं ययौ ॥४६॥
विभज्य भूभुजो देशं, ते तस्थुर्जलदानने(ऽऽगमे) ।
स्वरच(द)पि समायाति, न चेलुः संबलं विना ॥४७॥
कलावान् कालिकाचार्यः, पथि पाथेयहेतवे ।
सौवर्णमिष्टिकापाकं, चक्रे चूर्णप्रयोगतः ॥४८॥
दातेव देवतालोके, तत्सदादेशकारिणः ।
अखण्डितप्रयाणैस्ते, ययुर्मालवमण्डलम् ॥४९॥
विज्ञाय गर्दभिल्लोऽपि, परचक्रमुपागतम् ।
प्राचालीदथ युद्धार्थं, संक्रुद्धो गर्वपर्वतः ॥५०॥
शाखिभिः समराऽऽरम्भे, बले भग्ने महाबलैः ।
विवेश मालवेशः स्वं, नगरं कीटिकाऽऽलीवत् ॥५१॥
वेष्टयित्वा जवादुग्रं, वीरवर्गो निरर्गलः ।
शराशरि व्यधाद् युद्धं, प्रति प्रातः परस्परम् ॥५२॥
शाखिसेनाचरा दुर्गं, तं दृष्ट्वा शून्यमन्यदा ।
विस्मयस्मेरवदना गुरवे च न्यवेदयन् ॥५३॥
प्रभुः प्राहाऽष्टमी वाऽद्य, मन्ये साधयतीह तत् ।
प्रबलां गर्दभीविद्यामयमुज्जयिनीपतिः ॥५४॥
रासभीरूपमाधाय, तुष्टा प्रादुर्भविष्यति ।
यः शृणोति स्वरं तस्यास्तस्य मृत्युरसंशयम् ॥५५॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सैन्यमावास्यतां पश्चात्, ततो व्याघुट्य वेगतः ।
अष्टोत्तरशतं योधा मत्पार्श्वे ते तु साऽऽयुधाः ॥५६॥
तै राजभिस्तथा चक्रे, नूनं वक्रेतराऽऽशयैः ।
सप्तमेऽह्न्यभवत् साक्षाद्, गर्दभिल्लस्य गर्दभी ॥५७॥
यदा विकाशयामास, मुखं शब्दाय सा तदा ।
तैः शब्दवेधिभिर्बाणैस्तूणीर इव पूरितम् ॥५८॥
विद्या विधाय विण्मूत्रे, व्योममण्डलमुद्ययौ ।
जीवग्राहं गृहीत्वा ते, योधाः सूरेस्तमार्प्पयन् ॥५९॥
सोऽभाणि सूरिणा, साध्वीशीलरत्नमलिम्लुच ! ।
संघावमानदानाऽऽख्यवृक्षस्यैष सुमोद्गमः ॥६०॥
कुलाङ्गार[१]! दुराचार !, निर्विचार ! विकारवान् ।
भ्रमन्नपारसंसारे, परत्र फलमाप्स्यसि ॥६१॥
पापीयानित्यवध्योऽयं, मुनिस्तं निरवासयत् ।
स्थितिज्ञः स्थापयामास, मूलस्थानेऽथ शाखिनम् ॥६२॥
शेषशाखिक्षितीशेभ्यो, भूमिखण्डान्यखण्डयत् ।
आलोचनां सरस्वत्या ददावानन्दमेदुरः ॥६३॥
शककूलाद् यदायाताः, शकास्ते प्रथितास्ततः ।
जित्वा तान् विक्रमार्कोऽत्राभूत् पुनः शकभूपतिः ॥६४॥
प्रसङ्गादिदमाख्यातं, वत्सरज्ञानहेतवे ।
कथ्यते मूलसंबन्धः, सत्यसंघमहात्मनः ॥६५॥
खड्गधारोपमं धीरो, दान्तः शान्तस्तपोनिधिः ।
चित्रं चरति चारित्रं, वृत्तं वा वेत्ति कः सताम् ॥६६॥

( २ )

इतश्च भृगुकच्छेस्तो(शौ), भागिनेयौ महामुनेः ।
बलमित्र-भानुमित्रा(त्रौ), पृथ्वीनाथौ सहोदरौ ॥६७॥
तयोर्भग्नी च भानुश्रीर्बलभानुस्तदङ्गजः ।
अन्यदा तद्गुरोर्वृत्तं, भृगुकच्छाधिपोऽशृणोत् ॥६८॥
अकुण्ठोत्कण्ठितस्वान्तबलमित्रनृपान्यया(पो ययौ) ।
उज्जयिन्यां प्रयातेन, मतिसागरमन्त्रिणा ॥६९॥
शाखिनं समनुज्ञाप्य, परमादरपूर्वकम् ।
भृगुकच्छमगात् सार्द्धं, सूरिर्भू(भू)रिगुणाऽऽलयः ॥७०॥ [ युग्मम् ]
बलभानु[:] गुरोः पार्श्वे, साग्रहो व्रतमग्रहीत् ।
तदा जनः समस्तोऽपि, जिनधर्मरतोऽजनि ॥७१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निरुत्तरीकृतो वादमिच्छँस्तुच्छमतिः क्षणात् ।
गुरुभिर्गुरुरोषोऽपि, स्वं भक्तमिव दर्शयन् ॥७२॥
पुरोधाः प्राह भूपालं, पूज्यसाधुपदाङ्किते ।
मार्गे न युज्यते गन्तुं, भवेदाशातना यतः ॥७३॥ युग्मम् ॥
ये ध्रुवं ध्रुवपदं गमिनोऽमी, ये जिनाश्च वश(शि)नां परमेशाः ।
आत्मकर्म्मफलभोगभुजस्ते, मादृशाः कथय के परवन्तः ॥७४॥
ईदृक् तद्वाक्यविभ्रान्त[ः], राजाऽऽज्ञामधिगत्य सः ।
अकारयत् पुरे साधुयोग्यां रसवतीं नवाम् ॥७५॥
आधाकर्म्म परिज्ञाय, ततो पर्युषितेऽपि हि ।
सूरयोऽगुर्महाराष्ट्रे, प्रतिष्ठानपुरं वरम् ॥७६॥

( ३ )

जिनपादाब्जरोलम्बसातवाहनभूभुजाः(जा) ।
प्रदत्ते साधवस्तस्थुः, साधुयोग्य उपाश्रये ॥७७॥
अथ पर्युषणापर्वसमये समुपस्थिते ।
गुरून् विज्ञापयामास, सोल्लासं भूमिवासवः ॥७८॥
अस्मिन् देशे च पञ्चम्यामिन्द्रयात्रामहोत्सवः ।
कुर्या पर्युषणापर्व, षष्ठ्यां तु भवदाज्ञया ॥७९॥
बभाषे प्रभुरेवं चेन्मेरोश्चलति चूलिका ।
नातिक्रामति पञ्चम्या रात्रिं पर्युषणा पुनः ॥८०॥
राजाऽवोचच्चतुर्थ्यां तत्, करोमि करुणाऽऽकरः(र!) ।
अवकि(श्यं) पर्युषितव्यं, गुरुणोक्तं भवत्विति ॥८१॥
सर्वसंघानुमत्याऽभूश्चतुर्थीवासरे तदा ।
पर्युषणापर्व सर्वोत्तमं श्रीजिनशासने ॥८२॥

( ४ )

कालान्तरेण दुःशिष्यदुर्विनीत्वदुःखतः ।
एकाकी कालकाचार्यो, निःससार महानिशि ॥८३॥
स्वशिष्याचार्यपट्टाब्जमरालस्य शनैः शनैः ।
व्रजन् सागरचन्द्राऽऽख्यसूरेः स्थानमियाय सः ॥८४॥
स्थविरः कोऽप्यसावेवमवज्ञां नाटयन्नयम् ।
अभ्यागतगुरोश्चक्रे, नाभ्युत्थानादिसत्क्रियाम् ॥८५॥
श्रीकालकगुरोर्मे वा, व्याख्यानं रुचिरं मुनेः(ने!) ।
इति सागरचन्द्रेण, पृष्टः प्रभुरभाषत ॥८६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुधेव स्वादु सद्धर्मरचनं वचन(नं) क ते ।
क कालकगुरोर्वाचो, गताकृति-वयःस्मृतेः ॥८७॥
इतः शय्यातरश्राद्धाद्, गुरुशुद्धिमवाप्यते ।
तत्र जग्मुस्त्वराः शिष्याः, खे द्रुमो दुर(द्रुत?)मानसाः (?) ॥८८॥
परिवारं तमायान्तं, वीक्ष्य सागरसूरयः ।
उत्थातुकामास्तन्मुख्यैर्निषिद्धाः साधुसाधुभिः ॥८९॥
सूरिं नत्वा यथास्थानमासीनेषु महात्मसु ।
बहिर्भूमेः क्षणात् तावत्, कालकाचार्य आययौ ॥९०॥
अभ्युत्थानक्रियापूर्वं, जन्मापूर्वमिवाऽऽदरात् ।
गुरुं गुरुमुदो नेमुर्मुनयो बहुमानतः ॥९१॥
ज्ञात्वा सागरचन्द्रोऽपि, मुनीन्द्रं कालकाभिधम् ।
क्षमयामास सद्भक्तिव्रीडाऽवनतकन्धरः ॥९२॥
वालुकाकणदृष्टान्ताद्, गुणहानिं प्रदर्शयन् ।
प्रबोध्य सागरचन्द्राऽऽख्यं, विजहारान्यतो गुरुः ॥९३॥

( ५ )

सौधर्मेन्द्रोऽन्यदाऽपृच्छत् सीमन्धरजिनेश्वरम् ।
निगोदजीवव्याख्यानं, जिनेनापि निवेदितम् ॥९४॥
पप्रच्छैवं पुनः शक्रो, भगवन्! कोऽपि भारते ।
एवंविधं निगोदानां, व्याख्यानं वेत्ति किं न वा? ॥९५॥
जिनेन्द्रः स्माऽऽह, देवेन्द्र! सांप्रतं कालकाभिधः ।
जानाति जिनधर्मैकधीरो गणधरस्त्विदम् ॥९६॥
जराजर्जरितं विप्ररूपं कृत्वा पुरन्दरः ।
तत्परीक्षार्थमायासीत्, कालकाचार्यसंनिधौ ॥९७॥
तत्प्रश्नतो निगोदानां, व्याख्यानमकरोद् गुरुः ।
विस्मयादथ विप्रोऽयमप्राक्षीदायुरात्मनः ॥९८॥
श्रुतज्ञानोपयोगेन, परिज्ञाय कुशाग्रधीः ।
भवान् भास्वान् सूरेन्द्रेत्र(ष), जगादेति जि(य)तीश्वरः ॥९९॥
तुष्टाव तं स्फुटीभूय, देवराजोऽतिरञ्जितः ।
कलिकालस्तु(ले तु) सर्वज्ञ[:] कालकाचार्य! ते नमः ॥१००॥
तं नत्वाऽऽनम्य सौधर्म्मं, सौधर्म्माधिपतिर्ययौ ।
अन्तेऽनशनमापन्न[:], प्राप सूरिस्त्रिविष्टपम् ॥१०१॥
यो गर्दभिल्लं जगदेकमल्लं, समूलमुन्मूलयति स्म राज्यात् ।
आनीतवान् पर्युषणाऽऽख्यपर्व, दिने चतुर्थ्याः स गुरुः श्रिये वः ॥१०२॥

इति श्रीमाणिक्यसूरिविरचिता कालकाचार्यकथा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

[२१]

श्रीदेवकल्लोलमुनिविरचिता

# कालिकाचार्यकथा।

[ रचनासंवत् १५६६ ]

स्वकीयं गुरुमानम्य, पुनः श्रीश्रुतदेवताम् ।
तयोः प्रसादमासाद्य, कालिकाचार्य(कार्य)कथां ब्रुवे ॥१॥
अस्तीह भारते वर्षे, धारावासं पुरं महत् ।
वापी-कूप-प्रपाऽऽराम-सरोवरविराजितम् ॥२॥
श्रीमदेभ्य-महाराज-समाजसमलङ्कृतः ।
वैरिसिंघो(हो) नृपस्तत्र, वैरिवारनिवारणः ॥३॥
तस्य पत्नी सती रम्भासुन्दरी सुरसुन्दरी ।
सच्चरित्रस्तयो पुत्रः, संजातः कालिकाभिधः ॥४॥
विचाराऽऽचारचतुरः, सुभगो विनयी नयी ।
प्रियंवदो वाऽभिमानी, प्रजापालोऽतिसाहसी ॥५॥
सोऽन्यदा निर्गतो बाह्योद्याने क्रीडितुमादरात् ।
निर्विण्णो(ण्णो)ऽभूदसौ वाह्यतुरङ्गाँस्त्वरमान् नृपः ॥६॥
सहकारतरोर्मूले, निविष्टो राजभूः स्वयम् ।
पश्यन्नितस्ततः स्वैरं, सोऽश्रू(श्रौ)षीन्मधुरध्वनिम् ॥७॥
सेवकं प्रेक्ष(ष्य) विज्ञाय, गत्वा तत्र समुत्सुकः ।
मुनिभिः भविकैः सार्द्धं, ददर्श स गुरुं तदा ॥८॥
स तं प्रदक्षिणीकृत्योपविश्योचितभूतलम् ।
श्रीमद्गुणन्धराऽऽचार्यदेशनामशृणोदिति ॥९॥
असारः सर्वसंसारः, कोऽपि कस्य न वल्लभः ।
पिता माता स्वसा भ्राताऽऽसन् ते ते स्वार्थवल्लभाः ॥१०॥
इत्येतस्य गुरोर्वाचं, श्रुत्वा वैराग्यमाप्तवान् ।
पितृनापृच्छय तत्कालं, कुमारो व्रतमग्रहीत् ॥११॥
कालेन कियता विद्वान्, संजातः कालिको यतिः ।
आर्यैः गुणन्धराचार्यैः, स्वपदे स्थापितो मुदा ॥१२॥
ततः श्रीकालिकाचार्याः, साधु-साध्वी समन्विताः ।
विजहुः(हुः) प्रतिबोधार्थः(र्थं)मुज्जेणीं नगरीं प्रति ॥१३॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गर्दभिल्लो नृपस्तत्र, परस्त्रीरूपलालसः ।
प्रपालयति साम्राज्यं, दुःप्रधर्षः परंदमः ॥१४॥
अन्यदा कालिकाचार्यैः, स्वसारं श्रीसरस्वतीम् ।
राजमार्गेऽभिगच्छन्तीं, गुरुवन्दनहेतवे ॥१५॥
एनामन्तःपुरे शीघ्रं, भो ! भो ! नयति(तु) निर्भयी ।
इत्युक्ते तेन भूपेन, सेवकैस्तैस्तथाकृतम् ॥१६॥
हा भ्रात ! कालिकाचार्य !, रक्ष मां करुणानिधे ! ।
त्वां विनाऽहं कथं तिष्ठे, बाढं विलपतीत्यसौ ॥१७॥
मध्येपुरं जनैरेतत्, श्रुत्वा हाहारवः कृतः ।
सूरिणाऽपीति विज्ञाय, संघश्चाऽऽकारितस्ततः ॥१८॥
स्ववृत्तान्तोऽस्य तैः प्रोक्तः, प्रत्युक्तं श्रावकैरिति ।
तत्रैकशो वयं यामो, राजवेश्मनि सद्गुरो ! ॥१९॥
उपभूपं गतैः श्राद्धैर्विज्ञप्तस्तैर्धराधवः ।
भूपर्नि(नि)र्द्धाटिता बाढं, सूरिपार्श्वे समेऽन्वगुः ॥२०॥
स [त]तः सूरिरुत्थाय, सशिष्यो नृपसद्मनि ।
गत्वा भूपालमाचक्षे, सुधामधुकिरा गिरा ॥२१॥
यदि चन्द्रमसो वह्निः, भानुतश्चेत् तमो भवेत् ।
सीमालोपः समुद्रात् स्यात्, प्रजायास्तर्हि का गतिः ? ॥२२॥
तपोवनानि रक्षन्ति, राजानो ज्ञा(न्या)यमार्ग(र्गि)णः ।
यथा कृषीव(व)ला हर्षात्, स्वक्षेत्राणि प्रयत्नतः ॥२३॥
अतस्त्वं लोकपालोऽसि, देहि साध्वीं कृपां कुरु ।
इत्युक्ते भूपसंकेतात्, पुंभिर्निवा(र्वा)सितो मुनिः ॥२४॥
कोपेन पौषधागारमायातः संघमाह्वयत् ।
प्रतिज्ञां सोऽकरोदेनां, गर्दभिल्लं नृपं यदि ॥२५॥
नोत्खनामि समूलं तं, जगतां पस्पि(श्य)तां सताम् ।
तदा पापात्मनां यामि, गतिं दुस्सहदु[ः]खदाम् ॥२६॥ [ युग्मम् ] ॥
उदित्वे(त्वै)वं ततः सूरि[ः], स्वसामर्थ्योल्वणं वचः ।
परिवारं च वेषं च, संघहस्ते समर्पयत् ॥२७॥
वेषान्तरं विधायाऽथ, तदानीं ग्रथ(ग्रथि)लोऽभवत् ।
एवं वदन् स बभ्राम, महापथचतुष्पथे ॥२८॥
चेद् गर्दभिल्लो भूपालः, समर्थः सर्वदिग्पतिः ।
अहं भिक्षाचरोऽस्म(स्मी)ति, तदा किं 'जातमेव हि ? ॥२९॥
किञ्चिद् विचिन्त्य चित्ते स्वे, नगरान्निगरा(रगा)द् बहिः ।
कियद्भिर्दिवसैर्दूरं, शाककूलं ययौ यतिः ॥३०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्रीडतां बहिरुद्याने, कुमाराः(राणां-बालानां?) शकभूपतेः ।
पपात कन्दुकः कूपे, ततस्ते यञ्जु(जड्डु)राकुलाः ॥३१॥
ज्ञातोदन्तेन तेनैभ्यो, धनुः कृत्वा करे निजे ।
शरं शरेण संयोज्य कर्षितः कन्दुकोऽवटात् ॥३२॥
इत्थंकृत्य समानीय, कुमारेभ्यो ददौ मुनिः ।
तेनेत्थं यत् कृतं तैस्तत्(द्), गत्वा भूपे निवेदितम् ॥३३॥
समाहूयाऽवधूतं तं, सत्कृत्य स्वकभक्तितः ।
स जगौ हर्षपूरेण, किमर्थं त्वमिहागतः ? ॥३४॥
तेनोक्तं मिलनार्थं ते, नापरं कार्यमस्ति मे ।
स मुनिस्तेन भूपेन, स्थापितो निजसंनिधौ ॥३५॥
विद्याकलाकलापेन, प्रस्तावाऽऽपन्नवार्त्तया ।
तं तथा रञ्जयन् सोऽपि, न तिष्ठेत् तं विना यथा ॥३६॥
नृपं चिन्ताकुलं वीक्ष्यान्यदा सूरिरुवाच तम् ।
त्वत्समीपे सनामाङ्का, क्षुरिका पुटिका कथम् ? ॥३७॥
ततस्तमूचे मत्स्वामी, मामित्थं ज्ञापयत्यसौ ।
म्रियस्व क्षुरिकां लात्वा, पीत्वा च पुटिकाविषम् ॥३८॥
चतुर्नवतिभूपानामन्येषामपि मादृशाम् ।
इत्यादेशं प्रदत्तेऽसौ, तेन चिन्ताऽऽतुरोऽस्म्यहम् ॥३९॥
सूरिर्जगाद हे राजन्!, मा चिन्तां कुरु सर्वथा ।
यूयं मिलत सर्वत्र, यथाऽहं वच्मि किञ्चन ॥४०॥
तद्वाक्या[त्] त्वरितं तेन, मिलिताः सकलाः शकाः ।
भो! सर्वथा न भेतव्यमित्युक्त्वे(क्ते)ऽवक् मुनिस्ततः ॥४१॥
लात्वा परिकरं सर्वमिहाऽऽयान्तु समुत्सुकाः ।
सर्वैः संभूय भूयो यद्, गम्यते मालवं प्रति ॥४२॥
इत्थं कृते शकाः सर्वे, समाजग्मुः ससैन्यकाः ।
पुरस्कृत्यावधूतं तं, चेलुस्ते भयविह्वलाः ॥४३॥
अव(वि)च्छिन्नप्रयाणैस्ते, गताः सौराष्ट्रमण्डलम् ।
तदाऽऽजगाम वर्षर्तुः, प्रवासगमनापहः ॥४४॥

स कीदृक्—

मेघा गर्जन्ति गाढं दस(श)दिशि चपलोद्योतते विद्युदेषा,
दृश्येते चन्द्र-सूर्यावहनि न निशि नो भूतलं पूर्णमद्भिः ।
आवासे से(शे)रते ते सुधनिन इतरे बाह्यभूमौ भ्रमन्ते,
वप्तारोऽन्नानि सर्वाण्यपि धरणितलं कृष्य(?) हर्षाद् वपन्ते ॥४५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स हं(ह)सबानसानन्दी, साधूल्लासी सुसस्यकृत् ।
पन्थानः सुगमा ईदृक्, शरत्काळः समागमत् ॥४६॥
परं तेनाऽग्रतो यान्ति, ततः श्रीसूरिणाऽन्यदा ।
दासी पृष्टा सती ब्रूते, तमेवं कालिकं प्रति ॥४७॥
कथमग्रेऽभिगच्छन्ति, यदेषां नास्ति शम्बलम् ।
तदा तेन शकाः पृष्टाः, शंबलाभावमब्रुवन् ॥४८॥
मा कुरुध्वं मनाक् चिन्तामित्युक्त्वा सूरयोऽवदन् ।
ज्ञाप्यतामिष्टिकावाहः, प्रज्वलन्नत्र कुत्रचित् ॥४९॥
तेनेष्टिवाहकस्तर्णं, क्षिप्त्वा स्वर्णमयः कृतः ।
विभज्य दत्वा तत् तेषां, [भग?]तास्ते ततोऽग्रतः ॥५०॥
चतुर्णवतिभूपानामदैन्यं सैन्यमग्रतः ।
गत्वा प्रयाणैस्तैश्च, द्रागवन्तीसंनिधौ स्थितम् ॥५१॥
निर्गच्छति बिलान्नागो, यथा धूमसमाकुलः ।
दुर्गतो निर्गतस्तद्वद्, गर्दभिल्लो नरेश्वरः ॥५२॥
रणः प्रवत्र(र्त)ते घोरः, शक-हिन्दुकसैन्ययोः ।
रणतूर्यादिवाद्योघैः, सुरासुरभयङ्करः ॥५३॥
गोपेनैकेन नीयन्ते, धेनवो वाटके यथा ।
गर्दभिल्लोऽरिसैन्येन, दुर्गे क्षिप्तस्तथा तदा ॥५४॥
दुर्गमावृत्य तेऽप्यस्थुरुभयोर्दलयोरपि ।
रण[ः] संजायते नित्यमन्योऽन्यमतिदारुणः ॥५५॥
अष्टमीदिवसे दुर्गमध्ये ब्रूते न को यदाः(दा) ।
सूरि[ः] पृष्टोऽथ यवनैः, किमेतत् सांप्रतं वद ॥५६॥
साधयेद् गर्दभीविद्यां, गर्दभिल्लोऽद्य कुत्रचित् ।
सा गर्दभी यदा शब्दं, करिष्यति खरस्वरम् ॥५७॥
ये श्रोष्यन्त्यथ तत् शब्दं, ते भविष्यन्त्यचेतना[ः] ।
भयभ्रान्ता अमी जाता[ः], तत् श्रुत्वा सकलाः शकाः ॥५८॥
भो! गव्यूतिद्विकं पश्चाद्, गत्वा तत्राभितिष्ठत ।
शतमष्टोत्तरं शब्दवेधका मम संनिधौ ॥५९॥
तथाकृते तैरित्येतत्, सू(शू)राः सूरिमुखाः क्रमात् ।
उच्चस्थाने स्थिताः सर्वे, धनुष्यारोप्य मार्गणान् ॥६०॥
एकदेशे गर्दभिल्लं, गर्दभीसहितं च तम् ।
पश्यन्ति तावता साऽपि, शब्दितुं मुखमाट्णोत् ॥६१॥
तावत् स(श)कास्तदास्यं तेऽपूरयन् भस्त्रवत् शरैः ।
ततो नृपमुखे कृत्वा, विड्मूत्रे सा ययौ दिवि ॥६२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अस्याऽभूदियती शक्तिर्दुष्मामाऽत्र भो भटाः! ।
नृपं लात तथा कृत्वा, ते दुर्गे चक्रुरात्मसा[त्] ॥६३॥
भूपं बद्ध्वा प्रणस्य(श्य)न्तं, सूरेः पादतलेऽक्षिपम् ।
सूरिणाऽऽलापितः सोऽथ, पाप! जन्म वृथा तव ॥६४॥
शीलभङ्गस्त्वया साध्व्या[ः], कृतो वृक्षोऽधिरोपितः ।
संघापमानपयसा, श(स)क्तः पुष्फो(ष्पो)द्गमो ह्ययम् ॥६५॥
फलं तु दीर्घसंसारं, लप्स्यसि त्वं न शं(सं)शयः ।
अद्यापि न गतं किञ्चित्, तावकीनं विचिन्तय ॥६६॥
सर्वपापहरीदीक्षां, भज त्वं स्वहितं कुरु ।
स तेन वचसा दूनो, के मिष्टे क्षारजन्तुवत् ॥६७॥
ततो निष्कासितो देशात्, गर्दभिल्लो नराधमः ।
स्वीकृत्यान्यपुर-ग्रामान्, मुख्योऽवन्त्यामभूच्छकः ॥६८॥
शककूलात् समाजग्मुः, कथ्यन्ते तेन ते शकाः ।
गर्दभिल्लान्वये जातो, विक्रमार्को महीपतिः ॥६९॥
शकानुच्छ(च्छि)द्य तरसा, मही येनाऽनृणी कृता ।
पञ्चत्रिंशत् शते वर्षे, गते जातः पुनः शकः ॥७०॥
सोऽपि दाताऽभवद् भूपो, जगतीतलवत्सलः ।
अङ्कितो वत्सरस्तेन, प्रासङ्गिकमिदं वचः ॥७१॥

( २ )

वेषं चाऽऽलोचनां लात्वा, साध्वीं संस्थाप्य संयमे ।
चेलुस्ते साधुभिः सार्द्धं, भृगुकच्छपुरं प्रति ॥७२॥
तत्र राज्यं प्रकुर्वाते, भागिनेयौ नयाधिकौ ।
बलमित्र-भानुमित्रौ, भूपस्यपरभूपती ॥७३॥
तौ सन्मुखं समागत्य, प्रवेश्य स्वपुरान्तरा ।
मधुरां तद्गुरोर्वाचं, सभामापूर्व शृण्वतः ॥७४॥
एतयोर्भगिनीपुत्रो, बलभानुर्विरागवान् ।
संसारासारतां मत्वा, गुरुपार्श्वेऽग्रहीद् व्रतम् ॥७५॥
राजप्रधानपुरुषाः, तं दृष्ट्वा दुर्जनायते ।
स(सं)क्लेशो यत्र जाए(ये)त, तत् स्थानं दूरतस्त्यजेत् ॥७६॥

( ३ )

प्रतस्थुः गुरवस्तस्म(स्मा)त्, प्रतिष्ठानपुरं प्रति ।
कुर्याद् राज्यं नृपस्तत्र, श्रावकः शालिवाहनः ॥७७॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृत्वा प्रवेशं गुरवः, स्थापिता[ः] पौषधालये ।
प्रत्यहं ससमो भूपः, शृणोति गुरुभाषितम् ॥७८॥
सोऽन्यदाऽवददस्माकं, पञ्चम्यां कौमुदीमहः ।
तस्माद् विधीयतामेतं(त)त्, पर्व षष्ठीदिने प्रभो ! ॥७९॥
पश्चिमायामुदेत्यर्कः, शीतो वह्नि[ः] मरुत् स्थिरः ।
कदाचिदेतद् भवति, न कल्पः पञ्चमीं विना ॥८०॥

उक्तं यदागमेऽपीति—

वर्षाकालीनपञ्चाशदि(द्दि)नैर्यातैर्दयोदयैः ।
तदा पर्युषणापर्व, कुरुते ज्ञातनन्दनः ॥८१॥
तस्य गच्छाधिपस्तद्वत्, स्थविराः साधवस्तथा ।
अर्वाक् पर्युषितं युक्तं, सिद्धान्तविधिनाऽधुना ॥८२॥
तच्चतुर्थ्यां पञ्चमीतः, कृतं पर्व जिनोदितम् ।
तदाकर्ण्य हृदा तुष्टो, नृपतिः शालिवाहनः ॥८३॥
तच्चक्रुः कालिकाचार्याः, सर्वसंघेन मानितम् ।
साधुपूजाऽपरं नाम, पर्वणोऽस्य तदाऽभवत् ॥८४॥

( ४ )

गते काले कियत्यस्य, शिष्या जाताः प्रमादिनः ।
कर्मबन्धभयात् शिष्यान्, मुक्त्वा शय्यातरं गताः ॥८५॥
तदग्रे शिष्यवृत्तान्तं, सर्वं प्रोक्त्वा तथा वयम् ।
यास्यामः सागरं सूरिं, शिष्यशिष्यं विचक्षणम् ॥८६॥
जग्मुः सागरसूरीणां, पार्श्वेऽगुस्तदुपाश्रये ।
तद्व्याख्यां शृणुयादेष, साधुसामान्यवेषभाक् ॥८७॥
देशनां स्वां समापय्य, समेत्य गुरुसंनिधौ
जरद्व ! श्रुता मे गी[ः], संदेहं पृच्छहृद्गतम् ॥८८॥
धर्ममर्म स तैः पृष्टो, दातुमुत्तरमक्षमः ।
बाह्ये गत्वा समायामि, दास्ये पश्चात् तवोत्तरम् ॥८९॥
अयं बृहत्तरः सूरि[ः], विद्यते किमु वा मुनिः ।
एवं विचिन्तय(यं)श्चित्ते, सूरिर्यावद् बहिर्गतः ॥९०॥
श्रीकालिकविनेया हि, तावत् ते साधवोऽमिलन् ।
तैरुक्तं स्पष्टमस्माकमपराधेन दूमिता[ः] ॥९१॥
युष्माकं संनिधौ प्राप्ता[ः], सांप्रतं सूरयो न वा ।
इति श्रुत्वाऽभवत् सूरिर्लज्जितश्च स्वचेतसि ॥९२॥ युग्मम् ॥
किं कर्तुमथ युक्तं नो, विमृष्टमिति तत्र तैः ।
ततः संभूय भूयोऽपि, पेतुस्ते गुरुपादयोः ॥९३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षमध्वं कृतमस्माभिरपराधं महत्तमम् ।
वालुकाप्रस्थदृष्टान्तं, जगुस्तेषां पुरोऽथ ते ॥९४॥
गुरूणां वचनं श्रुत्वा, सुधामधुसहोदरम् ।
संयताः सूरिभक्ताश्च, संजातास्ते विशेषतः ॥९५॥

( ५ )

इतश्च श्रीजिनं ब्रूते, विदेहे मघवाऽन्यदा ।
निगोददेशनां श्रुत्वा, सीमन्धरजिनोदिताम् ॥९६॥
विद्यते भरते कोऽपीदृग् निगोदविचारवान् ।
सन्तीति कालिकाचार्या[ः], तदाकर्ण्य मुदं दधौ ॥९७॥
स इन्द्रो विप्ररूपेणाचार्यपार्श्वमुपाययौ ।
पूज्या निगोदजीवानां, विचारः कथ्यतां मम ॥९८॥
जिनोक्तमिव तद्वाक्यं, श्रुत्वा हर्षितमानसः ।
प्रादुःकृत्य स्वकं रूपमपतत् पादयोः गुरोः ॥९९॥
नत्वा गुरुं दिवं गच्छन्, सूरिणा वारितः स च
ज्ञास्यन्ति कथमायान्तं, मच्छिष्यास्त्वां पुरन्दरम् ॥१००॥
अन्यदा तं करिष्यन्ति, मुनयोऽधिकधर्म्मिणः ।
शालाद्वारं परावृत्य, गुरून् नत्वा तिरोदधे ॥१०१॥
संपूर्णः स्वायुषः प्रान्ते, गृहीत्वाऽनशनव्रतम् ।
जग्मुः श्रीकालिकाचार्या, देवलोकं समाधिना ॥१०२॥
श्रीमदूकेशगच्छीयाः, कर्मसागरपाठकाः ।
तच्छिष्यो देवकल्लोलोऽकार्षीत् हर्षात् कथामिमाम् ॥१०३॥
श्रीविक्रमनृपात् षट्षट्पञ्चैकमिति(१५६६) वच्छ(त्स)रे ।
जाता कथेयं मुनिभिर्वाचिता वन्दिता चि(चि)रम् ॥१०४॥

इति श्रीकालिकाचार्यकथा संपूर्णा ॥ शुभं भवतु ॥
कल्याणमस्तु ॥ श(शि)वमस्तु चतुर्विधसंघस्य ॥

A आदर्शे प्रान्तोल्लेखः—

सं. १५७६ वर्षे श्रीबृहद्गच्छे वा० श्रीदेवसागरछात्रबीजा–मेरा–रतनादिसहितेन लिखिता श्रीकालिकाचार्यकथा डभोकग्रामे ॥ श्री ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

[२२]

## अज्ञातसूरिविरचिता

# कालिकाचार्यकथा ॥

॥ ॐ नमः । श्रीजीरापल्लिपार्श्वनाथाय नमः ॥

श्रीवर्द्धमानपदपद्ममरालदेवं, श्रीवर्द्धमानमभिनम्य जिनेन्द्रदेवम् ।
किञ्चित् कथामुभयथा समयार्थभाजां, वक्ष्याम्यहं सुगुरुकालिकसूरिराजाम् ॥१॥
अत्रैव भाति नगरं भरतेऽलकाभं, धारादिवासमिति पुण्यजनाप्तशोभम् ।
श्रीवैरिसिंह इति तत्र नृपः सुरीतिः, सत्याभिधाऽस्य दयिता सुरसुन्दरीति ॥२॥
तन्नन्दनोऽजनि सुकालिकनामधेयः, सन्नन्दनोज्ज्वलकलापटलैरमेयः ।
स क्रीडयन्नुपवनेऽन्यदिने, तुरङ्गं, द्वेधा गुणाकरमवाप गुरुं सरङ्गम् ॥३॥
तद्देशनामृतरसं स रसान्निपीय, संपृच्छ्य सौवपितरौ[1] भवतो निरीय ।
संसेवितो नृपतनूद्भवपञ्चशत्या, रङ्गादुपायत चरित्ररमां विरत्या ॥४॥
पुण्योल्लसन्नवसुवर्णकषाश्मपट्टे, संस्थापितः सुगुरुणा गुरुणाऽऽत्मपट्टे ।
कुर्वन् क्रमेण विविधेव विहारमालां, सूरिः समागमदिमां नगरीं विशालाम् ॥५॥
तत्रैव सूरेरनुजा सरस्वती, समाययौ कर्मगतेर्महासती ।
यान्ती बहिः स्थण्डिलमण्डलेऽन्यदा, साऽलोकि मालव्यमहीभुजा मदात् ॥६॥
हा शासनाधीश्वर ! हा सहोदर !, श्रीकालिकार्येति बहुप्रलापिनी ।
श्येनैरिवोड्डीननवीनमल्लिका, सान्तःपुरेऽक्षेपि नृपेण पूरुषैः ॥७॥
श्रुत्वेति सौवाश्रयशैलगह्वरात्, समेत्य सूरीश्वरकेशरी जवात् ।
तं मत्तमातङ्गमिवोल्लसन्मदं, नृपाधमं प्राह नयद्रुमच्छिदम् ॥८॥
शशी यदि स्याद् विषवृष्टिवादभिर्मेरां विमुञ्चेत स चेदपांनिधिः ।
अन्यायभाजो यदि भूभुजां व्रजास्तिष्ठन्ति जीवन्ति तदा कथं प्रजाः ? ॥९॥
महासतीं मुञ्च कलङ्कपादपं, मा सिञ्च भूपानघवारि निक्षिपन् ।
महेशलङ्केशनरेश्वरादिवन्मा मा भव त्वं भवयुग्मनाशकृत् ॥१०॥
इतीरितं सूरिवचो नियत्याऽगलन्नृपे छिद्रकरेऽम्बुगत्या ।
अभाणि संघस्य तदा मुखेन, संघोऽपि नाऽमानि दुराशयेन ॥११॥
अमानितं संघवचो निशम्य, सर्वाङ्गरम्यः कृतिभिः प्रणम्यः ।
सिद्धान्तसारं मनसाऽधिगम्य, चित्ते गणी चिन्तयति स्म सम्यक् ॥१२॥
ये प्रत्यनीका अनघेऽपि सङ्घे, उड्डा[न?]कोपेक्षकदूषकाश्च ।
तेषां गतिं यामि कुगर्दभिल्लं, राज्यच्युतं चेन्न करोमि भिल्लम् ॥१३॥

---

१ स्वीयपितरौ ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति प्रतिज्ञाय गुरुः प्रदाय, गच्छं च गीतार्थमुनिव्रजाय ।
विधाय वेषं ग्रहिलानुकारमिति ब्रुवाणः पुरि संचचार ॥१४॥
स गर्दभिल्लक्षितिपस्ततः किं, चेद् रम्यमन्तःपुरमस्य तत् किम् ? ।
जनः सुवेषो यदि वाऽस्य तत् किं, भिक्षामटाटये विजने ततः किम् ? ॥१५॥
इत्यादि जल्पन्तमनल्पमालमालं तदा सूरिवरं विलोक्य ।
पौरा नृपावर्णपरा बभूवुरूचुस्तदेत्थं सचिवाश्च भूपम् ॥१६॥
सुरूपरम्यासु नृपाङ्गजासु, प्राणप्रियासु द्युतिभासुरासु ।
साध्वीमिमां कामयसे नु कामं, हृणीयसे किं न धरेश ! नाम ॥१७॥
तदा कृशानुर्हविषेव सिक्तः, कोपारुणो भूमिपतिर्न्ययुङ्क्त ।
रयातयात स्वगृहे प्रदत्त, शिक्षां स्वपित्रोः पुरतोऽभिधत्त ॥१८॥
मत्वा मुनीन्द्रो नृपरायमाना (?), श्रव्यानशेषानिति मन्त्रिणोऽपि ।
चचाल कूले सकनामपूले, जगाम तत्रैकसाहिधाम ॥१९॥
कलाभिरावर्ज्जि समर्जिताभिः, सूरेः सतस्तत्र सुखासिकाभिः ।
निवेदितो द्वारभुजाऽथ दूतः, साहानुसाहेरपरेद्युरागात् ॥२०॥
तेनाग्रतस्तां क्षुरिकां विमुक्तां, कचोलकेनाकलितां विलोक्य ।
स सासहिः सर्वभरस्य चापि, साहिर्मुखे म्लानिमुवाह वेगात् ॥२१॥
पप्रच्छ सूरिः किमतुच्छदुःखखानिर्विलक्षाशय ! लक्ष्यसे त्वम् ? ।
स चक्रवन्नाथ ! रविप्रसादोदये श्रिताः प्रीतिपरा भवन्ति ॥२२॥
साहिर्बभाषे न विभो ! प्रसादः, किन्तु प्रभोः कोपकटुप्रनादः ।
नामाङ्ककचोलकयुक्तशस्त्री, तस्यागता सेवकशीर्षहन्त्री ॥२३॥
तवैकरुष्टोऽन्यतरस्य कस्यापि वा स राजा गुरुणेति पृष्टः ।
स आह मत्पञ्चकयुग्मवत्या, मितेषु भूपेषु स रोषदुष्टः ॥२४॥
श्रीकालिकाचार्यगुरूपदेशाद्, देशाभिजात्ते निखिलक्ष्मेशाः ।
उत्तीर्य सिन्धुं लघु नामसिन्धुं, प्रापुः सुराष्ट्रं सुकृतैकबन्धुम् ॥२५॥
संवीक्ष्य वर्षाः प्रकटप्रकर्षास्ते तत्र वासं विदधुः सहर्षाः ।
घनात्यये तान् निजगाद सूरिः, किं वोऽभियोगा उदयीति भूरिः ॥२६॥
प्रोचेऽथ तैर्नाथ ! न नोऽस्ति शम्बलं, येनापनीपत्ति जनो भृशं बलम् ।
[ततः] सुवर्णीकृतभास्वादिष्टिकास्तेभ्योऽदिता नो गुरुराहितेष्टिकाः ॥२७॥
ततः सुराष्ट्राविषयादशेषाश्रमूर्महीयोमहिमाविशेषाः ।
प्रचेलिवांसो गुरुणा सरेखास्ते लाटदेशान्त उदारवेषाः ॥२८॥
श्रुत्वा यतस्तानथ मालवेशः, स्वदेशसीमाकृतसंनिवेशः ।
तस्थौ स्थिरः सर्वबलैरुपेतः, कृत्वा सकोपं रिपुषु स्वचेतः ॥२९॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुन्तासिबाणप्रमुखस्य युद्धं, सैन्यद्वयस्याप्यजनि [तत् ?] प्रसिद्धम् ।
निजं बलं हीनबलं विमृश्य, विवेश वप्रं नृपतिः कुदृश्यः ॥३०॥
शाले रिपूणां निकरेण रुद्धे, प्रवर्त्तमानेऽथ सदैव युद्धे ।
सूरेः पुरः साहजनो जजल्प, प्रमोदकोट्टो ननु शून्यकल्पः ॥३१॥
आचार्यवर्याः स्वविदाऽवधार्य, प्रोचुस्तदा कार्यमिदं विचार्य ।
अद्याष्टमीमाप्य स गर्दभिल्लो, विद्यां ध्रुवं साधयति स्वमल्लः ॥३२॥
दृष्ट्वा खरीं सहचरीं नृपतेः सुबोधैः, सूरेरभाणि सहसा सह साहियोधैः ।
अष्टोत्तरं भटशतं लघुशब्दवेधि, संस्थाप्य सूरिवचनादितरन्न्यषेधि ॥३३॥
संपूरिते सुचिरुते शरधोरणीभिः, खर्या मुखे रिपुभटैरसुचोरणीभिः ।
विद्धास्य मूर्द्धनि च मूत्रमलं दधाना, दृष्टा न केन कुपिता प्रपलायमाना ॥३४॥
स गर्दभिल्लोऽथ हतप्रभावः, साहिप्रवीरैरशुभस्वभावः ।
निबध्य निन्ये सुगुरोः सकाशे, मलिम्लुचौपम्यधरश्चकाशे ॥३५॥
रे धृष्ट ! दुष्टाधम ! पापनिष्ठ !, निकृष्ट ! संघेन मयाऽवशिष्टः ।
तदा न किं चेतितवानसि त्वं, रेऽद्यापि तत्त्वं शृणु भावतत्त्वम् ॥३६॥
महासतीशीलविघातसङ्गाऽपमानदानद्रुमपुष्पमेतत् ।
अनन्तसंसारपथप्रचारफलप्रकारस्तव भाव्यपारः ॥३७॥
आर्यैरिति प्रभणितोऽपि कृपार्द्रचित्तैर्दूनः पुरातनकृतैरशुभैर्निमित्तैः ।
पापः स एव निरवास्यत देशमध्यात्, साध्वी च सारचरणा विदधे विशुद्धया ॥३८॥
आलोच्य सर्वमपि दुष्कृतकप्रकारं, सूरिर्बभार निजकं गुरुगच्छभारम् ।
ते साहयोऽपि गुरुपादपयोजहंसाः, कुर्वन्ति राज्यमनघं प्रथितप्रशंसाः ॥३९॥
समूलमुन्मूलितशाकवंशः, क्रमादभूद् विक्रमभूपतंसः ।
येनात्र यक्षाप्तवरत्रयेण, चक्रेऽनृणत्वं जगतोऽचिरेण ॥४०॥
संवत्सरोऽयं वहते यदीयः, शाकक्षितीशामपि(शस्य च) स द्वितीयः ।
तदेतदेवं प्रकृतं स्वरूपं, प्रसङ्गतोऽभण्यत भाविरूपम् ॥४१॥

( २ )

आमन्त्रितः श्रीबलमित्र-भानुमित्राधिपाभ्यां भगिनीसुताभ्याम् ।
ययौ पुरं श्रीभृगुकच्छनाम, सूरीश्वरोऽथोज्ज्वलकीर्त्तिधाम ॥४२॥
श्रीकालिकाचार्यमुखारविन्दादापीय पुण्योक्तिमहामरन्दान् ।
दीक्षां प्रपेदे गुरुभागिनेयीभानुश्रियः श्रीबलभानुसूनुः ॥४३॥
नृपादिलोकं जिनधर्मलीनं, दृष्ट्वा गुरुपास्तिरसेन पीनम् ।
क्रोधं पुरोधा बहुधा दधानः, सभासमक्षं गिरमाततान ॥४४॥
श्वेताम्बरा दर्शनबाह्यतत्त्वा वेदत्रयाचारनिवारकत्वात् ।
म्लेच्छादिवच्चैव मुमुक्षुपक्षं, श्रुत्वा जगौ सूरिरितोऽग्रपक्षम् ॥४५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रत्यक्षतस्तेऽत्र विरुद्ध एष, पक्षस्तथा हेतुरसिद्ध एव ।
वेदोक्तहिंसाकरणेन नूनं, दृष्टान्तकं भावदसाधनोनम् ॥४६॥
एवं प्रकारैः स कृतो निरुत्तरः, पुरोहितः सूरिषु बाह्यसादरः ।
वहन्नसूयां नगरेऽप्यनेषणामचीकरत् तामवबुध्य तत्क्षणात् ॥४७॥

( ३ )

आर्या महाराष्ट्रमहीविभूषणे, ययुः प्रतिष्ठानपुरेऽस्तदूषणे ।
तत्रास्ति भूमीपतिसालवाहनः, सदार्हतो विक्रममेघवाहनः ॥४८॥
समागते पर्युषणाभिधाने, पर्वण्यथासन्नतरे प्रधाने ।
श्रीकालिकाचार्यपुरो विशेषं, विश्वापतिर्विज्ञपयत्यशेषम् ॥४९॥
नभस्यमासोज्ज्वलपञ्चमीदिने, शक्रोत्सवोऽत्र ग्रथितोऽखिले जने ।
षष्ठ्यां ततः पर्युषणा विधीयतां, ममैष मानः सुगुरो! प्रदीयताम् ॥५०॥
विज्ञाय विज्ञप्तिमिमां नरेशितुः, स्मृत्वाऽऽह सूरिः समयं जिनेशितुः ।
न लङ्घ्यते पर्युषणाख्यवासरस्तां पञ्चमी चेच्चलतीह मन्दरः ॥५१॥
कुर्यात् तदर्वागिति गां सुराजः, श्रुत्वा चतुर्थ्यामथ पर्वराजः ।
गणाधिपैस्तस्य महोपरोधादाधायि सिद्धान्तविधिप्रबोधात् ॥५२॥

( ४ )

अथान्यदा दुर्विनयं विनेयव्रजं विलोक्य प्रभुरेवमूचे ।
तपो निरर्थं किल कूलवाल-पाञ्चालिकाजीवमहासतीवत् ॥५३॥
इत्यादिदृष्टान्तपरम्पराभिः, शिष्यानबुद्धानवबुद्धय ताभिः ।
एकः प्रभुस्तं निजशिष्यशिष्यं, सूरिं ययौ सागरचन्द्राख्यम् ॥५४॥
धर्मोपदेशं दिशतोऽस्य बाढं, श्रीकालिकार्योऽभिदधाति गाढम् ।
नास्तीह धर्मो भुवि भूरिसत्त्वः, पञ्चप्रमाणाविषयात्मकत्वात् ॥५५॥
स्वपुष्पवन्ध्यातनयादिदृष्टदृष्टान्तभावे रसभाव इष्टः ।
अजातपुत्रस्य यथा न नाम, नासिद्धधर्मस्य तथाऽस्ति धाम ॥५६॥
श्रुत्वेति तां कर्कशतर्कवाचं, विस्तारयन्तं मुनिवृद्धमेतम् ।
अहो! अयं कालिकसूरितुल्यो, विचिन्तयन् सागरचन्द्र ऊचे ॥५७॥
नैत्याश्रितोऽस्तीति पदप्रयोगः, पदद्वयस्यास्य विरोधयोगः ।
इत्युत्तरैः स्थापितधर्म्मवृक्षः, स सागरः प्राह फलैः समक्षम् ॥५८॥
श्रीसागराद्यो विहितस्वरूपः, सुवर्णभुव्यस्ति स सूरिभूपः ।
शय्यातरज्ञापितसर्वभावाः, शिष्याः समागुः पुनरत्र भावात् ॥५९॥
गच्छस्य संगादवगम्य सूरिमसौ गुरुं क्षामयति स्म भूरि ।
स वालुकाप्रस्थनिदर्शनेन, श्रीसूरिणाऽबोधि च सागरेन्द्रः ॥६०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



( ५ )

अथान्यदाऽऽनम्य मुदा जिनेन्द्रं, सीमन्धरं तीर्थकरं सुरेन्द्रम् ।
पप्रच्छ सौधर्मपतिर्निगोदविचारणाकर्णनसप्रमोदः ॥६१॥

विभोऽधुनाऽऽस्ते भरतेऽपि कश्चिन्निगोदतत्त्वार्थविदे विपश्चित् ।
जिनश्वरोऽप्याह स कालिकार्यो, वेविद्यते सर्वविचारवर्यः ॥६२॥

विप्रस्य रूपेण समेत्य शक्रो, वेदं वदन्नात्मनि दम्भवक्रः ।
संप्रश्नयामास निगोदजीवविचारमेवं गुरुरुच्चचार ॥६३॥

एकैकशोऽसंख्यनिगोदभाजां, गोला असंख्या अखिलेऽपि लोके ।
जानीहि चैकैकनिगोदमध्ये, जीवाननन्तानिति सूरिराह ॥६४॥

विज्ञाय पृष्टायुरथामरेन्द्रः, संभाषितः स्वीकृतस्वीयरूपः ।
सूरिं नमस्कृत्य तदालयस्य, द्वारं परावर्त्य जगाम धाम ॥६५॥

गीतार्थशिष्यं स्वपदं प्रदाय, समाधिना योऽनशनं विधाय ।
धामाप संघाय चतुर्विधाय, सः कालिकः सूरिवरः शिवाय ॥६६॥

इत्थं कालिकसूरिराजचरितं सम्यक्कथाया मया,
वृद्धाया(द्धेभ्यो?) अवगम्य रम्यमहिमं संक्षेपतो भाषितम् ।
ये कल्पागमवाचने सविजया व्याख्यान्ति वर्षे प्रति,
श्रीमन्तो विबुधव्रजे तिलकतां लब्ध्वा शिवं यान्ति ते ॥६७॥

(शार्दुलविक्रीडितवृत्तम् )

॥ इति श्रीकालिकाचार्यकथानकं समाप्तम् ॥ मंगलमस्तु श्रीसंघस्य ॥छ॥ श्री ॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

[२३]

## उपाध्यायश्रीसमयसुन्दरगणिविरचिता

# कालिकाचार्यकथा ॥

[ रचनासंवत् १६६६ ]

प्रणम्य श्रीगुरुं गद्य-पद्यवार्ताविरदूश्रुतम् ।
कालिकाचार्यसंबन्धं, वक्ष्येऽहं शिष्यहेतवे ॥१॥

अत्र पूर्वं स्थविरावली व्याख्याता, तत्र श्रीकालिकाचार्योऽपि महाप्रभावकः स्थविरो बभूव, तेन तस्यापि संबन्धः कथ्यते—

तत्र कालिकाचार्याः त्रयः स्थविरा जाताः । तन्मध्ये एकः श्रीकालिकाचार्यः श्रीमहावीरदेवनिर्वाणात् सं० ३७६ वर्षे श्रीश्यामाचार्यनामा श्रीप्रज्ञापनासूत्रकर्ता पूर्वविदां वंशे श्रीसौधर्मस्वामित आरभ्य त्रयोविंशतितमः पुरुषो जातः । येन ब्राह्मणीभूतसौधर्मेन्द्राग्रे निगोदविचारः कथितः । अत्र केचिद् वदन्ति—

सिरिवीरजिणंदाओ, तिसिसए वरिसवीसवोलीणे ।
कालयसूरी जाओ, सक्को पडिबोहिओ जेण ॥२॥

इति गाथादर्शनात् । ३२० वर्षे निगोदविचारकथकः श्रीकालिकाचार्यो जातः । केचिद् वदन्ति—

तिसय-पणवीस इंदो, चउसय-तिपन्न सरस्सई गहिया ।
नवसय-तिनवइ वीरा, चउत्थिए जो कालगायरिया ॥३॥

इति निर्मूलप्रायगाथादर्शनात् ३२५ वर्षे जातः ॥

केचिद् वदन्ति—चतुर्थ्यां पर्युषणापर्वप्रवर्त्तक एव निगोदविचारव्याख्याता, यथाश्रुतं बहुश्रुता विदन्तीति (१) । द्वितीयस्तु कालिकाचार्यः श्रीवीरनिर्वाणात् सं० ४५३ वर्षे सरस्वतीभ्राता गर्दभिल्लोच्छेदको बलमित्र-भानुमित्रनृपयोश्च मातुलो जातः । कुत्रापि तुर्यश्चतुर्थ्यां पर्युषणापर्वप्रवर्त्तकः कालिकाचार्यः स तयोर्मातुलः प्रोक्तोऽस्ति, यद् अस्ति तत् प्रमाणम् (२) । तृतीयस्तु श्रीकालिकाचार्यः श्रीवीरनिर्वाणात् सं०९९३ वर्षे श्रीविक्रमसंवत्सराच्च सं० ५२३ वर्षे जातः । येन श्रीवीरवाक्यात् पर्युषणापर्व भाद्रपदसुदिपञ्चमीतः चतुर्थ्यामानीतम् (३) । एवं श्रीकालिकाचार्याः त्रयः पृथक् पृथग् जाताः, परं नामसादृश्याद् द्वयोरग्रे तयोः कालिकाचार्ययोः एकीभूतैव संलग्ना कथा कथ्यते । अतो अत्र पूर्वं गर्दभिल्लोच्छेदकश्रीकालिकाचार्यसंबन्धः कथ्यते—

अस्मिन् जम्बुद्वीपे भरतक्षेत्रे धारावासं नाम नगरमभूत् । परं तन्नगरं कीदृशमस्ति ? । यस्मिन् नगरे अङ्गदेश—वङ्गदेश—तिलङ्गदेश—कलिङ्गदेश—वराङ्गदेश—प्रयागदेश— सुयागदेश—मुरुण्डदेश—पुलिन्ददेश— सुरेन्द्रदेश—समुद्रदेश—चित्रकूटदेश—लाटदेश—घाटदेश—नाट्यदेश—विराटदेश—केलिवाटदेश—भाटदेश—वाटदेश—कुण्टदेश—बुंटदेश—घोडादेश—घाटदेश—मेदपाटदेश—मगधदेश—सोरठदेश—कच्छदेश—गूर्जरदेश— मालवदेश—काश्मीरदेश—काबलिदेश—भुटंतदेश—बदकसांनदेश—बंगालदेश—कोङ्कणदेश—पञ्चभर्तृदेश—श्रीराष्यदेश— परतकालदेश—हबसीदेश— फिरङ्गीदेश—



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पठाणदेश–जलमानसदेश–मरुस्थलदेश–पञ्चालदेश–सिन्धुदेश–दक्षिणदेश–पूर्वदेश–पश्चिमदेश–उत्तरदेश(५२)-प्रमुख-नानादेशवास्तव्यव्यवहारिणो विविधवस्तुक्रयाणकानि लात्वा आगत्य च व्यापारं कुर्वन्ति । पुनरिदं नगरं अष्टाविंशद्(२८) वकारैः शोभितं वर्त्तते । ते चामी—

**वापी-वप्र-विहार-वर्ण-वनिता वाग्मी वनं वाटिका,**
**वैद्य-ब्राह्मण-वेश्य-वादि-विबुध-वेश्या वणिग् वाहिनी ।**
**विद्या-वीर-विवेक-वित्त-विनयो वाचंयमो वल्लिका,**
**वस्त्रं वारण-वाजि-वेसर-वरं (२८) वैभिः पुरं शोभितम् ॥४॥**

पुनः यस्मिन् नगरे एवंविधा स्थितिः—

**यस्यां देवगृहेषु दण्डघटना (१) स्नेहक्षयो दीपके—**
**ष्वन्तर्जाङ्गुलिकालयं द्विरसना खड्गेषु मुष्टिर्यथा (२–३) ।**
**वादस्तर्कविचारणासु (४) विपणिश्रेणीषु मानस्थितिः (५),**
**बन्धः कुन्तलवल्लरीषु (६) सततं लोकेषु नो दृश्यते ॥५॥**

इत्यादिऋद्धिसमृद्धिसहितं सुरलोकसदृशं [नगरं] ज्ञेयम् ।

अथ तस्मिन् धारावासनामनगरे वज्रसिंहनामा राजा राज्यं प्रतिपालयति । परं स राजा कीदृशोऽस्ति ? । शूरवीर-विक्रान्तप्रतापीक–साहसिक–अनेकदेशनायक–न्यायसत्याख्यायक–अमोघसायक–पुरोधासमानपायक-सौम्यमूर्ति–देदीप्यमान–स्फूर्ति–अखण्डप्रताप–अमृतसममधुरालाप–साक्षात्कन्दकन्दर्पावतार–याचकजनाधार–दुष्टनिग्राहक-शिष्टजनप्रतिपालक–न्याय-नीतिप्रधान–सर्वगुणनिधान–सेवकजनवत्सल–हारविराजमानवक्षःस्थल–परनारीसहोदर–रूपपुरन्दर–परदुःखभञ्जन–वाचका-च्छनिष्कलङ्क–निराकृतातङ्क–गौरवर्ण–लम्बकर्ण-प्रलम्बभुजादण्ड–प्रौढाज्ञाचण्ड–उपराठीरोमराय–सुवर्णकाय–'पातालभो कडि-नउ लांक, नही कोइ वांक, हृदये श्रीवत्स अत्यन्तस्वच्छ पायपद्म सौभाग्य सद्म, हस्ते चक्र साक्षात् शक्र' एवंविधो राजा वज्रसिंहः ।

अथ तस्य राज्ञः सुरसुन्दरीति नाम्नी पट्टराज्ञी वर्तते । परं सा कीदृशी अस्ति ? ।

'सर्व अंतेउरमांहि प्रधान, सर्वगुणनिधान, भर्तारनी भक्त, धर्मनइ विषइ रक्त, राजानइ प्रेमपात्र, सुंदर गात्र, शीलगुणविभूषित, सर्वथा अदूषित, कमलनेत्र पुण्यक्षेत्र, जेहनी मीठी वाणी सगली जाणी, रूपवंतमांहि वखाणी, घणुं स्यु इंद्राणी पिणि जे आगइ आणइ पाणी, वली जेहनइ अंग ओलगू दासीनउ परिवार वर्त्तइ छइ, कुण कुण कस्तूरी १, कपूरी २, जवाधि ३, मलयागिरी ४, लीलावती ६, पद्मावती ६, चन्द्रावती ७, चंद्राउलि ८, चांपू ९, सांपू १०, सरस्वति ११, गोमति १२, गंगाधरी १३, दीवाधरी १४, रामगिरी १५, हंसली १६, बगुली १७, हरिबोली १८ प्रमुखाः ।'

अथ तस्याः सुरसुन्दर्याः शुभस्वप्नसूचितः कालककुमारः पुत्रो जातः, सरस्वतीनाम्नी एका पुत्री च । परं स कुमारः कीदृशोऽस्ति ? । महारूपवान् सर्वपुरुषलक्षणशोभितः सर्वजनवल्लभो विशेषतो माता-पित्रोः जीवत्प्राणो महासौभा-ग्यवान् मातृ-पितृभिः पाल्यमानश्चन्द्रकलेव वर्धमानोऽष्टवार्षिको जातः । तस्मिन् समये मातृ–पितृभ्यां विचारितम्—

**माता वैरी पिता शत्रुः, बालो येन न पाठितः ।**
**न शोभते सभामध्ये, हंसमध्ये बको यथा ॥६॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुनरपि—

पुत्रोऽतिमूर्खो विधवा च कन्या, शठं च मित्रं चपलं कलत्रम्।
विलासकाले च दरिद्रता च, विनाऽग्निना पञ्च दहन्ति देहम् ॥७॥

पुनरपि ज्ञानेन विना मानवः पशुरेव, यतः—

आहार-निद्रा-भयं-मैथुनानि, सामान्यमेतत् पशुभिर्नराणाम्।
ज्ञानं विशेषः खलु मानवानां, ज्ञानेन हीनाः पशवो मनुष्याः ॥८॥

ततः कलाचार्यसमीपे कलाग्रहणार्थं मुक्तः। कुमारोऽपि स्तोककालेन द्वासप्ततिकला(७२) जग्राह। तत्रापि विशेषतोऽश्वपरीक्षायां बाणकलायां च निपुणो जातः। अथ कालिककुमारः सर्वविद्यावान् मातृपितृभक्तोऽत्यन्तस्नेहवत्या निजभगिन्या सरस्वत्या युक्तः सन् सुखेन कुमारपदवीं भुञ्जन् आस्ते।

अथान्यदा श्रीवज्रसिंहराजः छत्रं धारयन् चामरैः वीज्यमानः सभामण्डपमागत्य सिंहासने उपविष्टः। तत्र कीदृशी सभा निविष्टाऽस्ति ?। यथा—'अनेकगणनायक दण्डनायक मण्डलीक महामण्डलीक सामन्त महासामान्त चउरासीआ मुहता मुग(कु)टवर्धकसंधिपाल दूतपाल सइगरणा वइगरणा देवगरणा यमगरणा संधिविग्रही परविग्रही सेठ सेनापति सार्थवाह व्यवहारिया अंगरक्षक पुरोहित वृत्तिनायक भारवाहक थईयायत पडुपडियायत टाकटमाली इंद्रजाली फूलमाली मन्त्रवादी तन्त्रवादी यन्त्रवादी धर्मवादी ज्योतिर्वादी धनुर्वादी दण्डधर खड्गधर धनुर्धर छत्रधर चामरधर दीवाधर पुस्तकधर प्रतीहार खबरदार गजपाल अश्वपाल अङ्गमर्दक आरक्षक साचाबोला कथाबोला गुणबोला समस्याबोला साहित्यबंधक लक्षणबंधक छन्दबंधक अलंकारबंधक नाटकबंधक गीतबंधक' इत्यादि वर्णकविराजिता।

तदवसरे राज्ञः खुरसाणदेशादनेके अश्वाः प्राभृते कृते आगताः। परं कीदृशाः सन्ति ?। वर्णतः केऽपि 'नीलडा पीलडा कंबोजडा रातडा सबजिया अबजिया किवलीया धवलिया किहाडा किरडिया हरणिया मेघवरणिया कालुया धुसरा हांसला' लक्षणतोऽपि एवंविधाः—

निर्मांसं मुखमण्डले परिमितं मध्ये लघु कर्णयोः,
स्कन्धे बन्धुरमप्रमाणमुरसि स्निग्धं च रोमोद्गमे।
पीनं पश्चिमपार्श्वयोः पृथुतरं पृष्ठे प्रधानं जवे,
राजा वाजिनमारुरोह सकलैर्युक्तं प्रशस्तैर्गुणैः ॥९॥

इत्यादि। ततो राज्ञा कालिककुमारस्य कथितम्—अहो कुमार! बहिर्गत्वा एतेषां तुरङ्गमाणां परीक्षा क्रियताम्। ततः कुमारः तथेति प्रतिपद्य हृष्टः सन् सदृशवयस्कसेवकपञ्चशतीयुतं तरलतरं तुरङ्गममेकमारुह्य क्रीडावने जगाम। परं तद् वनं कीदृशमस्ति ?। 'अंब निम्ब केलि कंकेल्लि वल्लि कणवीर करीर कुरबक आमलक केतकी केवडा कोविदार कचनारि कल्हार कउठ कंदूरी कर्मदा किंशुक क्रकच काकोदुम्बरि कर्कन्धू करञ्ज कपिकच्छू कमल कैरव कुवलय कोकनद कुरुविन्द करणा वरणा अशोक आंबिली अखोड अगर तगर अरडूसउ अर्जुन अखरोट एरंड उंबर अरणी साग नाग पुन्नाग नारिंग पाडल पारिजात जांबू निंबू जंभीरी नालेरी फोग खेजडा वणखडा ताल तमाल सदाफल नागरवेलि वालउ-वेउलि जाइ जूही दमणउ मरूयउ मोगरउ मचकुंद चांपउ' प्रमुखनानाविधवृक्षावलीविराजितम्। तस्मिन् वने बहुवेलां अश्ववाहनिकां कृत्वा श्रमातुरः सन् कुमारः सपरिवारः सहकारतरोः छायायां तुरङ्गमादुत्तीर्य विशश्राम।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्मिन् प्रस्तावे तत्र वने अनेकसाधुपरिवारवृताः श्रीगुणाकरसूरयो यथार्थनामानः समवसृताः सन्ति । परं ते कीदृशाः सन्ति ?–'पडिरूवो तेयस्सिणो जुगप्पहाणागमो महुरवक्को गंभीरो धीइमंतो उवएसपरो अपरिस्साविणो सोमपइगणो, संगहसीलो अभिग्गहमइणो अविकत्थणो अचवलो पसंतहियया खंतिजुया मद्दवजुया अज्जवजुया मुत्तिजुया तवस्सिणो, संजमपालगा सच्चजुया सोयजुया अकिंचणा बंभचेरवासिणो अणिच्चाइदुवालसभावणाभावगा' एवं ३६ षट्त्रिंशत्सूरिगुणैः शोभमाना । पुनः कीदृशास्ते ?–'जियकोहा जियमाणा जियमाया जियलोहा जियपरीसहा जियभया जियनिद्दा जियविगहा संसारपारगामिणो परमसंविग्गा संसारभवउव्विगा सुयसायरा करुणानिहिणो सव्वजीवसुहेसिणो दीहदंसिणो कुक्खिसंबला संपुण्णसुयबला निम्ममा निब्भमा निरहंकारा निव्विकारा मिच्छत्ततिमिरनासगा निरवज्जवासगा समत्तरयणदायगा गच्छनायगा' किं बहुना सर्वसाधुगुणसंपूर्णा । तेषां मेघगर्जितगम्भीरव्याख्यानध्वनिं श्रुत्वा कुमारः केकीव हर्षितः सञ्जातविस्मयः–अहो ! क ईदृग्मधुरध्वनिना धर्ममाख्याति ?, तत्र गत्वा श्रूयते तदा चारु । ततो जातविवेकातिरेकः समुत्थाय तत्र गत्वा सूरिगुरुं विनयेन नत्वा उचितस्थाने समुपविष्टः । राजपुत्रा विनयं कुर्वन्त्येव, यत उक्तम्—

विनयं राजपुत्रेभ्यः, पण्डितेभ्यः सुभाषितम् ।
अनृतं द्युतकारेभ्यः, स्त्रीभ्यः शिक्षेत कैतवम् ॥१०॥

अथ च समृद्धः पुमान् विनयं कुर्वन् मृ(मि)ष्टो लगति, यदुक्तम्—

पाई पढइ पढाई वखाणइ रूपवंतनई गाई जाणइ ।
रिद्धिवंतनइ विनय पउट्टइ सक्करिसत्थे घेवर लुट्टइ ॥११॥

ततः श्रीसूरिभिः धर्मोपदेशः प्रारब्धो यथा–अहो कुमार ! इयं राज्यलक्ष्मीः चञ्चला दृश्यते, यदि न त्यज्यते तदा आरम्भपापपङ्कमग्नत्वेन दुर्गतौ गम्यते, यदुक्तम्—

गयकण्णचंचलाए, अपरिचत्ताई रायलच्छीए ।
जीवा सकम्मकलिमलभरियभरा तो पडंति अहे ॥१२॥

पुनरपि बुद्धिमतो मनुष्यस्य बुद्धेः तदेव फलं यत् पुण्यपापादौ तत्त्वविचारणा क्रियते, यत आह—

बुद्धेः फलं तत्त्वविचारणं च, देहस्य सारं व्रतधारणं च ।
अर्थस्य सारं किल पात्रदानं, वाचः फलं प्रीतिकरं नराणाम् ॥१३॥

पुनरपि शरीरादि सर्वमनित्यं ज्ञात्वा विवेकिना दीर्घदर्शिना मनुष्येण धर्मस्यैव संग्रहः कर्त्तव्यः, यत उक्तम्—

अनित्यानि शरीराणि, विभवो नैव शाश्वतः ।
नित्यं संनिहितो मृत्युः, कर्तव्यो धर्मसंग्रहः ॥१४॥

तथा धर्मस्यापि पण्डितेन सुवर्णस्येव परीक्षा कार्या । यदवादि—

यथा चतुर्भिः कनकं परीक्ष्यते, निघर्षण-च्छेदन-ताप-ताडनैः ।
तथैव धर्मो विदुषा परीक्ष्यते, श्रुतेन शीलेन तपो-दयागुणैः ॥१५॥

तत्रापि विंशतिविंशोपकदयामयो जरामरणादिच्छेदकः चक्रवर्तितोऽप्यधिकसुखस्वरूपः संसारसमुद्रतारकः अजरामर-शाश्वतसुखदायकः पञ्चमहाव्रतरूपो यतिधर्म एव सर्वधर्मोत्तमः । एवं 'श्रीगुरुवचनश्रवणात् संसारस्यासारतां ज्ञात्वा संजात-वैराग्यो भाग्यवान् श्रीकालिककुमारः प्रतिबुद्धः सन् करद्वयं संयोज्य विज्ञपयति स्म; हे भगवन् ! हे परोपकारवन् ! भवद्वचनेन अहं प्रतिबुद्धोऽस्मि, अथ यावन्निजगृहे गत्वा माता–पित्रोरनुमतिं लात्वा युष्मत्समीपे नायामि, तावत् श्रीगुरु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भिरत्रैव वने स्थातव्यम्, इति प्रतिज्ञाय स्वगृहे गत्वा माता-पित्रोः उवाच—मया गुरुदेशनया संसारोऽसारो ज्ञातः, अहं दीक्षां लास्यामि, ममादेशं दत्त। ततो माता-पितरौ तद्दुःखेन मोहेन च मूर्च्छामापतुः। पुनः व्यजनादिवातोपचारैः लब्धचेतनौ एवमूचतुः—रे पुत्र! त्वं बालोऽसि, यौवनावस्थोऽसि, सुकुमारोऽसि, कामभोगार्होऽसि, अतो राज्यधुराभाराङ्गीकरणेन पूरय माता-पित्रोर्मनोरथान्। पुनः परिणतवयस्को दीक्षां गृह्णीयाः, परं सांप्रतं दीक्षाग्रहणं नैव, पुनः संयममार्गोऽतिदुःखकरोऽस्ति, तत्र यावज्जीवं अस्नानता १, भूमिशयनं २, लोचकरणं ३, देहस्याप्रतिकर्मता ४, गुरुकुलवासेन गुरुशिक्षायां स्थातव्यं ५, क्षुधादिद्वाविंशतपरीषहाः सोढव्याः ६, देवाद्युपसर्गे चाक्षोभ्यता ७, लब्धालब्धे समभावना ८, अट्ठार(अष्टादश)सहस्रशीलाङ्गरथधारिता ९, बाहुभ्यां समुद्रतरणं १०, तीक्ष्णखड्गधारोपरि चलनं ११, ज्वलदग्निज्वाला पादाभ्यां विधापयितव्या १२, निःस्वादवालुकायाः कवलभरणं १३, गङ्गाप्रतिस्रोतसा गन्तव्यं १४, तुलायां मेरुः तोलयितव्यः १५, एकाकिना कर्मारिमहाबलं जेतव्यं १६, राधावेधेन चक्रस्थितपुत्तलिका वेधयितव्या १७, त्रिभुवनजयपताका गृहीतव्याः १८ इत्यादि। एवं दुष्करतायां दर्शितायामपि कुमारः प्रवर्द्धमानवैराग्यः प्राह—हे माता-पितरौ! एषा या दीक्षायां दुष्करता सा सत्या। तथैव परं कातराणां कापुरुषाणां ज्ञेया, न शूरवीराणां सत्पुरुषाणाम्, ततोऽहमवश्यं दीक्षां ग्रहीष्यामि, ममादेशं दत्त। या वार्ताकरणेऽपि क्षणवेला याति सा ममायुर्मध्ये त्रुटति, अकृतार्था च याति। ततो मातृपितृभ्यां 'याता म्रियमाणश्च न केनापि रोद्धुं शक्यते' इति विचार्यानुमतिर्दत्ता। ततः श्रीकालिककुमारेण कृतपितृमहामहोत्सेवेन महताऽऽडम्बरेण निजसेवकपञ्चशतीसहितेन सहस्रपुरुषवाहिनीं शिबिकामारुह्य गीतगानतानमानदानसन्मानवाद्यनिर्घोषपूर्वमपूर्वरीत्या वने गत्वा गुरोः समीपे दीक्षां जगृहे। सरस्वत्यपि तद्भगिनी भ्रातृस्नेहातिरेकात् पृष्ठे दीक्षां जग्राह। माता-पितरौ अपि, हे पुत्र! एषा तव भगिन्यस्ति, अस्या रक्षा बह्वी कार्या, इति शिक्षां दत्वा विमनस्कौ सन्तौ स्वगृहे गतौ।

अथ कालिककुमारमुनिः स्तोककालेन सुबुद्धित्वाद् गुरुसेवाप्रसादाद् व्याकरण १– तर्क २– छन्दो ३–ऽलङ्कार ४– काव्य ५– नाटक ६– शाटक ७– ज्योतिष् ८– वैद्यक ९– नैमित्तिक १०– मन्त्र ११– तन्त्र १२– यन्त्र १३– अङ्ग १४– उपाङ्ग १५– छेदग्रन्थ–१० पयन्ना–४ मूलसूत्र—नन्दी १– अनुयोगद्वार २– एवं ४५ पञ्चचत्वारिंशदागमाः तथा सूत्र-निर्युक्ति-भाष्य-चूर्णि-वृत्ति-प्रकरणादि स्वसमय-परसमयशास्त्रपारगामी जातः। ततो गुरुभिः योग्यतां ज्ञात्वाऽऽचार्यपदे स्थापितश्च।

अथ श्रीकालिकाचार्या अनेकसाधुपरिवृता ग्रामानुग्रामं विहरन्तो भव्यजीवान् प्रतिबोधयन्तो मालवकदेशे श्रीउज्जयिन्यां पुर्यां बहिरुद्यानवने समवसृताः। सर्वेऽपि लोका वन्दनार्थं तत्र यान्ति। धर्मं च सदा शृण्वन्ति। सरस्वती साध्वी अपि अनेक साध्वीपरिवारपरिवृता उज्जयिन्यां श्राविकापार्श्वे उपाश्रयं मार्गयित्वा स्थिताऽस्ति।

अथान्यदा सरस्वती साध्व्यपि निजभ्रातरं कालिकाचार्यं वन्दित्वा यावन्निजोपाश्रयमागच्छति वर्त्मनि तावदुज्जयिनीनगरीस्वामिना गर्दभिल्लेन सा दृष्टा, चिन्तितं च तेन—एषा का? एतादृशी सरूपा किं देवी वा किं विद्याधरी वा? अथवा किन्नरी वा?। इति संदेहेन निजपार्श्ववर्त्तिसेवकाः पृष्टाः। तैरुक्तम्—हे महाराज! एषा वज्रसिंहराज्ञः पुत्री सरस्वतीनाम्नी कुमारिका सती निजभ्रातृस्नेहातिरेकात् साध्वी जाता। ततो गर्दभिल्लेन विचारितम्—अहो! अनया तपसा कायः शोषितः, तथापि सुरूपत्वं न याति, यतः—

'काली तउही कस्तूरी, थोडी तउही तेजनतूरी। सूकी तउही वेउल सिरी, तूटी तउही मोती सिरी। भागउ तउही वराह, तुटउ तउही साह। निबलउ तउही गह, निर्गुण तउही नाह। चूरउ तउही साकर, निबलउ तउही ठाकुर।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तपाव्यो तउही कांचण, घस्यउ तउही चंदण। लहुडउ तउही सीह, धुंधलउ तउही दीह। नान्ही तउही नागिणी, निरसी तउही सोहागणी'।

ततो यदि एतामितोऽपहृत्य ममान्तःपुरे मुञ्चामि, स्नान-मज्जनादि सम्यगुपचरामि, मनोज्ञाहारादिना पोषयामि, तदा मम स्त्रीरत्नं भविष्यति। एतां विना च मम राज्यश्रीरपि निष्फला, मम जीवितं च वृथा ज्ञेयम्—इत्येवं तां कामग्रहग्रस्तेन गर्दभिल्लेन श्येनेन चटकेव निजसेवकपार्श्वाद् नानाविधं विलपन्तीमुत्पाटयित्वा निजान्तःपुरे क्षिप्ता। विलापस्त्वेवम्—हे बान्धव! हे सुगुरो! हे अनेकगुणप्रधान! हे चतुरबुद्धिनिधान! हे जिनशासननायक! हे भव्यजीवसुखदायक! हे जिनशासनशृङ्गार! हे गच्छाधार! हे आगमस्याकर! हे करुणासागर! हे भ्रातः! हे कालिकाचार्य! गर्दभिल्लेन राज्ञा पापिष्ठेन शीलखण्डनेच्छानिष्ठेन मम सर्वथाऽप्यनिष्टेन मामनाथामिवापहरन्तीं रक्ष रक्ष इति। तदा अन्या अपि साध्व्यः पूत्कारं चक्रुः। लोका अपि हाहाकारं वितेनिरे। ततो महाकोलाहलो जातः। ततः शीघ्रं साध्वीभिः सर्वोऽपि वृत्तान्तः श्रीकालिकाचार्यस्य निवेदितः—भवदीयभगिनी सरस्वती साध्वी गर्दभिल्लेनापहृत्य निजान्तःपुरे क्षिप्ताऽस्ति। न ज्ञायतेऽथ क भविष्यति?।

ततः श्रीकालिकाचार्याः कोपाक्रान्ताः कतिपयशिष्यैः सहिता राजपार्श्वे जग्मुः। सौम्यशीतलन्यायवचनैः प्रोक्तम्—हे राजन्! एषा साध्वी मम भगिनी, तत्रापि शीलवती, तत्रापि पञ्चमहाव्रतधारिणी, एतस्या वैमनस्यकरणे महाकर्मबन्धो भविष्यति। अपि चान्योऽपि नगरमध्ये दुष्टमतिः दुःशीलश्च भविष्यति स तव निवार्यो भविष्यति, परं यदि त्वमेवान्यायं करिष्यसि तदा तव निवारकः को भविता? अपि च यत्र नगरे राजैव चौरोऽन्यायी च तत्र लोका नगरं मुक्त्वा वनमेव भजन्ति। यदुक्तम्—

**यत्रास्ति राजा स्वयमेव चौरो, भाण्डीवहो यत्र पुरोहितश्च।**
**वनं भजध्वं ननु नागरा भो!, यतः शरण्याद् भयमत्र जातम् ॥१६॥**

इति। पुनः कालिकाचार्यैः प्रोक्तम्—हे राजन्! अन्तःपुरे बह्व्यो रूपवत्यश्चातुर्यकलावत्यो युवत्यो रमणीयाः सन्ति, तासामुपरि संतोषं कुरु, परं माऽनयाऽस्थिमात्रया मलमलिनगात्र्याऽतिजीर्णवस्त्रया साध्व्या समं किं सुखमनुभविष्यसि?। ततो मुञ्चैनां यथा धर्मशालायां गत्वा एषा संयमं पालयिष्यति। एतादृशानि श्रीकालिकाचार्यवचनानि श्रुत्वा गर्दभिल्लो मौनमाधाय श्रुतमप्यश्रुतं कृत्वा स्थितः, समुत्थाय चान्तःपुरे गतः। ततः श्रीकालिकाचार्यैश्चिन्तितम्—अथ कोऽपि नवीन उपायः क्रियते। ततः श्रीकालिकाचार्या उपाश्रयमागत्य सङ्घाग्रे सर्वस्वरूपं प्रोक्तवन्तः। ततः सङ्घेन चिन्तितम्—आचार्यवचनं न मानितम्, परमस्मद्वचनं मानयिष्यति। ततः प्रभूतं प्राभृतं लात्वा सङ्घोऽपि भूपाग्रे गतः। राज्ञा पृष्टम्—कथं भो! महाजनैः समागतम्?, किं कार्यम्?। संघेनोक्तम्—त्वं मालवकदेशस्वामी तवेदृशं कुकर्म कर्तुं न युक्तम्। यतो राजा पितेव प्रजाः प्रतिपालयति, विशेषतो दर्शनिनां तपस्विनां वर्गम्, ततो मुञ्चेमां साध्वीम्, इत्यादि बहुतरं प्रोक्तम्, परं स कुकर्मा कामी राजा न मुञ्चति। ततः संघेन यथागतेन तथाऽऽगतेन श्रीसूरीणां प्रोक्तम्। ततः श्रीकालिकाचार्येण कोपाक्रान्तेन संघाग्रे प्रोक्तम्—अहं समर्थः सन् जिनशासनप्रत्यनीकानां यदि शिक्षां न दद्मि, तदा जिनाज्ञाविरोधकत्वेन दुर्गतिकः स्याम्। यदुक्तम्—

**ये प्रत्यनीका जिनशासनस्य, संघस्य ये चाशुभवर्णवाचः।**
**उपेक्षकोड्डाहकरा धरायां, तेषामहं यामि गतिं सदैव ॥१७॥**

ततः प्रतिज्ञां चक्रे—यदाऽहं गर्दभिल्लं सराज्यं नोन्मूलयामि तदाऽहं न कालिकाचार्यः। ततः स्वगच्छभारं गीतार्थेषु स्थापयित्वा स्वयमग्रथिलोऽपि ग्रथिलीभूय कर्दमादिना गात्रमनुलिम्पन्, नगरमध्ये भ्रमन्, वक्ति—यदि गर्दभिल्लो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राजा ततः किम् ?, यदि तस्य नगरं महत् तर्हि किम् ?, यदि गर्दभिल्लस्य अन्तःपुरस्त्रियो बह्व्यः ततः किम् ?, यदि राज्ञो भाण्डागार-कोष्ठागार-हस्ति-तुरङ्गम-रथ-पदातयो बहवः ततः किम् ?, यदि राजा प्राज्यं साम्राज्यं भुनक्ति तदा मम किम् ? । इत्येवं प्रलपन्तं प्रतिमार्गं प्रतिगृहं भ्रमन्तं कालिकाचार्यं दृष्ट्वा नगरवासिनो लोकाः सामन्त-श्रेष्ठि-सेनापति-मन्त्रिप्रमुखा एकीभूय राज्ञः समीपे गत्वा एवं प्रोक्तवन्तः-हे राजेन्द्र ! अयं महापुरुष आचार्यो निजभगिनीस्नेहाद् ग्रथिलो जातः ततः कृपां कृत्वा साध्वीं मुञ्च यथाऽयं सज्जो भवति । इत्यादिवचनानि श्रुत्वा कुपितो राजा वक्तुं प्रवृत्तः-रे लोकाः ! यात यात मम दृष्टितः, एवंविधां शिक्षां निजगृहे निजमातृ-पितृ-भ्रातृ-कलत्रादीनां दत्त । ततः सामन्तादयो लोका विलक्षीभूय स्वगृहं जग्मुः । श्रीआचार्यैरपि श्रुतं यत् 'सामन्तादिवचनमपि न मानितम्', अथ यदि तेनाधमेनातितानितं तर्हि त्रुटत्येव, यतः—

> अतिताण्युं त्रुटइ, अतिभर्युं फुटइ ।
> अतिखाधुं खूटइ, अतिढीली गांठि छूटइ ॥१८॥

तस्मात् किञ्चिद् वैरूप्यं कर्तव्यम् । अत्रापि न स्थातव्यं च, कुत्रापि देशे गत्वा कमप्युपायं करोमि, इति निश्चित्य श्रीकालिकाचार्याः सिन्धुनदीतटे पश्चिमदिशि एकः पार्श्वकूलो देशोऽस्ति, तत्र गताः, तत्र देशे ये राजानस्ते सर्वेऽपि 'साखी' इति कथ्यन्ते । तत्रैकस्य साखीभूपस्य नगरसमीपे महात्मवेषेण गताः । तस्मिन् प्रस्तावे तत्रैका कूपिका वर्तते । तत्पार्श्वतो बहवः कुमारा भ्रमन्तो दृष्टाः, पृष्टं च-भो ! किं विलोक्यते ? । ते प्राहुः-भो परदेशिन् ! अस्माकं रममाणानां मणिमयकन्दुकः कूपिकायां पतितः, प्रवेष्टुं न शक्यते, बहिःस्थितानां च न निस्सरति । ततो वयं विलक्षीभूताः सन्त इतस्ततो भ्रमामः । आचार्या प्राहुः-भो कुमाराः ! गृहाद् धनुर्बाणानानयत यथा कन्दुकं निष्कास्य ददामि । ततस्तैस्तथा कृतम् । तत आचार्यैः आर्द्रछगण-वेष्टन-ज्वलत्तृणक्षेपणपूर्वं धनुराकृष्यैकेन बाणेन कन्दुको विद्धः, द्वितीयेन बाणेन प्रथमो बाणो विद्धः, एवं तृतीयेन द्वितीयः, इत्येवं परम्परया विद्धबाणप्रयोगेन कूपकण्ठस्थितैरेव कन्दुको निष्कास्य कुमाराणां दत्तः । सर्वेऽपि कुमारा हर्षिताः सन्तो विस्मयमादधानाः स्वस्वगृहं गत्वा एवं प्रोचुः-हे तात ! अद्यैकः कोऽपि परदेशी परदेशात् कलावान् समेतोऽस्ति, तेनास्माकं कूपे पतितः कन्दुको निष्कास्य दत्तः । सर्वोऽपि वृत्तान्तः कथितः ।

ततः तत्रत्यसाखीभूपैः निजपुत्रान् मुक्त्वा सादरं स्वगृहे श्रीकालिकाचार्याः सामनीताः । ततः सूरिभिराशीर्वादो राज्ञे दत्तो यथा—

> चिरं जीव चिरं नन्द, चिरं पालय मेदिनीम् ।
> चिरमाश्रित्यलोकानां, प्रपूरय मनोरथान् ॥१९॥

पुनरपि—

> पौषमासे निराहारा बह्वाहाराश्च कार्तिके ।
> चैत्रमासे गुडाहारा भवन्तु तत्र शत्रवः ॥२०॥

ततः साखीराजेनापि विद्याकलाचातुर्यचमत्कृतेनातिबहुमानसन्मानादि दत्त्वा निजपार्श्वे रक्षिताः । विद्यावन्तो हि पूज्यन्ते, यदुक्तम्—

> विद्वत्त्वं च नृपत्वं च, नैव तुल्यं कदाचन ।
> स्वदेशे पूज्यते राजा, विद्वान् सर्वत्र पूज्यते ॥२१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुनरपि—

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं,
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं,
विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः ॥२२॥

अपि च विद्यावतां परदेशोऽपि स्वदेशः, यदाह—

कोऽतिभारः समर्थानां, किं दूरे व्यवसायिनाम् ।
को विदेशः सुविद्यानां, कः परः प्रियवादिनाम् ॥२३॥

अथ कालिकाचार्यास्तत्र तिष्ठन्ति । प्रत्यहं साखीराजस्य समीपे यान्ति, नानाविधचेतश्चमत्कारकारिज्योतिर्निमितादिविद्यया राज्ञश्चित्तं रञ्जयति । राजापि अत्यन्तहृष्टतुष्टमनस्को गुरूणामतिबहुमानं दत्ते । एवं च सति गतानि कियन्ति दिनानि । तदवसरे एकदा एको दूत एकं कचोलकं छुरिकासहितं लेखं चाग्रे मुक्त्वा राज्ञः प्रणम्य सन्मुखं स्थितः । ततः साखीराजो लेखं वचायित्वा तद् विलोक्य च श्याममुखो बभूव । ततः श्रीकालिकाचार्यैरुक्तम्—भवतां स्वामिप्राभृतं समागतम्, तत्र हर्षो विलोक्येत, ततो हर्षस्थाने विषादः कथम् ? । राजा प्राह—अहो महापुरुष ! अद्यास्माकं मरणरूपं महाभयं जातम् । मरणादप्यधिकं भयं किमपि नास्ति, यतः—

पंथसमा नत्थि जरा, दारिद्दसमो पराभवो नत्थि ।
मरणसमं नत्थि भयं, खुहासमा वेयणा नत्थि ॥२४॥

ततः सूरिभिः पृष्टम्—किं तद् भयम् ? । राजा प्राह—हे भगवन् ! योऽस्माकं क्रुद्धः स्वामी स साहानुसाही वर्त्तते, तेन कुपितेन लिखितं वर्त्तते, 'यदुतानया छुरिकया निजमस्तकं छित्त्वाऽस्मिन् कचोलके क्षिप्त्वा शीघ्रं मोच्यम्, नोचेत् तव सकुटुम्बस्य क्षयो भावी' । यथा मम तथाऽन्येषामपि मम तुल्यानां ९५पञ्चनवतिसाखीराजानां दूतो मुक्तोऽस्ति । अतो महाभयम् । किं क्रियते ?, कुत्र गम्यते ?, कथं छुटयते ? । ततः श्रीकालिकाचार्यैः विचारितम्—अयमवसरः, मम च कार्यम् । ततः साखीराजाय प्रोक्तम्—हे राजन् ! मा म्रियस्व, मा चिन्तां कुरु, जीवन् नरो भद्रशतानि पश्यति । यथा दृष्टान्तः—

भानुश्च मन्त्री दयिता सरस्वती, मृतिं गता सा नृपकैतवेन ।
गङ्गातटस्थां पुनरेव लेभे, जीवन् नरो भद्रशतानि पश्येत् ॥२५॥

अत्र समये सति दृष्टान्तो वाच्यः । ततः पञ्चनवतिसाखीराजानः भवान् च सर्वेऽपि एकीभूय मया सार्धं चलन्तु । यथा हिन्दुकदेशे गत्वा गर्दभिल्लनृपमुच्छेद्योज्जयिनीराज्यं विभज्य भवतां समर्प्यते । ततः सूरिवचने प्रतीतिं कृत्वा लेखप्रेषणपूर्वं सर्वान् ९५ राज्ञ आहूयैकत्र मिलित्वा प्रयाणढक्कां दापयित्वा सर्वेऽपि ९६साखीराजानः श्रीकालिकाचार्यसहिताश्चलिताः, अग्रे गच्छन्तः सिन्धुनदीमुत्तीर्य, सौराष्ट्रदेशमध्ये सुखेन समागताः । तदवसरे वर्षाकालः प्रादुर्बभूव । स कीदृशः ?—

"आयो वर्षाकाल चिहुं दिसि घटा उमटी ततकाल । गडडाट मेह गाजइ, जाणे नालिगोला वाजइ । कालइ आभइ वीजलि झबकइ, विरहणीना हीया द्रवकइ, पपीहा बोलइ वाणिया धान वेचवा वखार खोलइ, बोलइ मोर, दादुर करइ सोर, अंधार घोर पइसइ चोर । कंदर्प करइ जोर, मानिनी श्रीभर्त्तारनइ करइ निहोर, चंद्रसूरिज वादले छाया, पंथिजन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आप आपणा घरनइ धाया। राजहंस मानसरोवर भणी चाल्या, लोके वस्तुवाना वखारमइ घाल्या। बगपंगति सोहइ, इंद्रधनुष चित्त मोहइ। आभ थयो रातउ, मेह थयो मातउ। मोटी छांट आवइ, लोकानइ मन भावइ। झडी लागी करसणीरी भाग्यदसा जागी। मूसलधारइ मेह वरसइ, पृथिवी ऊर्णपूर्ण करिवानइ तरसइ। वहइ प्रणाल, खलखलइ खाल, चूयइ ओरा, भीजइ वस्तुवाना बोरा। टबकइ परसाल, चिंचूयइ बाल। नदी आवी पूर कडणिरा रुंख भांजी करइ चकचूर वहइ वाहला, लोक थया काहला। जूना ढूंढा पडइ, लोक ऊंचा चडइ। हालीए खेत्र खड्या, वाडिसुं सेढा जड्या। मारग भागा, जे जिहां ते तिहां रहिवा लागा। प्रगट्या राता ममोला, धान थया सुंहगा मोला, नीली हरी डहडही, घणा हूया दूधनइ दही। नीपना घणा धान, सांभर्या धर्म नइ ध्यान। गयउ रोर, लोक करइ बकोर, गयउ दुकाल, आयउ दंदू सुकाल" ॥

ईदृशे वर्षाकाले न कोऽपि गन्तुं शक्नोति। ततः श्री**का**लिकाचार्यवचसा सर्वेऽपि **सा**खीराजानः ९६ निजनिजपटकुटीं विस्तार्य स्थित्वा(ताः)। एवं मासचतुष्टयस्थित्या वर्षाकाले श्री**का**लिकाचार्यैः प्रोक्तम्—भो राजानः! मार्गाः समीचीना जाताः, अथाग्रे चलन्तु यथा भवतां स्वेप्सितं सिद्धयति। तदा ते प्रोचुः—हे श्रीगुरो! कथं प्रस्थितिः भवति? बहुकालविलम्बनेनास्माकं द्रव्यं सर्वं निष्ठितम्; शम्बलं च क्षीणम्, क्षुधातुराणामस्माकं सर्वं विस्मृतम्।

**" तां बोजा नइ खाण, जां जिमइ जासक धान, तां भट्टारक भगवान, जां जीमइ जासक धान,**
**तां गीत नइ गान, जां जीमइ जासक धान, तां तान नइ मान, जां जीमइ जासक धान,**
**तां वीवाह नइ जान, जां जीमइ जासक धान, तां फोफल नइ पान, जां जीमइ जासक धान,**
**तां धर्म नइ ध्यान, जां जीमइ जासक धान, तां तप नइ उपधान, जां जीमइ जासक धान,**
**तां आदर नइ मान, जां जीमइ जासक धान, तां लग सखा कान, जां जीमइ जासक धान,**
**तां लग मुहडइ वान, जां जीमइ जासक धान, जां पेट न पडइ रोटीयां,**
**तां सव्वेहि गल्लां खोटीयां " ॥२६॥**

ततः श्रीआचार्यैः विचारितम्—सत्यमेते वदन्ति। कोऽपि द्रव्योपायः कार्यः यथा संबलं भवति। सैन्यं चलति, कार्यसिद्धिर्भवति, परं किं कर्त्तव्यमिति चिन्तया निशि निद्रा न (ना)याति। तावत् शासनदेवता प्रगटीभूय प्रोवाच—हे भगवन्! चिन्ता मा क्रियताम्, एषा चूर्णकुम्पिका गृह्यतां यदुपरि वासः करिष्यते तत् सर्वं स्वर्णं भावि, इत्युक्त्वा गता। प्रभाते जाते श्रीसूरिभिः सर्वेऽपि राजान आहूताः, प्रोक्तं च—भो! कुत्रापि एक इष्टवाहको विलोक्यताम्। तैरासन्नस्थाने विलोकयद्भिः दृष्टः, गुरूणां दर्शितश्च। गुरुभिः विद्याबलेन देवेनादत्तचूर्णवासक्षेपप्रक्षेपणेन च सर्वोऽपीष्टवाहः स्वर्णीकृतः, पश्चाद् विभज्य सर्वेषां साखीराज्ञां प्रत्येकं स्वर्णेष्टिका दत्ता। ततो हर्षिताः संजातसंबलबलाः ते प्रयाणढक्कां दत्वा **मा**लवकदेशं प्रति प्रचेलुः। अग्रे गच्छद्भिः **लाट**देशस्वामिनौ श्रीआचार्यभागिनेयौ **बल**मित्र—**भा**नुराजौ अपि सार्थे गृहीतौ। ततो यावता श्री**का**लिकाचार्यसैन्यं **मा**लवकसीम्नि आगतं तावता **गर्द**भिल्लोऽपि राजा स्वसैन्यं मेलयित्वा प्रयाणढक्कां दापयित्वा सम्मुखमागत्य पतितः। अथ आदित्यवारे द्वयोरपि सैन्यं प्रयाणढक्कावादनपूर्वं च सम्मुखं चलितम्। तत्र केन प्रकारेण युद्धं जातं तत् श्रूयताम्—

"आम्हा साम्हा कटक आव्या चडी, फोजइ फोज अडी। बगतर नइ जीन साल, सुभटे पहिर्या तत्काल। माथइ धर्या टोप, सुभट चड्या सबल कोप, पांचे हथियार बांध्या, तीरे तीर सांध्या, अमल पाणि कीधा, भाजणरा सुंस लीधा। घोडे घाली पाखर, जाणे आडा आया भाखर, आगइ कीया गज उपरि फरहरइ धज, हमामे दीधी घाई, सूरवीर आया धाई, रणतूर वागइ, ते पिणि सिंधू [मइ] डारा गइ। ठाकुर बपु कारइ, वडवडा बापांरा बिरुद संभारइ। छूटइ नालि निपट

५२

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



थोड़ी विचाली, वहइ गोला लोक ल्यइ ओला, छूटइ कुहक बांण, कायरांरा पडइ प्राण, काबिली मीर नांखई तीर, मारइ भालारां बिचाविचि लागइ, बगतर भेदीनइ विच्चाविच्चि लागइ, खडगांरी खडाखडि वागी, भडाभडी गर्दभिल्लरी फोज भागी, सबल लोक लागी। हूंतउ जे सेनानी ते तउ धुरथी थयो कानी, जे हूंतउ कोटवाल ते तउ नासउ ततकाल, जे हूंतउ फोजदार तिणरइ माथे पडी मार, जे हूंता वागिया ते पिण भाजी(गी) गया अभागिया, जे हूंता मुहता ते नासी घरे पहुता, जे हूंता चउरासीया तीए दांते त्री(तृ)णां लीया, जे हूंता खवास तीए मूकी जीवारी आस, जे हूंता कायर, तिणनइ सांभरइ आपणी बायर। जे चडता वाहर ते हथियार छोडी थया काहर, जे ढोलरइ ढमकइ मिलता ते गया पासइ टलता, जे बांधता मोटी पाघडी ते ऊभा न रह्या एका घडी, जे हूंता एकएकडा तिणरे नाम दिया बेकडा, जे माथइ धरता आंकडा ते मुहडा कीया बांकडा, जे वणा(जा)वता सारंगी वांकी, तीए तउ रणभूमिका पण पाकी, जे बांधता बिहूं पासे कटारी, तीयांनइ नासतां भूमि भारी, जे पहिरता लांबा साडा तीए नासिते कोडि कीया पवाडा। गर्दभिल्ल नाठउ, बोल घणउ माठउ, गढमहि जई पइठउ, चिंता करइ बैठउ, पोलि ताला जडद्या, कालिकाचार्यना कटक चहुं दीसी विटी पडद्या॥

अथ उज्जयिनीनगरीमध्ये गर्दभिल्लो, बहिस्थात् श्रीकालिकाचार्यसैन्यम्—एवं कतिचिद् दिनेषु गतेषु साखीराजस्य सुभटा दुर्गस्य चतुर्दिक्षु भ्रमन्तो विलोकयन्ति परं दुर्गशीर्षोपरि तदीयं सुभटमात्रं न पश्यन्ति। ततस्तैरागत्य श्रीकालिका-चार्याणां विज्ञप्तम्—हे भगवन्! अद्य दुर्गोपरि न कोऽपि सुभटो दृश्यते, न कोऽपि युद्ध्यति च, तत् कथम्?। तेन ततः कालिकाचार्यैः सूपयोगं दत्वा, ज्ञात्वा च तेषां प्रोक्तम्—भो! अद्य कृष्णाष्टमी वर्त्तते, तेन गर्दभिल्लो गर्दभीं विद्यां साधयन्नस्ति। यूयं पश्यत, यदि कुत्रापि दुर्गोपरि बहिर्मुखा गर्दभी स्थिता भवति, तदा सत्यम्। तैः विलोकयद्भिः सा तथैव दृष्टा। तत आगत्य प्रोक्तं च—हे भगवन्! भवतां वचनं सत्यं जातम्, अस्माभिः सा तथैव दृष्टा। ततो गुरुभिः प्रोक्तम्—शृण्वन्तु एतत्परमार्थम्, एषा विद्या संपूर्णा सिद्धा भविष्यति तदा सा गर्दभी शब्दं करिष्यति, तच्छब्दं ये शत्रवः श्रोष्यन्ते, ते मुखाद् रुधिरं वमन्तो भूमौ पतिष्यन्ति मरिष्यन्ति वा। एतां वार्त्तां श्रुत्वा साखीराट्प्रमुखा भयभ्रान्ता विज्ञपयन्ति स्म—हे भगवन्! कोऽप्युपायः कर्त्तव्यः येन तद्विद्या न प्रभवति। ततः श्रीकालिकाचार्यैः प्रोक्तम्—सर्वमपि निजसैन्यं कोशपञ्चकं दूरे स्थापयन्तु, मम च पार्श्वे शब्दवेधिसुभटानामष्टोत्तरशतं सावधानीभूय तिष्ठतु। यदा चैषा रासभी शब्दकरणाय मुखं प्रसारयति तदा समकाल-मष्टोत्तरशतबाणैस्तूणीरवत् तस्या मुखं पूरणीयम्, यथा सा शब्दं कर्तुं न शक्नोति, विद्या च न प्रभवति। ततो गुरुवचः प्रमाणयद्भिस्तैस्तथैव चक्रे। उच्चस्थाने स्थित्वाऽऽकर्णान्तबाणानाकृष्य शब्दकरणसमये तस्या मुखं पूरितम्। ततः सा रुष्टा सती गर्दभिल्लमस्तके विष्ठां कृत्वा लत्तां दत्वाऽऽकाशे उत्पत्य गता। ततो सुभटाश्च प्रतोलीं भङ्क्त्वा मध्ये गत्वा गर्दभिल्लं वामबाहुभ्यां बद्ध्वा श्रीकालिकाचार्याग्रे मुक्तवन्तः सोऽप्यधमो नीचैर्भूमौ वीक्षते स्म। ततो गुरुभिः प्रोचे—रे दुष्ट! पापिष्ठ! निकृष्टबुद्धे! किं ते कुकर्माचरितम्?। दुरात्मन्! महासतीशीलचरित्रभङ्गपापद्रुमस्येदमिहास्ति पुष्पम्, परं फलं तु परत्र नरकादिदुःखं प्राप्स्यसि। अरे वराक! अद्यापि किमपि विनष्टं नास्ति, सर्वपापक्षयकरं चारित्रं गृहाण, यथा सुखी भविष्यसि, इत्यादि बहव उपदेशाः सूरिभिर्दत्ताः, परं पापात्मा न प्रतिबुद्ध्यते, यतः—

**उवएससहस्सेहि वि, बोहिज्जंतो न बुज्झइ कोई।**
**जह बंभदत्तराया, उदायिनिव मारउ चेव ॥२७॥**

अथवा काको धौतो दुग्धेनापि धवलतां न प्राप्नोति, अथवा मुद्गशैलः पुष्करावर्त्तमेघप्लावितोऽपि नार्द्रीभवति, अथवोषरक्षेत्रे उप्तान्यपि बीजानि नोद्गच्छन्ति, अथवा कूर्मकायः प्रहारशतैरपि न भेत्तुं शक्यते, अथवा बधिरस्य ग्रन्थकोटि-श्रवणेऽपि नावबोधो जायते, अथवा विषममृतमिश्रितमपि न मृष्टं भवति, अथवा लशुनं कर्पूरवासितमपि न सुगन्धं स्यात्,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वन्ध्याया वा बहूपचारैरपि न संतानप्राप्तिः, खलो वा सत्क्रियमाणोऽपि न मैत्रीभावं भजते। एवं गर्दभिल्लो गुरुकर्मत्वाद् बहु प्रतिबोध्यमानोऽपि न धर्मं धत्ते स्म । ततो भूपैः मर्थ्यमाणोऽपि गुरुभिः कृपया देशत्यागं कारितः ।

ततः कालिकाचार्या यस्य गृहे उषिता आसन् तस्योज्जयिनीराज्यं दत्तम् । अन्येषां च ९५ पञ्चनवतिभूपानां मालवकदेशो विभज्य यथार्हं दत्तः । ततः सरस्वतीसाध्वी अपि आलोचनां दत्वा तपः कारयित्वा गच्छमध्ये आनीता । स्वयमपि कालिकाचार्याः स्वारम्भमपापमालोच्य निरतिचाराः सन्तः स्वगच्छभारं बिभराम्बभूवुः । न च वाच्यमेतादृशमहारम्भकरणेन तेषां विराधकत्वम् । यत उक्तं सिद्धान्ते—

> संघाइयाण कज्जे, चुण्णिज्जा चक्कवट्टिसिन्नं पि ।
> कुविओ मुणी महप्पा, पुलाइलद्धीइ संपन्नो ॥२८॥

अथवा विष्णुकुमारेणापि साधुप्रत्यनीको नमुचिः हतः(१) । अपि चाचार्यरक्षां कुर्वद्भिः रात्रिप्रतिजागरिकैश्चतुर्भिः साधुभिः यामचतुष्टये चत्वारः सिंहा व्यापादिताः (२) । अथवा साधुभिः परस्परं क्रियमाणमत्स्योत्पत्त्याम्नायवार्तां श्रुत्वा प्रभूतमत्स्योत्पादकं मात्सिकं वैक्रियसिंहेन हतवन्तः साधवः (३) । पुनरपि आगामिभवे सुमङ्गलसाधुः साधुप्रत्यनीकं विमलवाहनं सवाहनं भस्मसात् करिष्यति मोक्षं च यास्यति (४)—इत्यादयो बहवो दृष्टान्ता वाच्याः, इति जिनशासनप्रत्यनीकोच्छेदनेन महाप्रभावकाः श्रीकालिकाचार्याः संजाताः ॥

( २ )

अथ तस्मिन्नवसरे भृगुकच्छनगरे श्रीकालिकाचार्यभागिनेयौ बलमित्र—भानुमित्रराजौ स्तः । ताभ्यां निजसेवकान् मुक्त्वा श्रीगुरूणामेवं विज्ञप्तम्—हे भगवन् ! श्रीमद्भिः कृपां कृत्वाऽत्र समागम्यताम्, बहुजीवप्रतिबोधेन महान् लाभो भविष्यति । ततः श्रीपूज्या विज्ञप्तिमवधार्य लाभं च विभाव्य, ग्रामानुग्रामं विहरन्तो भृगुकच्छनगराभ्यर्णे समाजग्मुः । बलमित्र—भानुमित्राभ्यामपि सम्मुखमागत्य महताऽऽडम्बरेण प्रवेशोत्सवं कृत्वा धर्मशालायामुत्तारिताः । अथ राजा प्रत्यहं जैनधर्ममर्माणि शृणोति, हृष्टः सन् मध्येसभायां जिनधर्मं प्रशंसति, वक्ति च—अहो ! अद्य काले बहवो धर्माः सन्ति, परं हिंसादिदोषदुष्टत्वात् पाखण्डरूपाः, परं जिनधर्मसमानो न कोऽपि दयामयो धर्मः—इत्यादि जिनधर्मप्रशंसां श्रुत्वा पुरोहितमस्तके शूलमुत्थितम्, विचारितं चानेन—अहो ! राजा मा जैनधर्मी भवतु, तथा च सति मम वृत्तिभङ्गो भविष्यति । ततो वादं कृत्वा [एनं] मानभ्रष्टं करोमि—इति सभासमक्षं वादे कृते गुरुभिः जीवादितत्त्वप्रश्नोत्तरैः निरुत्तरीकृतः । परमन्तर्दुष्टो जानाति—कथमप्ययमाचार्य इतो विहृत्यान्यत्र याति तदुपायं करोमि—इति विचार्य राज्ञोऽग्रे प्रोवाच—हे राजन् ! एते आत्मीया महान्तो गुरवः एतेषामरसविरसाद्याहारो न देयः, यतः पापं लगति । ततः श्रावकानाहूय प्रच्छन्नं वाच्यम्, यदुत गुरूणां क्षीर—खाण्ड—घृत—मोदक—घृत—पूर—कुण्डलाकृतिप्रभृतिमिष्टान्नपानाहारो देयः । यद् विलोक्यते (युज्यते) तद् मम भाण्डागाराद् ग्राह्यम् । ततो राज्ञाऽपि परमभक्तेन तथैव कारितम् ।

अथान्यदा यतयो गोचरीं गच्छन्ति तदा प्रतिगृहं श्रावका मृष्टान्नपानैः प्रतिलाभयन्ति । एकदा गोचरीगतान् साधून् प्रति बालकाः प्रोचुः—भो यतयः ! यूयं वरमिहागताः, चिरं च स्थातव्यम्, भवदर्थं क्रियमाणमृष्टान्नपानेनास्माकमपि मुखं मृष्टं जायते । अथ श्रीगुरुभिरपि उपयोगो दत्तः, सांप्रतं कथं श्रावका विशेषपर्वं विनाऽपि मृष्टान्नपानादि प्रयच्छन्ति ! । ततो ज्ञातं जैनद्वेषिणा पुरोहितेनैषाऽनेषणा व्यधायि । ततः "संकिलेसकरं ठाणं दूरओ परिवज्जए" इति विचार्य भृगुकच्छपुराद् विहृत्यान्यत्र देशेषु संयमं प्रतिपालयन्ति स्म । अत्रैकस्यां संस्कृतकथायां "मगहेसु" [ अस्मन्नेव संग्रहे ५२ पृष्ठे श्रीधर्मघोषसूरिकृतायां पञ्चमी ]कथायां च बलमित्र—भानुमित्रयोः सम्बन्ध एवम्—उज्जयिन्यां बलमित्र—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**भानु**मित्रराजानौ बभूवतुः । तदाग्रहात् श्री**का**लिकाचार्याश्चतुर्मास्यां तत्र तस्थुः । तत्र च स्वभगिन्याः पुत्र्याः पुत्रं ततो भागिनेयं च **बल**भानुनामानं तयोरनुमतिं विनाऽपि प्रव्राजयामासुः । ततो **बल**मित्र–**भानु**मित्रादयो विमनस्का जाताः । अग्रे सम्बन्धः सदृश एव, परं तत्त्वं तत्त्वविदो विदन्तीति–इत्युक्ता एके श्री**का**लिकाचार्याः ॥

( ३ )

अथ ये श्री**का**लिकाचार्याः श्री**वी**रनिर्वाणात् ९९३ वर्षे जातास्ते विहरन्तो दक्षिणदेशे **प्र**तिष्ठानपुरे जग्मुः । तत्र **शा**लिवाहननामा राजा जैनः परमश्रावको यतिभक्तो राज्यं करोति । गुर्वागमनं श्रुत्वा हृष्टः सन् गुरोः समीपे गत्वा वन्दित्वाऽत्याग्रहं कृत्वा गुरवश्चतुर्मास्यां स्थापिताः । अथ राजा सदा धर्मोपदेशं शृणोति, गुरुभक्तिं च करोति, देवगृहेषु स्नात्रमहोत्वाः क्रियन्ते । एवं च सति श्रीपर्युषणापर्वाख्यासन्नं समागतम्, तदा राज्ञा पृष्टम्–हे भगवन् ! श्रीपर्युषणापर्व कदा भावि ? । तदा गुरुभिः प्रोचे–भाद्रपदसुदिपञ्चम्यां भविष्यति । तदा राजा प्राह–हे स्वामिन् ! पञ्चम्यामस्माकं कुलक्रमागतः इन्द्रमहोत्सवः, स त्ववश्यं कर्त्तव्य एव । एकस्मिन् दिने तु पर्वद्वयं कर्तुं न शक्यते, परस्परं भिन्नाचारत्वात् । ततः प्रसादं कृत्वा श्रीपर्युषणापर्व षष्ठ्यां क्रियते । तथा पूजास्नात्र-पौषधादीनि धर्मकृत्यादीनि प्रभूतानि भवन्ति । ततो गुरुभिः प्रोचे–हे राजेन्द्र ! पञ्चमीरात्रिमुल्लङ्घ्य न कदापि पर्युषणा भवति । यदुक्तम्—

**अवि चलइ मेरुचूला, सूरो वा उग्गमेइ अवराए ।**
**न य पंचमीइ रयणिं, पज्जोसवणा अइक्कमइ ॥२९॥**

**कल्प**सूत्रेऽपि—

**"नो से कप्पइ तं रयणिं उवाइणावित्तए"**

ततो राज्ञा प्रोक्तम्–हे पूज्य ! तर्हि चतुर्थ्यां क्रियताम् । ततः श्री**का**लिकाचार्यैः—**"अंतरा वि य से कप्पइ"**— इति श्री**क**ल्पसूत्राक्षरदर्शनेन **सा**तवाहनराजाग्रहाच्च पञ्चमीतश्चतुर्थ्यां पर्युषणापर्व प्रवर्तितम् । तद्वशेन च चतुर्मासिकं चतुर्दश्यां जातम्, अन्यथाऽऽगमोक्तं पञ्चदश्यामासीत् । तदानीं तेन समस्तसंघेनापि प्रमाणीकृतम् । यदुक्तं **ती**र्थोद्गालिप्रकीर्णके—

**तेणउ य नवसएहिं, समइक्कंतेहिं वद्धमाणाओ ।**
**पज्जोसवणचउत्थी, कालिगसूरीहिं तो ठविया ॥३०॥**
**वीसहिं दिणेहिं कप्पो, पंचगहाणी य कप्पठवणा य ।**
**नवसयतेणउएहिं, वुच्छिन्ना संघआणाए ॥३१॥**
**सालाहणेण रन्ना, संघाएसेण कारिओ भयवं ।**
**पज्जोसवणचउत्थी, चाउम्मासं चउद्दसिए ॥३२॥**
**चउमासपडिकमणं, पक्खियादिवसम्मि चउविहो संघो ।**
**नवसयतेणउएहिं, आयरणं तं पमाणंति ॥३३॥**

पुनरपि **स्था**नाङ्गवृत्तौ—**"एवं च कारणेणं अज्जकालगायरिएहिं चउत्थीए पज्जोसवणं पवत्तियं समत्तसंघेण य अणुमन्नियं, तव्वसेण य पक्खियाई वि चउद्दसीए आयरियाणि, अन्नहा आगमुत्ताणि पुण्णिमाए त्ति"** । न च तस्मिन्नेव वर्षे **सा**तवाहनजीवनावधि वा तत् पर्युषणापर्व चतुर्थ्यां कृतम्, पश्चात् पुनरपि पञ्चम्यामेवाभवदिति वाच्यम् । **"इयाणिं कहं च अपव्वे चउत्थी पज्जोसविज्जइ"** इति शिष्यपृच्छायां गुरुवचनावसरे **"एवं च जुगप्पहाणेहिं चउत्थी कारणे पवत्तिया सा चेव अणुमया सव्वसाहूणं"** इति श्रीकालिकाचार्यानन्तरं पश्चात्कालभावि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निशीथचूर्णिकारोक्तदशमोद्देशकचूर्णिवचनाद भाद्रपदसुदिचतुर्थ्यामेव पश्चादपि श्रीपर्युषणापर्वाभूत् । तत्परम्परया च सांप्रतमपि चतुर्थ्यां क्रियमाणमस्ति–इति सम्यक् समाधानम् ॥

( ४ )

अथ श्रीकालिकाचार्याः सुखेन संयमं पालयन्तस्तत्र तिष्ठन्ति, परं कालवशेन शिष्याः प्रमादिनो जाताः । गुरुभिः बहुप्रेरिता अपि गलितगाव इव न क्रियानुष्ठानादिकं कुर्वन्ति । ततः श्रीकालिकाचार्याः शय्यातरश्रावकस्य सर्वां वार्तां कथयित्वा शिष्यान् सुप्तानेव मुक्त्वा स्वयमेकाकिन एव स्वर्णपुरे नगरे सागरचन्द्राचार्यस्य निजपौत्रस्य प्रशिष्यस्योपाश्रये गत्वैकदेशं मार्गयित्वा तस्थुः । परं न केनापि उपलक्षिताः । प्रभाते सागरचन्द्रेण समग्रतो विशेषतो नानारागालापेन मधुरध्वनिना महताऽऽडम्बरेण व्याख्यानं कृत्वा पृष्टम्–अहो वृद्ध ! कथय मया कीदृशं सभारञ्जनं(कं) व्याख्यानं कृतम् ? । ततः कालिकाचार्यैः प्रोक्तम–भव्यं कृतम् । ततः सागरचन्द्रेण साहङ्कारेण प्रोक्तम्–अहो वृद्ध ! तव कोऽपि सिद्धान्ते यदि संदेहो भवेत् तदा पृच्छ । तदा कालिकाचार्यैः प्रोक्तम्–धर्मं श्रद्दधानैरपि तदगर्वोत्तारणार्थम्–धर्मोऽस्ति किं वा नास्ति –[ इति पृष्टम् ] । तेनोक्तम्–धर्मोऽस्ति । कालिकाचार्यैः प्रोक्तम्–धर्मो नास्ति । अत्र द्वयोरपि महान् तर्कवादो जातः । धर्मस्थापनोत्थापनयोरनेकशो युक्तयः सन्ति, ताः तार्किकैः स्वयं वाच्याः । मया ग्रन्थगौरवभिया न लिखिताः । [ अत्र स्थाने बृहत्खरतरगच्छीयसाधुभिः परस्परं तर्कवादो विधीयते, कृते श्रुते च तस्मिन् वर्षं यावत् परमश्रेयो भवति, इति प्रवर्त्तमानपरम्परा दृश्यते ] । तथाकृते वादे श्रीकालिकाचार्यैः सागरचन्द्रो जितः । ततस्तेन ज्ञातम्–नायं वृद्धः सामान्यः, किन्तु कोऽपि सातिशयी वर्त्तते ।

इतश्च पृष्ठतः प्रमादिनः शिष्याः दिनोदये सुप्तोत्थिताः स्वगुरुमपश्यन्तो विलक्षणाः सन्तः परस्परं पृच्छन्ति । तदवसरे शय्यातरश्रावकेणोक्तम्–रे कुशिष्याः यूयं गुरुशुद्धिमपि न जानिथ ? तदात्याग्रहेण पृष्टेन शय्यातरश्रावकेण प्रोक्तम्–गुरवः सागरचन्द्रपार्श्वे स्वर्णपुर्यां गताः । ततः सर्वेऽपि शिष्याः संघाटकत्रयं कृत्वा स्वर्णपुरं प्रतिचलिताः, पथि लोकाःपृच्छति–। क्व श्रीकालिकाचार्याः ? । पृष्ठगा वदन्ति–अग्रे, अग्रगा वदन्ति–पृष्ठे समागच्छन्ति । एवं ते तत्र प्राप्ताः । सागरचन्द्रोऽपि गुर्वागमं श्रुत्वा सम्मुखं चलितः, पृष्टं च–क्व गुरवः ? । तैरुक्तम्–ते तु तव पार्श्वे पूर्वमागताः सन्ति । ततो ज्ञातम्–हुं ते एव । ततः सर्वशिष्यैः सागरचन्द्रेण तत्रागत्य वन्दिताः क्षामिताश्च । अत्र सर्वेऽपि सुखेन सयमं पालयन्तस्तिष्ठन्ति ॥

( ५ )

अथ तदवसरे श्रीसीमन्धरस्वामिपार्श्वे गत्वा निगोदविचारान् श्रुत्वा प्रोवाच–हे स्वामिन् ! एतादृशं निगोदविचारं कोऽपि भरतक्षेत्रे जानाति ? । भगवता प्रोक्तम्–भरतक्षेत्रे प्रतिष्ठानुपुरे कालिकाचार्यः । तत इन्द्रो ब्राह्मणरूपं कृत्वाऽगत्य पृच्छति स्म–हे भगवन् ! निगोदविचारं वदत । गुरुभिः प्रोक्तम्—

**गोला य असंखिज्जा, असंखनिग्गोयओ हवइ गोलो ।**
**इक्किक्कम्मि निगोए, अणंतजीवा मुणेयव्वा ॥३४॥**

इत्यादिसूक्ष्मविचारगहनं श्रुत्वेन्द्रो हर्षं प्राप्य हस्तं दर्शितवान्–हे भगवन् ! ममायुः कियदस्ति ? । स्तोकं स्यात् तदा मरणं साधयामि । ततो गुरुभिः विलोकितम्–वर्षशतात् सहस्राल्लक्षात् कोटितोऽप्यधिकम् । ततो सागरोपमस्वरूपं दृष्ट्वा उक्तम्–हे इन्द्र ! धर्मलाभोऽस्तु । तत इन्द्रः प्रकटीभूय दशदिश उद्योतयन् वन्दित्वाऽस्तवीत् । हे पूज्य ! सीमन्धर-स्वामिना त्वं निगोदविचारपारगः कथितः, स प्रत्यक्षं दृष्टः, इत्युक्त्वा गच्छन् गुरुणोक्तः–गोचरीगताः शिष्या आगच्छन्ति तावत् तिष्ठ, तेऽपि त्वां सहर्षं पश्यन्ति । इन्द्रेणोक्तम्–मद्रूपमोहिता मा निदानं करिष्यन्ति । उपाश्रयद्वारं परावृत्य देवलोकं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गतः । शिष्या आगता द्वारमपश्यन्तः शब्दं कुर्वन्तो नऽन्यद्वारेण गुरुणा प्रवेशिताः । शिष्यैः विज्ञप्तम्–कथमेतत्? । गुरुभिः सर्वमिन्द्रस्वरूपं निवेदितम् ।

ततः श्रीकालिकाचार्याश्चिरं निर्मलं चारित्रं प्रतिपाल्य प्रान्तेऽनशनं विधाय समाधिना देवलोकं प्राप्ताः । ततः श्रीकालिकाचार्या महाप्रभावकाः स्थविरा बभूवुः तेषां सम्बन्ध उक्तः ।

अथ प्रभाते साधुसामाचारी वक्ष्यते–सा वर्त्तमानयोगेनैवम्–एके दानं ददति, एके शीलं पालयन्ति, एके तपस्तपन्ति, एके भावनां भावयन्ति, स विधिचैत्यालयपूज्यमानश्रीशान्तिनाथशासनाधीश्वरश्रीवर्धमानतत्पट्टानुक्रमेण श्रीसुधर्मस्वामी तावद् यावद् युगप्रधानश्रीजिनचन्द्रसूरि-श्रीजिनसिंहसूरीणां प्रसादः, तेषामाज्ञया च श्रीसंघः प्रवर्त्ततताम् ॥

श्रीमद्विक्रमसंवति, रस-र्तु-शृङ्गारसंख्यके सहसि (१६६६) ।
श्रीवीरमपुरनगरे, राउलनृपतेजसीराज्ये ॥३५॥
श्रीबृहत्खरतरगच्छे, युगप्रधानसूरयः ।
जिनचन्द्रा जिनसिंहाश्च, विजयन्ते गणाधिपाः ॥३६॥
तच्छिष्यः सकलचन्द्रः, शिष्यः समयसुन्दरः ।
कथां कालकसूरीणां, चक्रे बालावबोधिकाम् ॥३७॥

इति कालिकाचार्यकथा समाप्ता ॥ ग्रन्थाग्रम्–४४१ ॥

## [२४]

### अज्ञातसूरिविरचिता

# कालिकाचार्यसंक्षिप्तकथा ॥

जीयात् स कालकाचार्यः, प्रभावकशिरोमणिः ।
पञ्चमीतश्चतुर्थ्यां यश्चक्रे पर्युषणामिमाम् ॥१॥
पुरा पुरे धरावासे, विस(शु)द्धासव(श्रय)वद्वशी ।
वैरिसिंहो नृपोऽस्य स्त्री, शचीव सुरसुन्दरी ॥२॥
कलानिधिः शशीवासीत्, तत्पुत्रः कालकाह्वयः ।
सरस्वतीव (च) तत्पुत्री, प्रत्यक्षेव सरस्वती ॥३॥
निवृत्तो वाह्यकेलीतो, योधपञ्चशतीयुतः ।
वने गुणाकरं सूरिं, सत्याख्यं स निरैक्षत ॥४॥
उपाविशद् गुरुर्जीवयौवनस्नेहसंपदः ।
कुशाग्रजलवल्लोला, ज्ञात्वा स्वोचितमाचर ॥५॥
तद्देशनासुधापानशान्ताज्ञानगरव्यथः ।
सरस्वती-भटान्वितः, कालकोऽकलयद् व्रतम् ॥६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रुताब्धिपारदृश्वत्वं, तस्यामृत गुरोरिव ।
चकाराचार्यकं सूरिः, सत्पात्रं को हि नार्हति ? ॥७॥
विहरन् स क्रमात् प्राप, गुरुरुज्जयिनीं पुरीम् ।
घनागमाद् बर्हिणवत्, संघः प्रीतस्तदागमा(म)त् ॥८॥
गुरुं नत्वा स वसतिं, संश्रयन्तीं सरस्वतीम् ।
दृष्ट्वा कामान्धलो गर्दभिल्लो भिल्ल इवाहरत् ॥९॥
तद्रूपमूढः सोऽध्यासीत्, कामो नूनं न जीवति ।
कुतोऽन्यथाऽसौ प्राव्राजीद्, रूपाद् रतिरिवापरा ॥१०॥
तपस्विनीममुञ्चन्तं, संघोक्त्याऽपि नृपं विदन् ।
तदुन्मूलनमाध्याय, शकदेशाश्रितः प्रभुः ॥११॥
तस्मात् तत्सैन्यमानीय, सूरिः कनकतोषितम् ।
दूतेनाजूहवद् गर्दभिल्लं मल्लं जगत्यपि ॥१२॥
बाणाबाणि खड्गाखड्गि, कुन्ताकुन्ति गदागदि ।
यष्टायष्टि मुष्टामुष्टि, योधा युयुधिरे क्रुधा ॥१३॥
शस्त्रैः शितैश्चूर्णपेषं, पिबन्तां(तां) द्विषतां मिथः ।
रणाद्रेः प्रासरन् रक्तसरितः कुलमुद्वहाः ॥१४॥

( २ )

गुरुर्भृगुपुरं प्राप्तः, स्वभागिनेयनृपाग्रहात् ।
प्राव्राजयद् बलभानुकुमारं मारसन्निभम् ॥१५॥

( ३ )

ततः प्रतिष्ठानपुरे, शातवाहनवाक्यतः ।
पञ्चमीतश्चतुर्थ्यह्नि, प्रभुः पर्युषणां व्यधात् ॥१६॥
अन्वमन्यत संघोऽपि, गीतार्थैश्चीर्णमित्यदः ।

( ४ )

शिष्यापमाननात् सूरिं, सागरेन्दुं गुरुर्गतः ॥१७॥
अखर्वगर्वं तं सूरिं, विद्याराजादिपूजनात् ।
प्रभुः प्रबोधयामास, सिकताप्रस्थदर्शनात् ॥१८॥

( ५ )

प्रतिष्ठानपुरं प्राप्तो, निगोदानां स्थितिं श्रुतात् ।
उक्त्वा शक्राय गतवान्, स्वर्गं कालकसूरिराट् ॥१९॥

इति श्रीकालिकाचार्यकथानकं समाप्तम् ॥छ॥

१—धारावासनगरे वैरसिंहो राजा । एतस्य सुरसुन्दरीभार्या । कालककुमारः सरस्वती पुत्री ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२–एकदा उद्यानवने श्रीगुणाकरसूरिसमीपे कुमारेण व्रतं जग्रहे सरस्वतीस्वस्रा सह ।

३–उज्जयिन्यां गर्दभिल्लराजा ।

४–शककूलदेशे साहाणुसाहिभृत्यशाखिनः ९६ सुराष्ट्रायां प्राप्ताः । तत्र सुवर्णसिद्धियोगाद् मालवकं प्राप्य गर्दभिल्लो जितः ।

५–भृगुकच्छे सूरिभागिनेयौ द्वौ बलमित्रभानुमित्रौ नृप-युवराजजातौ । भानुश्रीनाम्नी राजभगिनी, तत्पुत्रो बलभानुः स च सूरिणा दीक्षिता(तः) ॥ श्रीरस्तु

६–नृपमन्त्री–मतिसागरः स च मिथ्यात्वी । प्रतिष्ठानपुरे सातवाहनो राजा तत्सांनिध्यतः पर्युषणापर्वाभवत् चतुर्थ्याम् ।

७–कनकदेशे रत्नाकरसूरिशिष्यसागरचन्द्रसूरि ।

८–प्रतिष्ठानपुरे श्रीकालकाचार्यसमीपे इन्द्रसमागमः ।

९–इहलोक-परलोके नित्यानित्यलक्षप्रमाणद्वयशुद्धं जिनमतं मन्यमानो द्वितीयप्रभावनां कृतवान् ।

१०–उभयकुलविशुद्धः पुमान् श्राद्धवर्गः सम्यग् भवति ।

११–"उप्पन्नए वा विगमे वा धुवे वा" इति सिद्धान्तप्ररूपणात् ज्ञानदर्शनचारित्ररत्नमेव सारं तत्प्राप्त्यर्थं तृतीयां प्रभावनां रचयामास सादरः श्रावकः ।

१२–धर्म्मार्थकाममोक्षसाधकाःदानशीलतपोभावनापरायणाःक्रोधमानमायालोभभञ्जनकामाःसन्तश्चतुर्थप्रभावनां कारयन्ति श्रावकाः ॥ श्रीः ॥

१३–क्षायिक-क्षयोपशमिक-औपशमिक-औदयिकलक्षण-सम्यक्त्वपञ्चकं पञ्चश(स)मिति-पञ्चमहाव्रतपालक-तपोधनानाराधयितुं नराः पञ्चमीं प्रभावनां कुर्वन्ति ॥ श्रीरस्तु ॥

[२५]

## मलधारिहेमचन्द्राचार्यविरचितापुष्पमालान्तर्गतं

# कालिकाचार्यकथानकम् ॥

इह सत्यवादिनो द्विधा–लोकोत्तरो लौकिकश्च । तत्राऽऽद्यसमर्थनार्थं तावदुदाहरणमाह—

मरणे वि समावडिए, जंपंति न अन्नहा महासत्ता ।
जन्नफलं निवपुट्ठा, जह कालगसूरिणो भयवं ॥१॥

अक्षरार्थः प्रकट एव ।

के पुनरमी भगवन्तः कालकाचार्याः, कथं च ते यज्ञफलं नृपेण पृष्टा इति कथानकेनोच्यते—

कण्हतणु व्व सुसिरिया, बहुनरसंतोसया सुविलया य ।
नयरी नामेणं तुरुमिणि त्ति भरहम्मि सुपसिद्धा ॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जियसत्तू तत्थ निवो, जलहि व्व न दीणभावमणुपत्तो ।
भद्दाए माहणीए, सुओ य दत्तो तहिं वसइ ॥२॥
विप्पो वि पियइ मज्जं, रमइ य वेसासु कीलए जूयं ।
खुद्दो रुद्दो भीमो, केवलदोसालओ सो य ॥३॥
ओलग्गिउं पयट्टो, कहमवि सो अन्नया महीनाहं ।
उज्जुअयाए तेण वि, दिट्ठो अइगुरुपसाएण ॥४॥
अहमेहेण वसित्तो, एसो विसपायवो व्व वित्थरिओ ।
लुंटतो पगईओ, जाओ य कमेण सामंतो ॥५॥
तो भेयं दाऊणं, संगहिया तेण सयलसामंता ।
रज्जं पि तओ गहियं, अवहत्थेऊण जियसत्तुं ॥६॥

अथवा—

उवयरमाणाण वि सज्जमाणाण विहडइ खलो खणद्धेण ।
दुद्धाइदाणओ पोसिओ वि डसइ च्चिय भुयंगो ॥७॥
अवयरइ निव्वियारे वि, सज्जणे दुज्जणो हयसहावो ।
अमयमओ वि मयंको, गसिज्जए जं विडप्पेण ॥८॥
पीणेइ सप्पणी जो य, हुयवहो दहइ तं पि हु अणज्जो ।
अहवा को दुज्जणविलसियाण जाणिज्ज सीमंतं ॥९॥
निस्सारिऊण मुक्को, अह जियसत्तू वि वयइ अन्नत्थ ।
एसो य कुणइ रज्जं, जण्णे य जयावए बहुए ॥१०॥
तस्स य माउलओ, विहरमाणओ कहवि तत्थ संपत्तो ।
कालगसूरी नामं, आयरिओ बहुगुणग्घविओ ॥११॥
नियधम्मेण तुट्ठो, राया गंतूण ताण पासम्मि ।
पुच्छइ मामग ! साहसु, जण्णाणं किं फलं होइ ? ॥१२॥
तो तेहिं चिंतियं ताव, जिणमयं अन्नहा न कहियव्वं ।
अवितहकहणे उण, कम्मबंधमेसो बहुं कुणइ ॥१३॥
तावक्खेवो जुत्तो, एत्थं ति विचिंतिऊण तो भणियं ।
धम्मस्स फलं नरवइ !, सग्गापवग्ग त्ति सुपसिद्धं ॥१४॥
पुच्छामि न धम्मफलं, जण्णफलं कहसु तेण इति भणिए ।
पुणरवि भणइ सूरी पंथो निरयाण वि अहम्मो ॥१५॥
को तुममेयं पुच्छइ, जण्णफलं कहसु आह तह वि गुरू ।
असुहाण वि कम्माणं, उदओ निरयाइ दुहजणओ ॥१६॥
एवं भणिओ वि पुणो वि पुच्छए सो निवो पयंपंतो ।
साहिक्खेवं वयणं, तत्तो सूरी वि चिंतेइ ॥१७॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रक्खंति कम्मबंधं, परस्स सक्कं बुहा विना सक्कं ।
एसो य निवो भवियव्वयाइ आलिंगिओ नूणं ॥१८॥
ता साहेमि जहत्थं ति, चिंतिउं भणइ नरवर सुणेसु ।
पसुघायकारणेणं, जण्णाण फलं महानरया ॥१९॥

यतः प्रोक्तं व्यासेन—

"ज्ञानपालिपरिक्षिप्ते, ब्रह्मचर्यदयाम्भसि ।
स्नात्वाऽतिविमले तीर्थे, पापपङ्कापहारिणि ॥२०॥
ध्यानाग्नौ जीवकुण्डस्थे, दममारुतदीपिते ।
असत्कर्मसमित्क्षेपैरग्निहोत्रं कुरूत्तमम् ॥२१॥
कषायपशुभिर्दुष्टैर्धर्मकामार्थनाशनैः ।
शममन्त्रहुतैर्यज्ञं, विधेहि विहितं बुधैः ॥२२॥
छिन्धि तृष्णालतागुल्मं, भिन्दि संसारपञ्जरम् ।
सदानन्दसुखं नित्यं, ततो व्रज परं पदम् ॥२३॥
प्राणिघातात् तु यो धर्ममीहते मूढमानसः ।
स वाञ्छति सुधावृष्टिं, कृष्णाहिमुखकोटरात्" ॥२४॥

इत्यादि ॥

अह कुविओ सो राया, भणइ नरयम्मि मज्झ गंतव्वे ।
को पच्चओ त्ति साहसु, भो पव्वइयग विचिंतेउं ॥२५॥
तो भणियं सूरीहिं, तुममेत्थि वि तत्ततिल्लकुंभीए ।
नरवर सत्तमदियहे, सुणएहि समं खिविज्जहसि ॥२६॥
को पच्चओ इहं पि हु, तो भणियं सूरिणा तुह मुहम्मि ।
पढमं चिय तत्थ दिणे, असुईकत्तो चिए विसिहिई ॥२७॥
तो भणइ निवो कुविओ, मरिहसि तं दुट्ठ! कस्स हत्थेण ।
आह मुणी न कस्सइ, सुइरं तु वयं चरिस्सामि ॥२८॥
रुंधाविऊण सूरिं, सव्वत्तो नियनरेहिं तो राया ।
अइकोवमुव्वहंतो, गिहं गओ तेण वि समग्गा ॥२९॥
सामंता नियदुट्ठत्तणेण, उव्वेइया अईवदढं ।
मंतेऊणं तं चिय, छन्नं आणंति जियसत्तुं ॥३०॥
एत्तो य दत्तराया, कोवत्तरिउ चि सत्तमदिणम्मि ।
अट्ठमयं मन्नंतो, नीहरइ गिहाउ तुरयगओ ॥३१॥
सव्वेहिं वि सामंतेहिं, परिगओ जाव येवदूरम्मि ।
वच्चइ मुणिवहणत्थं, कुविओ ता घोडयखुरेण ॥३२॥
असुई उक्खित्ता निवमुहम्मि पडिया पहम्मि सहस त्ति ।
नूणं दिणाण भुल्लो, संभंतो चिंतिउं निवई ॥३३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जा वालइ नियतुरयं, भीया ते ताव सयलसामंता ।
कत्तो वि मंतभेओ, नूणं जाओ त्ति मन्नंता ॥३४॥
बंधेऊणं घल्लंति तं निवं तत्ततेल्लकुंभीए ।
गलए य तस्स सुणए, खिवंति तह बंधिउं बहवे ॥३५॥
हेट्ठा य हुयवहं जालयंति ते डज्झमाणया सुणया ।
खंडाखंडि निवइं, कुणंति सययं चडपाडंता ॥३६॥
अह मरिउं सो दत्तो, निरयं पत्तो अईवदुक्खत्तो ।
सूरी पुण विहरेउं, सुदरं पच्छा गओ ति दिवं ॥३७॥

इत्यवितथजिनमतप्ररूपक—कालिकाचार्यकथानकं समाप्तम् ॥छ॥

# [२६]

## श्रीशुभशीलगणिविरचिता
## भरतेश्वर-बाहुबलीवृत्त्यन्तर्गता

# कालिकाचार्यकथा।

[ रचनासंवत् १५०९ ]

दत्तेन भूभुजा यागफलं पृष्टोऽन्यदा हठात् ।
कालिकाचार्य आचष्ट, नरकस्य गतिं स्फुटम् ॥१॥

तथाहि—तुरमिण्यां पुरि कालिको भूदेवो बभूव। तस्य भद्राह्वा सहोदरी जाता। तस्य स्वस्रीयो दत्त इति नामाऽभूत्। कालिकः क्रमात् गुरूपान्ते धर्मोपदेशमाकर्ण्य वैराग्यात् संयमश्रियं जग्राह। तं शास्तरं विना दत्तोऽत्यन्तनिर्गलोऽभूत्। क्रमात् सप्तव्यसनासक्तो बभूव। क्रमाद् दुर्दैवयोगाज्जितशत्रुभूपस्य दत्तः सेवकोऽभूत्। अज्ञेन भूपेन जितशत्रुणा स दत्तः प्रधानपदवीं प्रापितः। क्रमात् सर्वान् सेवकान् वशीकृत्य तं भूपं निर्वास्य दत्तः स्वयं राजाऽभूत्।

दुर्वृत्तप्लवगव्याल-व्याघ्रमार्जारवह्निवत् ।
नोपकारैः परिग्राह्यः, स भूपो विबुधैरपि ॥२॥

ततस्तस्य राज्ञो बुधाः प्रजाश्च विश्वासं न कुर्वते विश्वस्तघातकत्वात्। यतः—

ये कुलाचारतो भ्रष्टाः, परलोकादभीरवः ।
तेषां कुर्वीत विश्वासं, न कथञ्चन मानवाः ॥३॥

आचराज्यं दत्तं पापिनं प्रकृतिर्न विश्वसिति स्म। जितशत्रुरन्यत्र प्रच्छन्नं स्थितः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राजचक्रं समाक्रम्य, दद्दुगू(दुर्दुरू)ढोऽतिमूढधीः ।
अविनीतः प्रकृत्याभूत्, दत्तो द्वेषस्य भाजनम् ॥४॥

स दत्तो राजा यागं कारयन् भूरिजीवान् निरन्तरं हन्ति। यथा यथा यागे हन्यमानानां पशूनां रुधिरप्रवाहः प्रससार तथा तथा स दत्तो राजा जहर्ष। अन्यदा श्रीसूरिपदप्राप्तः कालिकाचार्यस्तत्रागात्। तमागतं तत्र सूरिं श्रुत्वा दत्तस्तत्राययौ। तेन राज्ञाऽन्यदा यज्ञफलं पृष्टो गुरुरुवाच–धर्मात् त्रिविष्टपप्राप्तिरधर्मान्नरकप्राप्तिर्ध्रुवम्। ततो भूयोऽपि तेन राज्ञा यज्ञफलं पृष्टो गुरुर्नरकमादिदेश। तव श्वभ्रगतिर्भविष्यति। यतः—

अस्थ्नि वसति रुद्रश्च, मांसे वसति जनार्दनः ।
शुक्रे वसति ब्रह्मा च, तस्मान्मासं न भक्षयेत् ॥५॥
तिलकसर्षपमात्रं तु, मांसं यो भक्षयेन्नरः ।
स निवर्तते नरकं, यावच्चन्द्रदिवाकरौ ॥६॥

भो राजन्! सप्तदिनमध्ये यदि तवानने विष्ठालेशः पतिष्यति तदा त्वया ज्ञातव्यं नरकगतिः स्वस्य। तदानीं रुष्टो राजाऽवग्–भो मातुल! तव का गतिर्भविष्यति?। गुरुराचष्ट–अहं व्रतं प्रपाल्य स्वर्गे यास्यामि। तदानीं दत्तेन स्वसेवकपार्श्वादसिना हन्यमानोऽपि श्रीकालिकाचार्यो जगौ–यागो नरकाय भवति। उक्तं च—

दत्तेण पुच्छिओ जो, जन्नफलं कालओ तुरमिणीए ।
समयाहियाहिएणं, सम्मं वुइयं भयतेणं ॥७॥

दत्तेन ध्यातं यद्यहं सप्तदिनेभ्यः पुरतो जीविष्यामि तदा कालिकाचार्यममुं हनिष्यामि। ततस्तस्य सूरेरन्तिके स्वसेवकान् मुक्त्वा स दुष्टमतिर्दत्तः सौधमध्ये सप्तदिनानि स्थातुं स्थितः। इतो जितशत्रुभूपभक्तैर्जितशत्रुभूपो राज्यदानार्थं प्रकटीचक्रे प्रच्छन्नम्। इतो रक्ष्यमाणेषु राजमार्गेषु अशुचिषु वस्तुषु अपसार्यमाणेषु सप्तमे दिने दत्तो राजा हृष्टतुरगारूढोऽष्टमदिनभ्रान्त्या ध्रियमाणातपत्रो राजमार्गे निस्ससार। इतो मालिकः पुष्पपूर्णकरण्डयुतो राजमार्गे समागात्। भेर्यादिनिनादैः श्रुतमात्रैरकस्मात् तस्यात्यन्तं मलोत्सर्गचिन्ताऽभून्मालिकस्य। लोकबाहुल्यादन्यत्र गन्तुमशक्नुवन् लब्धलक्षतया त्वरितं मलोत्सर्गं तत्रैव कृत्वा तस्योपरि पुष्पपुञ्जं मुक्त्वा मालिकोऽग्रतो गतः। तदा राज्ञो दत्तस्य तस्मिन् मार्गे गच्छतस्तुरङ्गमखुरोत्खातो विट्लेशो वदनेऽविशत्। स राजा दत्तस्तेन प्रत्ययेन पश्चाद् यावद् गृहाभिमुखं समायाति, तावन्मन्त्रिनियुक्तैः सेवकैर्दत्तो हतः। स दत्तो मृत्वा सप्तमं नरकं गतः। स जितशत्रुभूपः स्वराज्ये उपविष्टः। ततस्तं कालकाचार्यं भूपो निषेवते स्म, जिनधर्मं चाङ्गीचकार॥

( २ )

श्रीपुरे प्रजापालभूपस्य राज्ञी पुत्रं प्रासूत। तस्याभिधानं कालिककुमार इत्यभूत्। पुत्री तु भानुश्रीरासीत्। कालिककुमारः श्रीगुरुपार्श्वे धर्मं श्रुत्वा दीक्षां ललौ। स च बहुश्रुतोऽभूत्, गुरुभिः सूरिपदं दत्तम्। इतो राज्ञा भानुश्रीर्भृगुकच्छे जितारिभूपस्य दत्ता। तस्याः सुतौ बलमित्र-भानुमित्रौ। तयोर्भागिनेयो बलभानुरभूत्। एकदा तत्र गुरवः कालिकसूरय आगताः। तत्र धर्मोपदेशं श्रुत्वा बलभानुर्दीक्षां जग्राह। तदा गुरुसत्कैः क्षुल्लकैर्गङ्गाधरः पुरोहितो वादे जितः। एकदा गुरवो विहारं कृत्वा तत्रागताः, बलमित्र-भानुमित्रयोराग्रहाद् गुरवस्तत्र चातुर्मासीं स्थिताः। ततो गङ्गाधरपुरोहितस्तान् गुरून् कर्षितुमिच्छन् पूर्ववैराद् भूपाग्रे छन्नं जगौ—

देव! इमे जइपुज्जा, भमंति जहिं तत्थ गच्छिरम्मि जणे ।
गुरुपयअक्कमणकया, होइ अवन्ना 'दुरिअहेऊ ॥८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उक्तं च—

यत्र देवर्षिपूजादेः, क्रियतेऽतिक्रमः क्वचित् ।
तच्चेत् संसहते राजा, घोरं तत्र भयं भवेत् ॥९॥

राजाऽवक्—किं क्रियते ? गुरवः सुस्थिताः, तेषां चलनविषये वक्तुं न युक्तम्। पुरोहितोऽवक्—गृहे गृहे नवीना वर्या रसवती कार्यते। यदा साधवो विहर्तुमायान्ति तदोच्यते—श्रीपूज्यपादकृते रसवती कृताऽस्ति। ततोऽनेषणां ज्ञात्वा गुरवो स्वयमन्यत्र गमिष्यन्ति॥

( ३ )

भूपेन तथा कारिते गुरवः प्रतिष्ठानपुरे चातुर्मासकमध्ये गताः। प्रवेशमहोत्सवोऽभूत्। तत्र शालिवाहनो भूपः पृथ्वीं पालयति स्म। पर्युषणापर्व समीपं समायातम्। तत्र भूपोऽवक्—भगवन्! पर्युषणापर्व कस्मिन् दिने करिष्यते ?। गुरवो जगुः—भाद्रसुदिपञ्चम्याम्। तदा भपोऽवक्—पञ्चम्यामत्रैन्द्रमहोत्सवो भवति, तेन पर्युषणापर्व एकस्मिन् दिने कथं करिष्यते ? । भाद्रसुदिपञ्चम्या अर्वाक् पश्चाद् वा भवति तदाऽहं पर्युषणापर्वणि तपोनियमजिनालयोत्सवादि करोमि। तदा गुरवो जगुः—भाद्रसुदिपञ्चम्याः पुरतः प्रहरेऽपि न क्रियतेऽर्वाक् तु भवति। उक्तं च—

"तेणं काणेणं तेणं समएणं समणे भगवं महावीरे वासाणं सवीसइमासे वइक्कंते वासावासं पज्जोसवेंति" उक्तं च—

आसाढपुन्निमाए, संवच्छरियसामग्गि होइ पज्जोसवणा ।
तत्तो सावणपंचमिमाइसु असिवाइकारणओ ॥१०॥

इत्यादि ।

इत्थ य पणगं पणगं, करणीयं जाव वीसई मासो ।
सुद्धदसमिइ ठिआण य, आसाढीपुन्निमोसरणं ॥११॥

इत्यादि। यदि चतुर्थ्यां क्रियते तदा घटते। ततो राजा प्रतिपद्दिने उत्तरपारणकं चकार। श्राद्धा अपि तथा चक्रुः। ततः सर्वाचार्यसंमतं पर्युषणापर्व श्रीकालिकसूरिभिः कृतम्। ततः सर्वैः सूरिभिस्तथा पर्युषणापर्व चक्रे। यतः—

अविलंबिऊण कज्जं, जं किंचि वि आयरंति गीयत्था ।
थोवावराहबहुगुणं, सव्वेसिं तं पमाणंति ॥१२॥

आयरणा वि हु आणा, अविरुद्धा होइ चेव आण त्ति ।
इयरा तित्थयरासायण त्ति तल्लक्खणं चेवं ॥१३॥

असढेण समाइन्नं, जं कत्थइ केणई असावज्जं ।
न निवारियमन्नेहिं, बहुमणुमयमेवमायरिअं ॥१४॥

( ४ )

कदाचिदवन्त्यां कालिकसूरयः स्थिताः, तत्र प्रमादपरान् साधून् दृष्ट्वा जगुः—

भो साधवो मनाग् नैव, प्रमादः क्रियते व्रते ।
प्रमादः पातयत्येव, यतिं संसारसागरे ॥१५॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उक्तं च—

चउदसपुव्वी आहारगा य, मणनाणिवीयरागा य।
हुंति पमायपरवसा, तयणंतरमेव चउगइआ ॥१६॥
न तं चोरा विलुपंति, न तं अग्गी विणासए।
न तं जुएण हरिज्जा, जं धम्मम्मि पमत्तओ ॥१७॥

एवं नोदिता गुरुभिः साधवो न प्रमादं तत्यजुः। ततो गुरवो दध्युः—अमी साधवः प्रमादिनस्त्याज्या एव। यतः—

छंदेण गओ छंदेण आगओ चिट्ठए य छंदेण।
छंदे य वट्टमाणो, सीसो छंदेण मोत्तव्वो ॥१८॥

एवं ध्यात्वा साधून् प्रमादं त्याजयितुं शय्यातरस्य श्राद्धस्य शिक्षां दत्वा गुरवो रात्रौ छन्नं निर्गत्य सुवर्णभूमौ स्वशिष्य-सागरचन्द्रसमीपे ययुः। तदा वृद्धं साधुमागच्छन्तं दृष्ट्वाऽभ्युत्थाय सागरचन्द्रसूरिः प्राह—अस्मिन् विजने भवद्भिः स्थीयताम्। ततो गुरुवस्तत्र स्थिताः। सागरचन्द्रेण नोपलक्ष्यन्ते। व्याख्यानं कृत्वा सागरचन्द्रसूरिः प्राह—मयाऽद्य व्याख्यानं कीदृक् कृतम्?। गुरवो जगुः—विशिष्टम्। ततः सागरचन्द्रः स्वव्याख्यानकलया हृष्टः। ततो द्वाभ्यां सूरिभ्यां धर्मस्थापनोत्थापनाभ्यां विवादः कृतः। सागरः प्राह—

नैवास्ति धर्मः परलोकशर्मकृत्, न तावदास्ते परलोक एव सः।
साक्षादभावात् परलोकिनस्ततः, पुण्यस्य पापस्य भुनक्तु कः फलम्? ॥१९॥

कालिकसूरिराह—

अहं सुखी दुःख्यभूवमित्युदित्वरः, संप्रत्ययः कस्यचनापि जातुचित्।
नायं समुन्मीलति भूतसंचयाधिकं विनाऽऽत्मानमबाधयाऽन्वितम् ॥२०॥
आत्माऽस्य संवेदनतः प्रतीयते, स्वाङ्गे परान् प्रत्यनुमानतोऽमुतः।
तथा च सर्वत्र हि बुद्धिपूर्वकोत्थायाः कृपाया उपलम्भतः खलु ॥२१॥

इतो यतयः पश्चाद्रात्रावुत्थिता यावद् गुरुन् शब्दयन्ति, तावत् कोऽप्युत्तरं न वदति। ततः शून्यचित्ताः शय्यातरं श्रावकं पृच्छन्ति स्म। गुरवः कुत्र सन्ति?। स प्राह—अहं किं जाने, यूयमेवात्मनो गुरूणां स्थितिं न जानीथ?। ततस्ताडिताः शय्यातरेणेति साधवः। गुरवो युष्माननुक्त्वा गताः, गुरूणां स्थितिरुक्ता। ततस्ते साधवः प्रमादं त्यक्त्वा गुरूक्तविधिना चारित्रं पालयन्ति स्म। गुरुभिर्वालुकाभिर्भरणिकं कृत्वा पुना रिक्तीकृत्य पुनर्भृत्वाऽर्द्धभरणिकं बालुकानां दर्शयित्वा प्रोक्तम्—गौतमस्वामिपार्श्वात् पतन्ती विद्या वर्त्तते वालुकान्यूनदर्शनात् ॥

( ५ )

एकदा कालकसूरिः प्रतिष्ठानपुरे चतुर्मासीं स्थिताः सन्ति। तदा प्रथमस्वर्गस्वामीन्द्रो महाविदेहक्षेत्रे श्रीसीमन्धरं नन्तुं गतः। तत्र श्रीसीमन्धरोऽकथयत्—भरतक्षेत्रे शत्रुञ्जयतीर्थं सर्वतीर्थेभ्य उत्कृष्टं समस्ति। कालिकसूरिर्यादृशं निगोद-स्वरूपं कथयति तादृशोऽन्यः कोऽपि तत्र नास्ति। तत इन्द्रो वृद्धविप्ररूपं कृत्वा सार्द्धे प्रहरसमये गुरुपार्श्वे समागात्। गुरुं प्रणम्य विप्रको जगौ—अहं वृद्धोऽभूवम्, ममायुः कियदस्ति?। अहमनशनं जिघृक्षुरस्मि। ततो गुरुभिर्विलोक्य ज्ञानेनोक्तम्—तव सागरद्वयमितमायुररिति। तत इन्द्रेण स्वरूपं प्रकटीकृतम्। निगोदविचारो यादृशः श्रीसीमन्धरस्वामिना प्रोक्तः तादृशो गुरुणाऽप्युक्तः। तत इन्द्रोऽवक्—त्वं शत्रुञ्जयतीर्थं भरते प्रोक्तं श्रीसीमन्धरस्वामिना [ ततस्तुभ्यं ] नमः। तत इन्द्रोऽवक्—यावत् साधव आयान्ति तावत् स्थास्याम्यहम्। गुरवो जगुः—तव रूपं दृष्ट्वा साधवो निदानं करिष्यन्ति बाह्यारघट्ट

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विक्रेष्यन्ते । तत इन्द्रः [पाषाणी]शाला[याः] चतुरशीतिस्तम्भाया द्वारं परावृत्य गतः । साधवो विहृत्यागता द्वारमन्यत्र दृष्ट्वा जगुः—भगवन्! द्वारमेवं कथमभूत्? । ततो गुरुभिरिन्द्रागमनादिस्वरूपं प्रोक्तम् । साधवो जगुः—यदीन्द्रोऽस्थास्यत् तदा वयं तं दृष्ट्वा पुण्यं विशेषतोऽकार्ष्म ॥

( ६ )

**प्रभावनां वितन्वानो, जिनेन्द्रशासने सदा ।**
**लभतेऽत्र परत्रापि, सुखं कालिकसूरिवत् ॥२२॥**

तथाहि—**म**गधदेशे **धा**रावासपुरे **व**ज्रसिंहभूपस्य **सु**रसुन्दरी प्रियाऽभूत् । पुत्रः **का**लिककुमारोऽभूत् । पुत्री **स**रस्वती च । एकदा **का**लिककुमारो राजपुरुषयुतः क्रीडार्थं वने गतः । तत्र **गु**णन्धरसूरिं वन्दते स्म । तत्रोपदेशः श्रुतः—

**माणुस्सखित्तजाई, कुलरूवारुग्गमाउअं बुद्धी ।**
**सवणग्गहणं सद्धा, संजमो लोगम्मि दुलहाइं ॥२३॥**

इत्यादि धर्मं श्रुत्वा प्रबुद्धो मातापितरौ पर्यवसाप्य **स**रस्वत्या भगिन्या युतो गुरुपार्श्वे कुमारो व्रतं ललौ । गुरुपार्श्वे **का**लिककुमारः पठन् साहित्य—तर्क—लक्षण—छन्दोऽलङ्कार—नाटकाद्यागमशास्त्रकुशलोऽभूत् । श्री**गु**णन्धरसूरिभिर्योग्यं मत्वा **का**लिकसाधोः सूरिपदं ददे । विहारं भूमण्डले कुर्वन् प्रबोधयति स्म ।

अन्यदा **का**लिकसूरि**रु**ज्जयिन्यां बहिरुद्याने समवासार्षीत् । तदा **स**रस्वती साध्वी प्राप्तप्रवर्तिनीपदा पुरमध्ये यियासुर्गुरून् प्रणम्य पुरद्वारे समागात् । तदा तत्रत्यो **ग**र्दभिल्लो राजा पुराद् बहिर्निस्सरन् **स**रस्वतीं साध्वीं वि(प्र)लपन्तीं रूपशालिनीं वीक्ष्य रागातुरः स्वान्तःपुरे बलात् क्षेपयामास । गुरुणा **ग**र्दभिल्लभूपस्य कृतं ज्ञातम् । ततो गुरुणा श्रीसंघः प्रेषितः । साध्वीवालनार्थं राजपार्श्वे गत्वा प्राह—महासतीयं मुच्यताम् । तपोधनाः तपस्विन्यो राज्ञो यस्य भूमौ तपः कुर्वन्ति, तस्य पुण्यविभागो राज्ञः समेति । तेन स्वामिन्नियं मुच्यताम् । त्वं प्रजापालोऽसि । तपस्विनां तु भूप एवाधारोऽस्ति । यतः—

**नरेश्वरभुजच्छायामाश्रित्याश्रयिणः सुखम् ।**
**निर्भयाः सर्वकार्याणि, धर्मादीनि वितन्वते ॥२४॥**

एवं श्रीसंघेनोक्तो भूपः प्राह—नाहमिमां मुञ्चे, उपदेशः स्वगृहे दीयते, भूपस्याग्रे न दीयते एवंविधः । ततः गुरुभिर्भूपपार्श्वे गत्वोक्तम्—इयं तपस्विनी मम भगिन्यस्ति तेन मुच्यताम्, त्वं प्रजापालोऽसि त्वमाधारस्तपस्विनाम् । ततो गुरूक्ते यदा राजा न मुञ्चति **स**रस्वतीं तदा गुरवः स्वस्थानेऽभ्येत्य श्रीसंघमाकार्य प्राह—अयं दुष्टो राजा **स**रस्वतीं जहार, अस्य शिक्षा दीयते । यदि सति सामर्थ्ये जिनमतप्रतिकूलं यो न हन्ति तस्य पाराञ्चितं पापं लगति । यतः—

**देव-गुरु-संघकज्जे, चुन्निज्जा चक्कवट्टिसिन्नं पि ।**
**कुविओ मुणी महप्पा, पुलायलद्धीइ संपन्नो ॥२५॥**

इत्याद्युक्त्वा स्ववेषं साधूनां समर्प्य श्रीसंघं मुत्कलाप्य **शा**ककूले गतः । तत्र स्वकलां दर्शयित्वा राज्ञो मिलितः । सुभाषितैः भूपं रञ्जयामास । **का**लिकसूरिणा रञ्जितो राजा जगौ—भवतो यत् कार्यं विद्यते तन्निगद्यताम् । गुरुः प्राह—अवसरे कथयिष्यते ।

एकदा **शा**कभूपतेः सभायामुपविष्टस्य **सा**धनसिंहभूपेन कच्चोलकं क्षुरीयुतं प्रेषितं समागतम्, तदा राजा कृष्णमुखो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽभूत् । तत्कचोलकं मस्तके कृत्वा साधनसिंहस्य सेवकस्य सन्मानं कृत्वोत्तारकं ददौ । ततो रहसि कालिकाचार्यः शाकं पप्रच्छ कचोलकागमनवृतान्तम् । ततो राज्ञोक्तम्–अस्माकं षण्णवतिभूपानामेको मुख्यभूपः साधनसिंहोऽस्ति बली । स च यदास्माकं राज्ययोग्याज्ञजो भवति, तदा स भूपः कचोलकं क्षुरीयुतं प्रेषयति, तदा शीर्षं क्षुर्या छित्वा प्रष्यते । ततः सूरिराह–एवं को मूर्खो निजं शिरो दत्ते ? । जीवद्भिः सुखं लभ्यते । ततो राजावक्–किं क्रियतेऽस्माभिः ? ततः सूरिराह–यदि मम कथितं क्रियते, तदा वो जीवितं भवति चिरम् । ततो भूपोऽवक्–कथयास्माकं जीवनोपायम्, त्वं तु विज्ञोऽसि । ततः सूरिराह–उज्जयिनी पुरी वर्यास्ति, तत्र षण्णवतिर्ग्रामाः सन्ति, तेन तत्र यूयं सर्वे भूपाः मया सार्द्धमागच्छन्तु । भवतामुज्जयिन्या राज्यं दास्यते मया । आकारयतु भवान् भूपान् सर्वान् । ततो विचारं कृत्वा षण्णवतिर्भूपाः स्वतुरङ्गमपत्ति-कुटुम्बयुताश्चेलुः । वर्त्मनि तेषां वर्षाकालः समायात् । ततो ढङ्कपर्वतपार्श्वे सुराष्ट्रामध्यस्थे ते भूपास्तस्थुः । शम्बलक्षीणा भूपा जगुः–भो कालिकावधूत ! शम्बलं विना कथमुज्जयिन्यां गम्यते, तत्रत्यं राज्यं च ग्रहीष्यते ? । सूरिः प्राह–स्थिरं स्थीयताम्, सर्वं वर्यं भविष्यति । तदा सरस्वत्या आचाम्लतपस्करणस्वरूपं शासनदेव्या प्रोक्तम् । ततः [गुरुणा] चूर्णनेष्टिकानिवाहं स्वर्णीकृत्य सर्वेषां भूपानां विभज्य ददौ सूरिः । ततः सर्वे भूपा सुस्थिता बभूवुः ।

ततः सूरिणा शिबिरं चालितम् गुर्जरात्रमध्ये भूत्वोज्जयिनीपार्श्वे ययौ । तदा गर्दभिल्लो भूपः संमुखमागत्य युद्धं कुर्वाणं वैरिबलं महद् दृष्ट्वा गर्दभिल्लो विद्यां साधयितुमुपविष्टः । तदा सूरिभिर्गर्दभिर्ल्लो(भीं) विद्यां साधयन्तं गर्दभिल्लं भूपं ज्ञात्वा प्रोक्तम्–असौ भूपोऽप्रेतन्यामष्टम्यां गर्दभिर्ल्लो(भीं) विद्यां साधयिष्यति । सा च यदा वप्रोपरि चटित्वा शब्दं करोति, तदा यः शब्दं श्रोष्यति स मरिष्यति । अतः कारणादष्टोत्तरशतं शब्दवेधिनो मया सह तिष्ठन्तु, शिबिरं गव्यूतद्वये स्थाप्यते तदा यदाऽहं बाणं मुञ्चामि तदा १०७ बाणवेधिभिर्बाणा मोचनीयाः । गर्दभीविद्यायाः शब्दं कुर्वाणाया मुखं बाणैर्भरिष्यते । ततो रुषा राजानं पदाभ्यां हत्वा मुखे नीतिं कृत्वा गमिष्यति । राजा मरिष्यति, राज्यं ग्रहीष्यते । एवं स सूरिः शब्दवेध्यादिनरान् मीलयित्वा गर्दभिल्लं जिगाय । शकसाहाय्यादुज्जयिन्या राज्यं वृद्धशकाय सूरिर्ददौ सर्वम् । ततः सूरिः सरस्वतीं सुशीलामन्तःपुरादानिनाय । सर्वेषां भूपानां पृथक् पृथग् देशान् विभज्य ददौ सूरिः । यस्य राज्ञः पार्श्वे स्थितस्तस्योज्जयिनीराज्यं ददौ सूरिरथवा स्वभागिनेयस्य ददौ । ततो गुरुपार्श्वे गत्वा श्रीकालिकाचार्यः प्रायश्चित्तं गृहीत्वा पुनर्वेषं गृहीत्वा चिरं भव्यजीवान् प्रबोध्य स्वर्गसुखं प्राप । सरस्वत्यपि चारित्रं प्रपाल्य स्वर्गं गताः ॥

इति कालिकसूरिकथा समाप्ता ॥

ग्रन्थकारप्रशस्तिः—

श्रीचन्द्रगच्छाम्बरभूषकोऽभूत्, तपागणो भानुरिवोद्धदीप्तिः ।
प्रबोधयन् भव्यजनाम्बुजालीं, स्वगोविलासैरिव साधुवर्गैः ॥१॥
तत्राभवन् वरगुणगणमणिरोहणमहीधरप्रतिमाः ।
परमगुरुसोमसुन्दरगुरवः संयमरमापतयः ॥२॥
तच्छिष्या मुनिसुन्दरगुरवो जयचन्द्रसूरयोऽभूवन् ।
पारगतागमजलनिधिपारगता रुचिरगुणनिलयाः ॥३॥
तच्छिष्या विजयन्ते, दधतः श्रीसूरिमन्त्रमहिमभरम् ।
श्रीयुक्तरत्नशेखरगुरव उदयनन्दिसूरिवराः ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लक्ष्मीसागरसूरीशाः, सोमदेवाहसूरयः ।
विद्यन्ते लसद्विद्यावार्धिमन्थनमन्दराः ॥५॥
श्रीमन्मुनीशमुनिसुन्दरसूरिराज–
शिष्यः श्रीमन्मुनीशशुभशील इति प्रमुख्यः ।
एतां कथां वितनुते स्म नवाम्बरेषु—
चन्द्रप्रमाणसमये (१५०९) किल विक्रमार्कात् ॥६॥
भरहेस(तेश्व)र-बाहुबलीवृत्तिः शुभशीलविबुधरचितेयम् ।
शोध्यासुबुद्धिमद्भिर्विबुधैः कूटापसरणतः ॥७॥
अनाभोगादिना किञ्चिद, यदत्रोत्सूत्ररोपणम् ।
चक्रे तदस्तु मे मिथ्यातमोऽर्हदादिसाक्षिकम् ॥८॥

## [२७]

### श्रीधर्मदासगणिविरचिता
### उपदेशमालाटीकान्तर्गता

# कालिकाचार्यकथा ॥

जीअं काऊण पणं, तुरमणिदत्तस्स कालिअज्जेण ।
अवि य सरीरं चत्तं, न य भणिअमहम्मसंजुत्तं ॥१०५॥

जीयं इति–स्वकीयं जीवितं पणं कृत्वा, तुरमणि त्ति तुरमणिनाम्नि नगरे, दत्तस्स त्ति दत्तनाम्नो राज्ञः, कालिकज्जेण कालिकाचार्येण, च पुनः स्वशरीरमपि त्यक्तम्, मनसा स्वदेहोऽपि त्यक्तः । परं अधर्मसंयुक्तं असत्यं वचनं न भणितं न भाषितम् ॥ १०५ ॥

अथात्र कालिकाचार्यसंबन्धो यथा—

तुरमणिनामनि नगरे जितशत्रुनामा नृपः । तत्रैकः कालकनामा विप्रस्तस्य भद्रानाम्ना भगिनी । तस्या दत्तनामा पुत्रः । एकदा कालिकब्राह्मणेन स्वयं बुद्धेन चारित्रं गृहीतम् । क्रमेण आचार्यपदं प्राप्तम् । तद्भागिनेयो दत्तनामा निरङ्कुशो द्युतादिव्यसनाभिभूतो नृपसेवां करोति । कर्मयोगेन राज्ञा तस्य मन्त्रिपदं दत्तम् । लब्धाधिकारेण तेन राजानं बहिः निष्कास्य स्वयं राज्यं गृहीतम् । राजापि तद्भयान्नष्टः प्रच्छन्नं स्थितवान् ।

अथ सो दत्तनृपो महाक्रूरकर्मा मिथ्यात्वमोहितोऽनेकान् यागान् कारयति । तदवसरे कालिकाचार्याः समवसृताः । तदा भद्रामातुरुपरोधेन दत्तमन्त्रीश्वरोऽपि वन्दनार्थमागतः । गुरुभिर्देशना दत्ता । यतः—

धर्माद् धनं धनत एव समस्तकामाः,
कामेभ्य एव सकलेन्द्रियजं सुखं च ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कार्यार्थिना हि खलु कारणमेषणीयं,
धर्मो विधेय इति तत्त्वविदो वदन्ति ॥१॥

इति श्रुत्वा दत्तेन यागफलं पृष्टम् । गुरुणोक्तम्-यत्र हिंसा तत्र धर्माभावः । यदुक्तम्—

दमो देव-गुरूपास्तिर्दानमध्ययनं तपः ।
सर्वमप्येतदफलं, हिंसां चेन्न परित्यजेत् ॥२॥

पुनरपि द्वितीयवारं यागफलं पृष्टम् । गुरुणोक्तम्, हिंसा दुर्गतिकारणं वर्त्तते । यदुक्तम्—

पङ्गु-कुष्टि-कुणित्वादि, दृष्ट्वा हिंसाफलं सुधीः ।
निरागस्त्रसजन्तूनां, हिंसां संकल्पतस्त्यजेत् ॥३॥

तदा पुनः दत्तेनोक्तम्—कथमित्थमुत्तरं दत्थ ? यादृशं भवति तादृशं सत्यमेव वदत । तदा कालिकाचार्येण चिन्तितम्, यद्यप्ययं राजा यागरक्तोऽस्ति तथापि यद् भाव्यं तद् भवतु । परं मिथ्या न जल्पामि । प्राणान्तेऽपि मिथ्याभाषणं न श्रेयः । यदुक्तम्—

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु,
लक्ष्मीः समाविशतु गच्छतु वा यथेच्छम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा,
न्यायात् पथः प्रविचलन्ति पदं न धीराः ॥४॥

इति विचार्य कथितम्, भो दत्त ! निश्चयेन नरकगतिरेव यागफलम् । यदुक्तम्—

यूपं छित्वा पशून् हत्वा, कृत्वा रुधिरकर्दमम् ।
यद्येवं गम्यते लोके(स्वर्गे), नरके केन गम्यते ? ॥५॥

दत्तेनोक्तम्, कथमेतज्ज्ञायते ? । गुरुणोक्तम्, इतः सप्तमे दिवसे घोटकखुरोच्छलिता विष्ठा तव मुखे पतिष्यति । पश्चाल्लोहकुण्डिकायां पतिष्यसि । एतदनुमानेन तवावश्यं नरकगतिर्भाविनीति ज्ञेयम् । दत्तेनोक्तम्—भवतां का गतिर्भविष्यति ? । वयं धर्मप्रभावेन स्वर्गे गमिष्याम इति श्रुत्वा समुत्पन्नक्रोधेन दत्तेन चिन्तितं यदि सप्तदिवसमध्ये एतद्वाक्यं न मिलिष्यति तदेनमवश्यं मारयिष्यामीति स्वसेवकांस्तत्समीपे मुक्त्वा नगरमागत्य नगरवीथिकामशुचिनिष्कासनपूर्वकं शोधयामास । सर्वत्रापि पुष्पाणि विकीर्णानि । स्वयमन्तःपुरे स्थितः । षट्दिनानि गतानि । अष्टमदिनभ्रान्त्या सप्तमदिने क्रोधमाधायाश्वमारुह्य गुरून् हन्तुं यावद् गच्छति, तदवसरे कश्चिद् वृद्धो मालाकारो वृद्धनीतिबाधया पीडितो रथ्यायां विष्ठां कृत्वा पुष्पैराच्छाद्य गतोऽस्ति । तदुपरि दत्तनृपाश्वचरणयोः निपतितः समुच्छलन्नवस्करांशो नृपमुखे पतितः । समुत्पन्नो विश्वासः । पश्चाद् वलितो दत्तनृपः । एकान्तं ज्ञात्वा राजपुरुषैश्चिन्तितम्, जीवन्नयं दुःखदायी भविष्यतीति ज्ञात्वा लोहकोष्ठिकायां क्षिप्तो बहूनि दिनानि महत्कष्टमनुभवन्, विलपन्, पूत्कारं कुर्वन्, मृत्वा सप्तमनरकावनिं प्राप । श्रीकालिकाचार्यास्तु चारित्राराधनेन स्वर्गं गताः । एवं साधुभिः प्राणान्तेऽपि मिथ्याभाषणं न विधेयमित्युपदेशः ॥

इति त्रिंशत्तमः संबन्धः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीसोमसुन्दरसूरिविरचिता–उपदेशमालान्तर्गता

# कालिकाचार्यकथा ।

[ रचनासंवत् १४५७-१४९३ ]

तुरमिणी नगरीइं दत्त ब्राह्मणिइं मुहुंतइं राज्य आपणइ वसि करी आगिलु **जितशत्रु** राजा काढी आपणपइं राज्य अधिष्ठिउं । धर्मनी बुद्धि घणा याग यज्या । एक वार दत्तना माउला श्रीकालिकाचार्य गुरु भांणेज राजा भणी तीणइं नगरि आविया । मांमु भणी दत्त गुरु कन्हइं गयु । यागनुं फल पूछिवा लागु । गुरे कहिउं–जीवदया लगे धर्म हुइं । दत्त कहइं–यागनुं फल कहु । गुरे कहिउं–हिंसा दुर्गतिनुं हेतु हुइ । पेलुं कहइ–आवडउं कां कहु, यागनूं फल कहु । गुरे मरण आंगमीनइं कहिउं–यागनूं फल दुर्गति कहीइं । दत्त कहइं–हूउं नरगि जाएसि ?। गुरे कहिउं–कुण संदेह ?। सातमइं दिहाडइं कुंभीमांहिं पचीतओ नरगि जाएसि । किसिउं अहिनाण ?। सातमइं दिहाडइं ताहरइं मुखि विष्टा पडिस्यि–ए अहिनाण । दत्ति कहिउं–[तउं] मरी किहां जाएसि ?। गुरे कहिउं–देवलोकि जाइसु । तउ दत्तइं रीसाविइं गुरु पाषती जण मूंक्या । चींतवइ छइं–सातमइं दिहाडइं गुरु ज मरस्यि । इसिउं चींतवी घरमांहिं पइंसी रहिओ । राजाइं मार्ग चोखलाविया । तिहां पुष्प प्रकर कराविया । एकइं मालीइं गाढइं काजि ऊपनइ विष्टा [मार्ग]मांहि करी ऊपरि फूलनूं डालुं लांषिउं । ते दत्त आठमा दिहाडानी भ्रांतिं सातमइं ज दिनिं गुरु मारिवा नीसरिउ । घोडानु पग विष्टा ऊपरि पडिओ । विष्टा उछली तेहनइं मुहुडइं पडी । बीहनु, पाछओ वलिओ । सामंत मंडलीके तेह ऊपरि विरक्त हूंते बांधि कुंभीमांहिं पचीतु नरकिं गिओ । सामंते वली आगिलु जितशत्रु राजा थापिउ । तीणइं श्रीकालिकाचार्य पूज्या । चारित्र आराधी देवलोकि पुहता । जिम कालिकाचार्यें साचउं बोलिउं तिम अनेरइं ऊं धर्म साचउं ज कहिवुं ॥

इति कालिकाचार्यकथा संपूर्णा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# [२९]

## श्रीरामचन्द्रसूरिविरचिता

# कालिकाचार्यकथा ।

नमः श्रीसर्वज्ञाय ॥

उत्पत्ति-विगम-ध्रौव्यत्रिपदी व्याप्तविष्टपम् ।
महेमः श्रीमहावीरं, निरस्तवृजिनं जिनम् ॥१॥

श्रीमहावीर चरम तीर्थंकर, सर्वपाप क्षयंकर, तेह तणा चरणकमल नमस्करी श्रीकालिकाचार्य गुरुतणउं कथानक कहिसुं । जे श्रीमहावीर, उत्पत्ति विगम ध्रौव्य इसी छइ जे त्रिपदी, तेहनइ प्रमाणि व्याप्त व्यापिउं विश्व सघलउंइ छइ । अनइ—

देव-गुरु-संघकज्जे, चुन्निज्जा चक्कवट्टिसन्नं पि ।
कुविओ मुणी महप्पा, पुलाइलद्धीइ संपन्नो ॥२॥

अनइं किवारइं एकं जे पापकर्मइ जिनशासन प्रतिइं पाडूउं करइ ते पालीनइ जिनशासन रहइं, उन्नति करइ, मुहुत चडावइं, ते आलोचना प्रतिक्रमण कीधइं हूंतइं श्रीकालिकाचार्य गुरुतणी परिइं शुद्धमान हुइ । हिवइं तेह गुरुतणओ दृष्टांत कहीइ छइ ।

ईणइ जि भरतक्षेत्रि धारावास इसिं नामिं नगर छइ । तिहां वैरसिंह इसिं नामिं राजा राज्य प्रतिपालइ । तेह तणइ सीलालंकारधारिणी मनोहारिणी प्रिया कलत्र सुरसुन्दरी इसिं नामिं प्रवर्त्तइ । तेह बिहुं भरतार भार्या संभूत कालिक इसिं नामिं कुमार छइ । सर्वगुणाधार छइ । तेह कुमार तणइ निर्जितदेवांगनारूप सरस्वती इसिं नामिं बहिन छइ । एक वार यौवनवयि घोडा षेलाविवा बाहिर वाडिं वनमाहि गिइं हूतइं श्रीगुणाकरसूरीस्वर दीठा । पंचांग भूमीतलि ऊतरी, प्रणमी, नमस्करी पांचसइं राजपुत्र सुभट, मित्रस्युं बइठओ । गुरे धर्म्मदेशना आरंभी । किसी ते—

विद्युल्लतानेकपकर्णताललीलायितं वीक्ष्य नरेन्द्रलक्ष्मीः ।
युष्मादृशाः किं च पतन्ति कूपे, भवस्वरूपे सुविवेकिनोऽपि ॥३॥

वीजना झबकारा सरीषउं, हाथीयाना कर्ण सरीषउं, राज्यलक्ष्मी तणउं स्वरूप जाणी, तह्म सरीषा भव्य जीव छइं जे ते भवि कूपि किम पडइं । सुविवेकीया ते जे संसार तृणवत् छांडी संयम राज्य, आदरइं । इस्युं सांभली प्रतिबुद्ध हूओ । माता पिता मोकलावी व्रत ग्रहण कीधउं । पांचसइ क्षत्रीयंस्युं सरस्वती बहिनस्युं दीक्षा लीधी । गीतार्थ हूओ । गुरे आपणा गच्छतणओ भार तेहमांहि आरोपिओ । तेह जि पांचसइं मुनिस्युं पृथ्वीइं व्याहार क्रम करइं । ग्रामि एक राईयं, नगरे पंच राईयं । ग्रामि एक रात्रि नगरि पंच रात्रि ।

इम विहार करतां हूतां श्रीकालिकाचार्य गुरु मालवकदेशमाहि उज्जयनी नगरीइं पुहुता । तिहां गर्दभिल्ल राजा राज्य प्रतिपालइ । एक वार रवाडी जातइं हुंतइं बहिर्भूमि जातां सरस्वती इसिं नामिं साध्वी तपोधना परिवारपरिवृत हूतां राजा गर्दभिल्लइं दीठी । तिहां चित्त परावर्त्त हूओ । कामार्त्त लेवा मनि धरी । यतः—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**न पश्यति दिवोलूकः, काको नक्तं न पश्यति ।**
**कामान्धः कोऽपि पापीयान्, दिवा नक्तं न पश्यति ॥४॥**

घूयड दीहिं न देषइं । काग रात्रि न देषइं । पुणि कामांध पापी दीहिं अनइं रात्रि न देषइं । एह कारणतओ अंध हूतइं अंतेउरमांहि ते सती सरस्वती भगवती राषी । हा बांधव ! हा कालिकाचार्य ! हा तात वैरसिंह !, हा माता सुरसुंदरि !, हा गुरु गुणाकारा सूरि ! माहरउं चारित्ररत्न गर्दभिल्लि नृपाधमि लीजतउं राषओ राषओ । सूरीस्वरे तथा श्रीसंघिइं, मंत्रीश्वरे, प्रधान पुरुषे कहूं, तूई न मेल्हइ । इसिउं कहिउं छइ—

**यत्रास्ति राजा स्वयमेव चौरो, भाण्डिवहो यत्र पुरोहितश्च**
**वनं भजध्वं ननु नागरा भो !, यतः शरण्याद् भयमत्र जातम् ॥५॥**

जिहां राजा स्वयमेव—आपहणीइ चोरी करइ । जिहां पुरोहित भंड विद्या करइ, अहो लोको ! तओ वन सेविओ ! जेह तउं रषोपउं जोईइ, तेह हूंतओ भय हुइ । इमइ सांभलिइं हूतउं पुणि न मेलइं । संघ समु(म)क्ष्य गुरि श्रीकालिकाचार्यइं इसी प्रतिज्ञा कीधी जे, गर्दभिल्लिइं श्रीसंघनुं कहुं नथी कीधउं अनइ महासतीनइं अवज्ञाभाव कीधओ छइं । जिनशासनमाहि कांई नथी लेषव, तओ मुंह काल्काचार्यनुं कांई नथी मान, तओ पणि तओ प्रमाण जु एह गर्दभिल्ल रहइं राज्य थकु उन्मूली नइं नांषउं, चोटी साही मांथा पाषती फेरी राज्य थकु काढउं तु जाणिज्यो । जु ए बलवत्तर तु किसुं ?, एहनइ घणउं सेनि तु किसउ ?, एहनइ गर्दभी विद्यानुं पराण तु किसउ ?, इसां वचन बोलतओ उन्मत्तनी परि भ्रमइ । एहनइ गढनूं पराण, द्रव्यनूं पराण तु किसउं ? असउं ग्रिथलपणूं करतु बोलतु हीडइ । साहित्यस्यां वचन बोलतु जाणी लोके राजा गर्दभिल्ल चित्तमाहि निंदिओ । ए राजानइ धिग पडओ, जीणइं पापी राजाए गुरु इसी दुर्दि(दें)शां पाडिओ । एतलइं वली महंते राय वीनविओ, पसाओ करि ए साध्वी व्रतस्था महासती मेल्हि । राजा रीसाविइ हुंतइं तेह मुहतां रहइं कहिउं तुह्मे आपणा मा—बाप रहइं जई सीषामण दिओ । इसिउं रायनउं वचन सांभली ते प्रधान पुरुष मौनि थई रह्या । इसउं स्वरूप सांभली श्रीकालिकाचार्य नगरतओ बाहिरि नीसर्या । गच्छ गीतार्थ महातमानइं भालवी, अवधूतनु वेस करी, ओघओ मुहपत्ती गोपवीनइं पश्चिम दिशिं सिंधु नदीनइ पारि शाककूल इसिं नामिं स्थानकि ग्या । तिहां नगरनइ परिसरि शाकी कुमर गेडी दडे रमता देषी ऊभा रह्या । तेह रहइं रमता दडओ अवह कूपमाहि पडिओ । सहू सचिंत थई रहिउ । गुरे तेहजिनां बाण धनुष लेई दृष्टि वेधी दिषाडते हूते ते दडओ एक एकनो पूषइं बाण संधान करी ईणी रीतिइं दडु काढिउ । सवे शाकी कुमार रलीयायत हुआ । इसिउं कहिउं छइं—

**मानमुल्लसति यत्पदे पदे, संपदे भवति वाक्यडम्बरः ।**
**धीमतामभिमतार्थसिद्धये, यद्धि देशगमनः स उत्सवः ॥६॥**

जे बुधिवंत छइं, जे विद्वांस हुइ, ते जु विदेश जाइं तओ हइ संपदा । जि हुइ बोलतां आधां काज सीझइं, मननउं वांछउं कार्य सीझइ । एतलइं स्युं आश्चर्य सिउं संदेह कांइं ।

**विद्वत्त्वं च नृपत्वं च, नैव तुल्यं कदाचन ।**
**स्वदेशे पूज्यते राजा, विद्वान् सर्वत्र पूज्यते ॥७॥**

विद्वांसपणुं अनइं राज्य पदवी सिरीषां न कहांइ कांइं । विद्वांस जिहां जाइं तिहां कला विधानइ चमत्कारि करी मानइं । इम तीणे कुमारे मानिओ, पूजिओ, सत्कारिओ । साथिइं लेई आपणा पिता रहइं जणावउं । चारु बाणी



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दृष्टि वेधी भण। । गुरु अवधूतवेषिं तिहां र[हि]ई । ते राजा **शा**की मान सन्मान दिइ । महत्त्व प्रतिष्ठाइं ते **शा**की बोलउं, ऊवर्थइ नही । केतले दिवसे **शा**खानुशाषी पातसाहिइं छन्नूं रायरहइं अंकबद्ध लेख मोकलिओ । जिहां गुरु छइं तेह रायनइ एक छरी नामांकित अनइं कचोलउं एतलुं आगलि मेहलउं दूतिइं । ते देषी राजा कालमुहु हूओ । ति वारइं गुरे पूछिओ तुहं जि रहइं कोप छइ के अनेराइ कुणहइं रहइं कोप छइ । राजाइ कहिउं अम्ह सरीषा छन्नूइ राइ रहइं एहवओ जि कोप छइ—

> जलधेरपि कल्लोलाश्चापलानि कपेरपि ।
> शक्यन्ते यत्नतो रोद्धुं, न पुनः प्रभुचेतसः ॥८॥

किवारइं एकइं समुद्रना कल्लोल रूधी सकीइं । किवारइं एकइं वानरनूं चपलपणूं रूधी सकीइं । पुणि ठाकुरनूं चित्त रूंधी न सकीइं । तम्हे छन्नू राय एक थाओ । मू साथिइं आवओ । जिम तुम्ह रहइं निर्विघ्न रूडइ स्थानकि लेई जाउं । तेहे सविहु राए गुरुनूं वचन मानिउं । मूलगा **शा**खीनइं कहिउं, छन्नूं राय एकठा मिलओ । सघला मिली । गुरु वचन लगइ चाल्या । **सिं**धुदेशमाहिं **सिं**धनदी ऊतरी **सु**राष्ट्रदेशमाहिं आव्या । तिहं वर्षा हूउ । जीणइ वर्षाकालि गाऊ जोअण थाइ । नदी वाहला ऊतरी न सकीइं । मास ४ **सु**रठइं रह्या । वर्षा ऊतरिइ गुरे ते बोलाव्या । कहुं चालु । तेहे कहुं किहां भणी चलावओ छओ । तिवारइ गुरे कहिउं । **माल**वुकदेश भणी, उज्जयनी नगरी तिहां तह्मारु निर्वाह हूसिइ । सविहुं राजाने कहिउं, अह्मारइ शंबल नथी । गुरे शासनाधिष्ठायिका देवता आराधी । तेहना सानिध्य तु चूर्णकोटि वेधी रस करी, ईटवाह पाचवी साव सुवर्णमय ईट करी, विहची आपी। पछइ **माल**वा भणी चाल्या । **ला**डदेशमाहि थई **माल**वानी सीमइं जानइ दसुरण तिहां रह्यां जण मोकली कहाव्यउं । अजी कांइं नथी वणठउं । **गर्द**भिल्लि कहिउं तु प्रमाण जु जीवता साहउं । मूंडि मेलावओ करी आव्या छइं । **गर्द**भिल्ल मंत्र आलोच करी, कटक सज करी, सामहु आविओ । बिन्हइ दल एकत्र मिल्यां । सुभट सज थया प्रधान भाट सांचर्या । संधि न हुई । विग्रह जि मेलि आव्यु ।

> तलि वजइं सरणाईयां, पाषरीइं केकाण ।
> सूरां घरि वधामणां, काइर पडइ पराण ॥९॥
> पत्तिः पदातिं रथिनं रथेशस्तुरङ्गसादी तुरगाधिरूढम् ।
> गजाधिरूढो हि गजं हिनस्ति, घोरो रणः सैनिकयोः प्रवृत्तः ॥१०॥

बिहुं दले मिले हूंते, पायक पायकस्युं झूझइं । रथी रथीसुं, असवार असवारसुं, घोडा घोडासुं, हाथी हाथीसुं । एहवइ घोर रौद्र संग्रामि हूंतइ जेत्रश्री लहि बही सुभट सूरनां अंग ओल्हस्यां । कायर कांपवा लागा । पापतणइ प्रमाणि **गर्द**भिल रायनूं सैन्य मचकोडिओ । ऊजेणीना गढमाहि जई रोध सज्ज हूओ । **शा**कीए नगरी वीटी रह्या । सदा युध हुइ, ढोआ हुइं । एकवार नगरी शून्य सी देषी तेहे **शा**खी राये गुरु पूछ्या, आज् ए सुं कारण नगरी नओ को छतु न जाणीइं । युद्ध को न करइं । ति वारइं गुरे कहिउं, आज आठमि छइ । ए नृपाधम **गर्द**भी विद्या साधिसिइ । जाप तणइ अंति ए **गर्द**भी विद्या भूंकार करती जे सांभलइं, वयरी भाजइ । मुहि लोही लांखीनइं भुइं पडइं । एह कारण कटक जोअण पाछउ ऊतारु । अनइं सैन्यमाहि हूता सत्तोत्तरसओ शब्दवेधी सुभट मुझ कन्हलि राषओ । तेहे तिम कीधूं । गुरे तेहं सुभट रहइं कहिउं, जि वारइं पेली **गर्द**भी विद्या भूंकारइ, ति वारइं माहरी परि समकाल एह विद्यानूं मुख भाथानी परि भरिवउं । इसी सीषामण देई एक चित्त थई रह्या । ते विद्या प्रस्तावि शब्द करिवा आवी । अह्रोत्तरसओ बाण करी तेहनूं मुह तत्काल भरिउं । **गर्द**भी विद्या निःप्रताप हुई । राजा प्रतिइं कुपी मुहि पाटू मारिओ । मस्तकि मल

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूत्र करी आकासि मंडलि गई । तेहे शाषीए पथ्य प्रमाणनु ज्ञाय लगइ, ते उज्जयनी भेली माहि पइठा । राजा गर्दभिल्ल जीवतओ साहिओ । गुरु आगलि आणिओ । गुरे बोलाविओ, अरे पापिष्ठ ! जे तइं महासती सरस्वतीनु व्रतभंग कीधओ, जे श्रीसंघ आपमानिओ, जे हुं अवगणओ ते पाप वृक्षनुं ए अजी फूल मात्र हूउं छइं, फल ते नरकांत हुसिइ । अजी कांई विणठउं नथी । प्रायश्चित्तनी आलोअण लइ, दीष्या लइ । असइं सांभलइं हूंतइं ऊडण चीतओ देषी देशथिओ काढिओ । एतलइं जे शाखीशंय कन्हलि पहिलं गुरु रह्या हूंता, ते सम्राट मूलगु राओ कीधओ । बीजां रहइं देश विहंची आपिओ । आज लगइ ते शाकान्वय कहीइं । असी प्रतिज्ञा पूरी आपणी बहिन महासती संयमि आरोपीनइं आलोयण करी पडिकम्या हूता आपणा गच्छमाहि आव्या ॥

( २ )

एतलइ अवसरि भरूअछि नगरि गुरुना भाणेज बलमित्र अनइं भाणमित्र । इसिं नामिं एक राजा एक युवराजा राज्य पालइं । तेहे शीघ्र आपणु मुहूंतओ मोकली गुरु तेडाव्या । मुहूंतइं गुरे शाकी राजा मोकलावी भरूअछि पुहता । बलमित्र राजा, भाणुमित्र युवराजा सहित महामहोत्सवि करी पइसारु कीधओ । गुरे भाणेज बलभानु इसिइं नामिं प्रतिबोधी करी दीष्या दीधी । राजा भक्ति करी गुरु चओमासि राष्या । तेहे गुरे राय आगलि पुरोहित एक वार वादि करी जीतओ । ते पुरोहित राय आगलि उपाय करी गुरु ऊपरि वइर वहि । निंदा करइ । सानकूल अ(उ)पसर्ग करइ । ते राजानउं मन विप्रतारइ । जीणइ मार्गि गुरु चालइं तीणइ मार्गि तुझ भक्त रहइं चालिवउं न घटइ, गुरुनां पग भांजइं । ए मोटी आसातना हुइ । राजा मुग्धस्वभावि कहिउं, किम कीजइ ? तु ईणी वाटइं कहीनइं हीडवा न दीजइं । लोक तीणी वाटइं न हीडइं । वली ब्राह्मणि उपाय कहिओ–राजान् ! आपणां गुरुनइं लोक साहि तिसउं विहिरावइं । तम्हे कहु तु रूडउं । भोजन विहिरावइं । सानकूलपणइं नगरमाहि सगले आधाकर्म कराविओ । गुरु आपहिणी जाइं । अनेषणा प्रवर्त्ताविओ । गुरे रहिवा अयोग्य जाणी ते नगर छांडी पइठाणपुरि नगरि ग्या ।

( ३ )

तिहां राजा श्रीशालिवाहन राज्य प्रतिपालइ । श्रावकोत्तम छइ । तीणइं राजां गुरु आव्या जाणी गुरु साहमु ग्यओ । महामहोत्सवि करी नगर माहि प्रवेश कीधओ । गुरे राजनइं जणावउं–अम्हे पर्युषणा पर्व ईहां करिवा हीडां छां । नगरमाहि देव वांद्या । राजा श्रीशालिवाहन प्रमुख गुरुनी पर्युपासना भक्ति करइं । क्रमिहिं पर्युषणापर्व आविउं । राजां सूरीस्वर बोलाव्या, अह्मारइ भाद्रवा सुदि पांचमि तणइ दिवसि इंद्रमहोत्सव शक्रयात्रा हुइ । लोकनइं रूढि ते महोत्सव कीधओ जोईय जि । अनइं श्रीपर्युषणा महोत्सव देववंदना देवपूजा किम हुइ । एह कारण पर्युषणा पर्व छठिइं करओ । ति वारइं गुरे कहिउं—

> अवि चलइ मेरुचूला, सूरो वा उग्गमेइ पच्छिमे भाए ।
> तउ पंचमीइ रयणी, पजूसवणा न अइक्कमइ ॥११॥

मेरु पर्वतनी चूलिका चलइ किवारइं समुद्र मर्यादा मेल्हइ । किवारइं सूर्य पश्चिमइं ऊगइ । तहऊए पर्युषणा पर्व्व पांचमिनी रात्रि न ओल्लंघीइ । तओ चओथिइं कीजइ । ए वचन मानिओ । श्रीमहावीरना वचन तओ श्रीसंघनी अनुज्ञा तु जु इसिउं कहिउं छइ ।

नवसयं त्राणउंए ९९३ वर्षे जे कालिका ते बीजु० ॥

जीयं काऊणं तुरिमणि दत्त० त्रीजु । ते श्यामाचार्य कालिकाचार्य जे निगोद ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नवसई तेणऊएहिं, समयक्कंतेहि वद्धमाणाओ ।
पज्जोसवणचउत्थी, कालगसूरीहिंतो ठविया ॥१२॥

श्रीमहावीरना निर्वाण तु नवसई त्र्याणू वरिसे ग्ये हउंते पर्युषणा पर्व्व श्रीकालिकाचार्य गुरु पंचमी हूंतुं चतुर्थीइं आणिसिइं । इस्युं रायनु अनुग्रह कीधओ । अनइ नंदीश्वरनु तप करती राज्ञी तेहनुं पारणुं हुइ । अनइ साधु महात्मा रहइं श्रीकल्प प्रत्याख्याननूं ओत्तरवारणउं हुइ । एह कारण चतुर्थी पर्युषणा पर्व कीजइ ।

तत्राद्वि चातुव(र्वे)र्षे यत्, पूज्यन्ते साधवो जनैः ।
तत्र देशे प्रवृत्तस्तु, साधुपूजालयोत्सवः ॥१३॥

अजी आज लगइ तिहां पयट्ठाणपुरि देशमाहि भाद्रवा सुदि पडिवे नंइ(नइं) दिनि साधुपूजालयोत्सव हुइ ॥

( ४ )

एतलइं कालना वशेष तु शिष्य प्रमादी जाणी कहिउं न करइं । मनमाहि श्रीकालिकाचार्य चींतवइं । तेहं शिष्य रहइं सीषामणा देवा शिज्जातर श्रावक तेडी तेह आगलि सघलीइ वात कही । जु शिष्य प्रमादी, रात्रि दीह सूता रहइं । शास्त्राभ्यास न करइं, क्रियाकलाप सामाचारी तेहनइ विषइ प्रमाद पर हूआ । तओ एह रहइं किसी शिष्या(क्षा) दीजइ । अह्मे शिष्यनु शिष्य सुवर्णपुरि श्रीसागरचंद्रसूरि इसिं नामिइं छइ, तिहां जईइ छइ । जि वारइं तुम्ह कन्हलि अपार घणु आगरहु करी पूछइं, गाढा हाकली चोयण करीतु । अम्ह रहइं श्रीसागरचंद्रसूरि कन्हइ ग्या कहिज्यो । शय्यातर रहइं जणावीनइं रात्रि पाछिली शिष्य सूता जि मुंकी गुरु श्रीकालिकाचार्य एकला जि चाल्या । सुवर्णपुरि नगरि पुहुता । तेहे गुरे अणओलख्या भणी सामा हि न ओलख्या । वृद्ध को तपोधन एकला आव्यु छइ । व्याख्यानइ नमउ कउं । साहमी प्रतिपत्ति न कीधी । तीणइ प्रति श(शि)ष्य श्रीसागरचंद्रि पूछउं । हे वडा तपोधन ! माहरुं व्याख्यान किस्युं ?–कहिनइं तइं आगइं असउं व्याख्यान कही कन्हि सांभलिउं हूतउं कि ना ? । गुरु तु कहीनइं वषोडइं नही पणि मनि चींतवइं–शास्त्रलगइ अहंकार ऊपजइ । जु भव्य ओत्तम डाहीआर सज्जनइं भणिउं हूंतउं अहंकार फेडइ । तेह जि शास्त्र दुर्जन पापी मूर्ष अज्ञान रहइं साहमूं अहंकार प्रमाद नीपजावइ । जिम श्रीसूर्य देषी घूक घूघा रहइं । साहमूं अंधारुं थाइ । जे सूर्य ऊगिइं देवनां द्वार ऊघडइं । गाइना गाला छूटइं, स्वैरिणी स्वेच्छाचार टलइं, सहू कार्यक(क्र)म करइं । जगचक्षु श्रीसूर्यइं अंधारां जाइं । घूघा रहइं सामहूं अंधारु थाइ । शास्त्र श्रीसूर्य समान छइ । जे अहंकार करइं ते घूक समान जाणिवा । पणि मइं कालिकाचार्यइं वषाणिवउं जि भलओं(उं) वषाण करु छउ । ति वारइं सागरचंद्रि कहिउं मुह कन्हइ कांइ पूछओ । गुरि श्रीकालिकाचार्यि पूछिउं–कहु संसारमाहि रूडउं सूं छइ । सागरचंद्रि सूरि कहिउं । धर्म्म टाली अन्य(नि)त्य जि देषीइ । सहूइ कांइं धर्म उत्तम छइ । पितां(ता) मातां(ता) कलत्र मित्र स्वामी राजां भाइए पुत्रे देवताए मंत्रे जंत्रे ऊषधे जे काज न सीझइं ते धर्मिइं हेलामात्रि सीझइं । दुःख फेडइ । मृत्यु मरणि सार्थि आवइ । ब(बु)द्धिवंते धर्म जि करिवउं । गुरे कहउं धर्म किम हुइ । अहंकारि हुइ । विरध(वृद्ध)वाकि सांभली रीसाणओ सागरचंद्र । वृद्धत्त सुं जाणइ । संपूर्ण शास्त्र सिद्धांत न जाणइ, इम वाद करतां ॥

पाछलि प्रमादी शिषे(ष्ये) शिज्जातर श्रावक पूछिओ तेतलइं श्रावक बोलिओ, तम्हे गुरु श्रीपूज्यतणी आण लोपी अनइं नसंप(क) हूआ । मझ कन्हइ सिउं पूछओ । तम्हे गुरे छांड्या । माहरी दृष्टि आगलथा परहा जाओ । असउं आकरुं वचन शज्जातरि कहउं । ति वारइं तेहे शिषे क्षमावी, अपार पश्चाता(त्ता)प धरी शिज्जातर प्रति वली पूछउं । एक वार दया करी अम्हं कहु–गुरु किहां पुहुता । शिज्जातरि ते क्षमा वली जाणी ओरत्या जाणी कहिउं । गुरु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुवर्णपुरि शिष्यानुशिष्य श्रीसागरचंद्रसूरिनइ स्थानिक पुहता छइ। इस्युं सांभली ते सवे भव्य श(शि)ष्य रुलीयात्य थ्या। तेह नगरभणी चाल्या। केतले दीहे नगरि पुहता। तै सागरचंद्रसूरीस्व(श्व)रे सांभलिउं जु गुरुना गुरु श्रीपूज्य गुरु पाधारइं छइं। ते श(शि)ष्य प्रहृष्ट हूतां वृद्ध आगलि कहिवा लागा। ति वारइं वृद्धिइ कहिउं अम्हे पणि सांभलिउं। पणि ते महात्मा तणओ जि संघात छइ गुरु श्रीकालिकाचार्य आगइं आव्या। साहमा जाता पाछा आव्या। ओ(उ)पाश्रिय गुरुर्व(ब)हि भूमि तु आव्या देषी ते परिवार शिष्य वर्ग सहू साहमूं ऊठिउं। ति वारइं सागरचंद्रसूरि पूछउं। ए कुण तेहे शिष्ये कहिउं। एह जि श्रीपूज्य गुरु जाणिवा। सागरचंद्रसूरिं पगे लागी गुरु खमाव्या। मइं मोटओ अविनय कीधओ। अजाणिवइ करी हू अज्ञात मूर्ष(र्ख) जे मइं श्रीपूज्य प्रसाद गुरु न ओलख्या। इसी असमाधि लाज करिवा लागु। गुरे कहउ संताप म धरि। दुक्ख म आणि। ए ताहरुं कारण काइं नहीं, ए कलिकालतणू। महात्मा इण परी त्रतायुग कलिकाल तु लोक प्रसिद्ध छइ। अनइं दूसम समय आगम प्रसिद्ध छइ इसिउं कहिउं छइ।

**न देवे देवत्वं कपटपटवस्तापसजना**
**जनो मिथ्याभाषी विरलतरवृष्टिश्च जलदः।**
**प्रसङ्गो नीचानामवि(व)निपतयो दुष्टमतयो,**
**जना[ः] शि[ष्टा] नष्टा अहह! कलिकालव्यतिकरः(रः) ॥१४॥**

अहह इसिइं खेदिइं कालिकाल व्यतिकर रौद्र हुओ। देवमाहि देवायतन कांइं नहीं। तापस जन भणीइं ऋ(ऋ)षि तेहइ ते कपटु नइ विषइ पडवडा हूआ। जन लोक मिथ्याभाषी जूठाबोला थ्या। मेहइ ते कीहिं वरसइं किहिं न वरसइं। नीचजन दुष्टतणी सिं(सं)गति हुई। राजान दुष्टमतिक हूआ। विशिष्ट उत्तम जन ते नाठा। ईणी परिइं दूसम समय दुष्ट देषी(खी)इ। ईणइ भावि करी, अहो आचार्य तुहारूं दूषण नहीं, ए प्रमादनूं दूषण। जीव सवे कालनइं महात्मि करी प्रमादि पड्या रहइं। वालुक प्रस्थ दृष्टांत तत्र कहवो। शिष्यानुशिष्य ते प्रतिबोधी गुरु श्रीकालिकाचार्य प्रतिइं विनीत शिष्य हूआ। तेहइं शिष्यं परिवर्या अन्यत्र विहारक्रम कीधओ॥

( ९ )

एकवार महाविदेह क्षेत्रि विहरमान जिन श्रीसीमंधरस्वामि कन्हइ सोधर्मेन्द्रि इसी पृच्छा कीधी। भगवन(न्) जिनेंद्र! हवडां जिस्या तम्हे निगोद जीव वखाण्या तिसी निगोद जीवतणी व्याख्यातणा जाण भरतक्षेत्रि को छइ! इसि इंद्रि पूछिइ हूंतइ स्वामी सीमंधरस्वामि केवलज्ञान भास्कर हूते सोधर्मेन्द्र आगलि कहिउं। श्रीकालिकाचार्य नव पूर्वना जाण छइं। ते असी निगोद व्याख्या जाणइं। ए भरतक्षेत्र तणा लोक धन्य। अद्यापि कलिकालि निस्तीर्थ तीर्थंकर रहित केवलज्ञान(नी) रहित संपूर्ण अवि(व)धि ज्ञानइ रहित मनःपर्यवज्ञान अढाईद्वीपतणा संज्ञीया पंचेंद्रिय जीवतणा मनोगत भाव जाणइं। इस्यूं मनःपर्यवज्ञान श्रुतज्ञानइ नहीं। एहवइ कालि दूसमि श्रीवीतरागतणा वचन मानइं। जे धर्म्म प्रवर्त्तावइं, जे सिद्धांततणा विचार कहइं ते धन्य। इसी स्तुति श्रीसीमंधरस्वामि करइं। इंद्र महाराज सांभलीनइं भरति क्षेत्रि आविओ। वृद्ध ब्राह्मण जरा जीर्णनूं रूप करी आव्यु। अनइ गुरु श्रीकालिकाचार्य कन्हलि पूछिओ स्वामिन्! निगोद जीव केहवा छइं! केतला एक छइं। ति वारइं गुरु श्रीकालिकाचार्ये आगम श्रुत निगोद व्याख्या कीधी।

**संख्यातीताः सन्ति गोलाः, गोलेऽसंख्या निगोदकाः।**
**एकैकस्मिन् निगोदे च, सिद्धेभ्योऽनन्तजन्तवः ॥१५॥**



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गोला य असंखिज्जा, असंखगोला हवइ निगोओ ।
इक्किकंमि निगोए, अणंतजीवा मुणेयव्वा ॥१६॥

गोला असंख्याता छइं । गोलइं गोलइं असंख्याता न(नि)गोद छइं । इकेकइ निगोदि सिद्धइ पइं अनंता जीव छइं । तथा स्वरूप निगोद व्याख्या करी रहिइ हूंतइ गुरुं कनहि तीणइं वृद्ध ब्राह्मणि आपणूं आयु पूछिउं । हूं प्रिया-(प्रयो)गार्थी छउं । माहरूं आयु केतलूं एक छइ ? गुरे उपयोग देइ इंद्र महाराज जाणी कहिउं । अहो ब्राह्मण ! तू तां इंद्र सौधर्म देवलोकनु बिहुं सागरोपमतणूं आयु छइ । इसीउं सांभली रूप प्रकट कीधूं । गुरु नमस्कर्या । उपाश्रय द्वार फेरवी करी 'अमोघं देवदर्शनम्' एह भणी एक बिंब सोम कांतिनुं आप्यउं । ते भावडांनइ गछि छइ । जिम परिवार संघमाहि महिमा जाणीइ । गुरुनी स्तुति कीर्ति करी क्षमावी करी स्वर्गि गिओ ।

हिव सूरस्व(श्व)रि आपणूं आयु प्रमाण जाणी अंत्य संलेखना करी आराधना नीपजावीनइ ईणी परि प्रवचन सिद्धांत रहइं उन्नति नीपजावी करी अनेकि प्रभावना नीपजावी । अनशनी हूता आराधी स्वर्गि पहुता । एहवा युगप्रधान श्रीकालिकाचार्यं गणधरतणूं चरित्र पवित्र ईणइ पर्युषणापर्वि निरंतर कहीइ । एह श्रीयुगप्रधान तणइं नामि करी ऋद्धि वृद्धि तुष्टि पुष्टि शिव शांति मांगलिक नीपजइ । हिव श्रीसंघ रहइं अस्यां उत्तमः पुण्य करणीय करतां श्रीज्येष्टपर्व आराधतां निर्विघ्न हेतु एक वर्द्धापनक अंतरंग शास्त्रनुं कहीइ छइ ।

नक्षत्राक्षि(क्ष)तपूरितं मरकतस्थालं विशालं नभः,
पीयूषद्युतिनालिकेरकलितं चन्द्रप्रभाचन्दनम् ।
यावन्मेरुकरे गभस्तिकटके धत्ते धरित्र्यङ्गना,
तावन्नन्दतु धर्मकर्मनिरतः श्रीसंघभट्टारकः ॥१७॥

पृथ्वी रूपिणी नाय(यि)का, मेर(रु) पर्वत रूपीइ हस्ति चंद्र सूर्य वलय करी शोभायमान, मरकत मणि रत्नमय स्थालि करी, घट जू लइं पहरइं संध्या राग रूपीयइ तारायण अट्ठावीस, नक्षत्र अठ्यासी, ग्रह तारां तणी कोडा नि कोडि । तेह रूपीया अषं(खं)ड आषे(खे) चोखा जाणिवा । पीयूषद्युति भणीइ, चंद्रमा रूपीउं नालिकेर चंद्र ज्योश्ना(त्स्ना) चंदन जाणिवउं । श्रीसंघनइं कारणि वधामणउं करइ । एतावता अंतरंग अर्थ असिउ जाणिवओ । जां लगइ पृथ्वी, जां लगइ मेर, जां लगइ आकाश, जां चंद्र सूर्य तपयं, जां तारायण उदयवंत तां ए श्रीसंघ नांदओ वाधओ विस्तरु । श्रीयुगादिनाथ प्रमष(मुख) श्रीवर्द्धमान पर्यंत चतुर्विंशतिजिनेंद्र तणइ प्रसादि अनइं पं(पुं)डरीक प्रम(मु)ख अनइं श्रीगौतमस्वामि पर्यंत जे गणधर हूआ तेहइं सद्गुरुं प्रसाद अनइं जषि(क्ष) गोमष(मुख) [प्रमु]ष(ख) तीर्थ[कर] सेवक अधिष्ठायक, जषि(क्षि)णी चक्केस्व(श्व)री प्रम(मु)ख शासनादेवति प्रसादात् श्रीसंघनइं उत्तरोत्तर ऋद्धि वृद्धि जओ अभि(भ्यु)दयश्च कल्याण मांगलिकमाला विस्तरु ॥

संवत् १५१७ वर्षे मार्गसिर सुदि ९ शुक्रे, श्रीमडाहडगच्छे
श्रीकमलप्रभसूरिश(शि)ष्य–मुनिआसचन्द्रश्रेयः स्यात्, पठनार्थं लिखितं आपहिणी ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीगुणरत्नसूरिविरचिता

# कालिकसूरिकथा।

[ रचनासंवत् १६ शताब्दि ]

अंबिका पाय प्रणमेसो, कालिक कवित करेसो।
धारावासनयर निरूपम, तीह पुर कुण दीजइ ऊपम ॥१॥
तीणइ पुरि वैरइ सिंघ बलवंत, राज करइ जयवंत।
सुरसुंदरि तस घरिणी राणी, रति प्रीतिरूप समाणी ॥२॥
तेह बिहु अछइ कुमार, कालिक इति सविचार।
एकवार खेलि रवाडी, कुमर गयु वनवाडी ॥३॥
तिहां जोतां मुनिवर दीठा, गुणाकरसूरि बईठा।
कुमर आवी गुर पासि, वांदी मनह उल्हासि ॥४॥
देसणा गुरि तव दीधी, तस काया निरमल कीधी।
देव-गुर-धरम तिहां जाणी, दीक्षा ऊपरि भाव इति आणी ॥५॥
माय बाप सजन मनावी, कालिक सरसति आवी।
गुरु साखि दीक्षा लेई, संयम पालइ ए बेई ॥६॥
गुणाकरि विद्या सवे आपी, कालिक निज पाटि थापी।
कीधा इ(अ)तिसय प्रमाण, मयण मनावइं ए आण ॥७॥
पणि गुण इव वसइ देह, पिसुण सूयण सम नेह।
लबधितणुं निधान, गणधर गुणह प्रधान ॥८॥
छेदइ करम अपार, श्रीगुर इति सविचार।
..............गुण नवि लामइं ए पार ॥९॥
नवकारमंत्र आराधइ, ऋषिराज निज काज साधइ।
तपनिधि साहसधीर, नमइ निरंतर वीर ॥१०॥
सूरिवर जगि जयवंत, आवइ क्रम जीपी बलवंत।
कीधुं सफल संसार, महीयलि करइ विहार ॥११॥
गणधर ऊजेणी पहूता, तिहां राउ गर्दभिल्ल हूंता।
सूतउ साप जगावइ, रिपु थइ सती य रषावइ ॥१२॥
गणइ नहीं पाप जि कांइ, छलि बलि लीइ न लीई।
आवी संघ सामंति, राउ प्रति असिउं कहंति ॥१३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तुम्ह कुळि इम न कीजइ, सरसति सती य न लीजइ ।
सीतइ कारणि रावण, गयु निरवाणि ए निरगुण ॥१४॥
राजन कहिउं अकीजइ, सीषी माणि कणइं नवि लीजइ
मूरष राज म चूकि, सरसति सतीय तूं मूंकि ।
जिम जिम श्रीय संघ वारइ, कोपिइं तिम राय घणूं हारइं ॥१५॥
हाहि म घणी य न कीजइ, अम्ह सीष असी य न दीजइ ।
राय रीसइ सुभट तेडावइ, गेळ हथ धरीय नइ वारइ ॥१६॥
श्रीसंघ गुरु भणी आवइ, सयल समं(बं)ध जणावइ ।
सरसति न मेल्हइ ए नरवर, कहु किम कीजइ गणधर ॥१७॥
सूरि भणइ सुणु संघ वात, सही हिवें करीए घात ।
नीगमूं एह तणूं राज, सीझतु मझ तणूं काज ॥१८॥
इम कहीं अवधूत वेसि, गुरु पहुता साक तणइ देसि ।
र(री)जवी राय निवाणूं, दळ छेईं करइ पीयाणूं ॥१९॥
आवी स(सो)रठइं देसि, ढांकइ रहिया कटक चुमासि ।
सेनापति गुरुपासि आवी, निरधनपणूं य जणावी ॥२०॥
शासनादेवि प्रसादिइं, गणधरमनइ आणंदिइं ।
ईटवा कनकमइ कीधु, वहिंची सवे ते य लीधु ॥२१॥
सेनापति कटक चलावइ, ततक्षिणि ऊजेणि आवइ ।
गर्दभिल मंत्र तव साधइ, गर्दभी विद्या आराधइ ॥२२॥
गुरु वेगिइं सुभट तेडावी, गर्दभिळ कूड जणावी ।
शबदबो(वे)धी गुरे लीधा, तेय सवे आगळि कीधा ॥२३॥
तेह मुखि माथु भरीउ, जीपीअ गर्दभिळ धरीउ ।
एह नृप राज ऊदाळी, सरसति सती य मेल्हावी ॥२४॥
रंगिइं गुरु पासि आवी, सयल वृत्तांत जणावीउ ।
गुणाकरसूर पाए लागी, गणधर आलोयण मागी ॥२५॥
कालिक छांडी सवे माया, कीधी य निरमळ काया ।
गणधर जगि जयवंता, तप करी मुगति पहुता ॥२६॥
पींपलगच्छि गुर सोहइ, भवीयण जण मन मोहइ ।
श्रीगुणरयणसूरिंद, हईयडइ धरीय आणंद ॥२७॥
कीधउ एह चरित्र रसाळ, सुणु बहू बाळगोपाळ ।
तेह घरि सयळ समृद्धि, पामइ अविहड र(रि)द्धि ॥२८॥

इति श्रीकालिकसूरिनी कथा भास समाप्तः ॥

संवत् १७४० वर्षे द्वितीय श्रावण शुद्धि १२ रवी दिने लषितः ॥ छ ॥
बाई सुंदरबाई बाइ वाहालबाई ल(लि)खावी (पि)त श्रीराजनगरे मध्ये लषितः ॥ श्रीकल्याणमस्तु ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only